सिद्धांत लक्षण तत्वालोक : of
of Pt. धर्मदत्त सूरि (alias
बच्चा झा) - Edited by Pt.
गोकुलनाथ मिश्र.
Benares, 1925 A.D.

1136

24

Bill No. 5/07-08
163
2008-0623

श्रीः

सिद्धान्तलक्षणतत्त्वालोकः ।

सर्वतन्त्रस्वतन्त्रमिथिलामण्डलमण्डनपण्डितकुलपति
झोपाख्यधर्मदत्त(बच्चा)सूरिविरचितः ।

ग्रन्थकर्त्तुस्तनूजन्मनान्यायाद्यनेकशास्त्रा
ध्यापकश्रीजगदीशशर्मणा ।

तदन्तेवासिश्रोत्रियकुलोत्पन्नन्यायोपाध्यायेन
श्रीगोप्तृनाथमिश्रेणसंस्कृतः ।

काश्यां
विद्याविलासयन्त्रालयेमुद्रयित्वाप्रकाशितः ।

ति--

पुनर्मुद्रणाद्यधिकारःस्वायत्तीकृतश्च । थमिश्रः

Printed by—

JAI KRISHNA DASS GUPTA,
At the Vidya Vilas Press, Gopal Mandir Lane,
Benares City.

श्रीः

सिद्धान्तलक्षणतत्त्वालोकः

आसीददसीयप्रणयनकरः कृतिकुलकैरवकलाकरः श्वसितमिव-न्यायस्य सर्वस्वमिव मीमांसायाः रहस्यमिव वेदान्तस्य सौहित्यमिव साहित्यस्य जीवातुरिव कल्पनायाः आकर इव कीर्त्तिरत्ननिकरस्य धर्मदत्तोपाध्यायो (बच्चाझा) जन्मना प्रसाधयतिस्म मिथिला-मेदिनीतलम् । यः स्थाविरे मिथिलामहीभृतो महाराजाधिराज-श्री ५ रमेश्वरसिंहस्य (जी. सी. आई. के. बी. ई.) निदेशतएव मुजफ्फरपुरनगरवर्त्तिनि राजकीयसंस्कृतमहाविद्यालये ऽभ्युपैषीत् पदं प्रधानाध्यापकस्य । येनच वाचस्पतिमिश्रप्रमुखेनेव निर्माणकर्मी-कृतानां निम्ननिर्दिष्टनाम्नां ग्रन्थानामध्यापनेन गौरवमतितमामासा-दयन्ति मनीषिणः, तेषामेवनिबन्धानां समुद्धारे बद्धपरिकरेण पुरो-दीरितोपाध्यायान्तेवासिना सकलशास्त्रनिष्णातधिषणेन सद्वृन्दार-काभिनन्दितशीलसुन्दरेण यतिवृन्दवन्दितपदद्वन्द्वारविन्देन श्री-पूर्णानन्दस्वामिना व्याप्तिपञ्चकगूढार्थतत्त्वालोकमुद्रापणानन्तरंसमु-त्साहोद्रेकादिदमीयमुद्रापणे द्रागेवप्रवृत्तिरकारि, यत्रपूर्वरूप(प्रूफ) निर्णेजनकार्यभारो विद्युद्विद्योतमानानवद्यहृद्यविद्याप्रतिहतप्रतिभावि-भासितमैथिलश्रोत्रियप्रकाण्डश्रीमार्कण्डेयमिश्रे मयिच वितीर्णो नैसर्गि-केण प्रणयेन । तत्राशीतितमपृष्ठंयावदेतेन ततश्च समाप्तिं यावन्मया संशोधनेविहितेऽपि दृष्टिदोषेण सीसकाक्षरसंयोजकस्यवाप्रमादेन समुपनता अशुद्धीः स्वयमेव सूक्ष्मेक्षिकयाभिवीक्षणेनाक्षिप्य प्रत्यग्रो-द्धारपरिष्कारप्रकाररसमाशुसमास्वादयन्तु नैयायिकाइति--

श्रीगोप्तृनाथमिश्रः

धर्मदत्तोपाध्यायनिर्मितग्रन्थानां नामानि

१	व्याप्तिपञ्चकस्यगूढार्थतत्त्वालोकः ?	मुद्रितः
२	सिद्धान्तलक्षणस्य „	„
३	व्युत्पत्तिवादस्य „	„
४	भगवद्गीतामधुसूदिन्याः „	„
५	अवच्छेदकत्वनिरुक्तेः „	अमुद्रितः
६	व्याप्त्यनुगमस्य „	„
७	सामान्यनिरुक्तेः „	„
८	तात्पर्यटीकायाः „	„
९	वात्स्यायनभाष्यस्य „	„
१०	प्रस्तारविचारः	„
११	सव्यभिचारस्य टिप्पणी	अमुद्रिता
१२	सत्प्रतिपक्षस्य „	„
१३	कुसुमाञ्जलिप्रकाशस्य „	„
१४	भस्मधारणव्यवस्था	„
१५	सुलोचनामाधवंनामचम्पूकाव्यम्	अमुद्रितम्

॥ श्री ॥

सिद्धान्तलक्षणतत्त्वालोकः ।

॥ श्रीगणेशाय नमः ॥

व्याजस्वीकृतसेवया विधुरभूदग्रेसरः श्रीमता—
म्मानव्याहतिकैतवावनमनादीशस्त्रिलोकीपतिः ।
सम्भिन्नाब्जकुलप्रसूतिविभवादम्भोजमब्जालयो
यस्य श्रीगिरिजापदाम्वुजयगन्तत्स्यादभीष्टप्रदम् ॥ १ ॥
जगदीशकृतव्याप्तिग्रन्थव्याख्यावलम्बिनी ।
विवृतिर्धर्म्मदत्तेन मैथिलेन वितन्यते ॥ २ ॥

ओंनमोवाग्वादिन्यै ॥ सिद्धान्तजाविवेचनाप्रारभ्यते ॥ मूले नन्वित्यादिशङ्कासिद्धान्तमाह । अत्रोच्यतेइत्यादि जिज्ञासाविषयीभूतापूर्व्वपक्षसमाप्त्यनन्तरम्वा हेतुसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकावच्छिन्नभिन्नसाध्यसामानाधिकरण्याभिन्नाव्याप्तिः प्रतिपत्त्यनुकूलव्यापारविषयइत्यर्थः । नन्वन्वयप्रतियोग्यनुयोगिपदर्थाव्यवधानेनोपस्थितिरूपाया आसत्तेस्स्वाव्यवहितोत्तरत्वपूर्वत्वान्यतरसम्वन्धेनैकसाकाङ्क्षपदाविशिष्टापरसाकाङ्क्षपदज्ञानरूपासत्तिसम्वलिताकाङ्क्षाज्ञानस्य वा गिरिर्भुक्तमग्निमान्देवदत्तेन घटोन कम्बुग्रीवादिमान् शुक्लः पटइत्यादिवाक्यतस्सत्यपियोग्यतातात्पर्य्यादिज्ञाने देवदत्तकर्तृकभोजनमाग्निमदभिन्नमचलं शुक्लपटभिन्नकम्बुग्रीवादिमद्घटन्नावगच्छन्तिगृहीतशब्दशक्तिका अपीतिशाब्दबोधकारणताया व्यवस्थापितत्वात् कथं प्रतियोगितावच्छेदकावच्छिन्नान्यत्वप्रतीतिः नच माप्रतीयताङ्कोदोषः तादृशप्रतियोगितावच्छेकावच्छिन्नवृत्तिभेदप्रतियोगिसाध्यसामानाधिकरण्यस्य व्याप्तित्वे क्षत्यभावादितिवाच्यम् वह्नित्वावच्छिन्नस्येत्याद्यव्याप्तिपरग्रन्थे साध्य एव भेदविरोधिप्रतियोगितावच्छेदकीभूततादृशप्रतियोगितावच्छेकावच्छिन्नत्वप्रदर्शनेन तादृशभेदस्यैवलक्षणघटकताप्रतीतेः अथ नातिभारः कार्य्य-

कारणभावस्य ग्रन्थविरोधेन येन प्रकृतविषयेसङ्कोचमासादयेदिति चेन्न प्रतियोगितावच्छेदकावच्छिन्नघटादिवृत्तिभेदप्रतियोगित्वात् साध्यस्यातिव्याप्तेः नचावच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वेन प्रतियोगितावच्छेकावच्छिन्नत्वव्यापकभेदप्रतीतेर्नातिव्याप्तिरितिवाच्यमुभयभेदमादायातिव्याप्त्या साध्यतावच्छेदक एव भेदप्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितायाम्वा साध्यतावच्छेदकेतरानवच्छिन्नत्वस्य विवक्षणीयतया प्रमेसाध्यकेऽव्याप्तेःप्रमेयत्वस्य भेदप्रतियोगितानवच्छेदकत्वात् उभयभेदस्य केवलान्वयित्वेनोभयसाध्यकव्यभिचारिण्यतिप्रसङ्गाच्च प्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकोभयावृत्तिधर्म्ममात्रावच्छिन्नप्रतियोगिताकभेदप्रतियोगितावच्छेदकसामानाधिकरण्यस्य साध्यतावच्छेदके विवक्षणेऽपि तादात्म्येन प्रमेयसाध्यकाव्याप्तेः अत एव प्रतियोग्यवृत्तितादृशभेदप्रतियोगिसाध्यसामानाधिकरण्यविवक्षापि निरस्ता व्युत्पत्तिवैचित्र्येण प्रतियोगितावच्छेदकत्वावच्छेदेन साध्यतावच्छेकभेदविवक्षणे प्रमेयसाध्यतावच्छेदकस्थले दोषस्य दुर्वारत्वात् प्रतियोगितानिरूपितावच्छेदकतात्वावच्छेदेन साध्यतावच्छेदकताविशिष्टान्यत्वस्यस्वसामाधिकरण्यस्वावच्छेकसम्बन्धावच्छिन्नत्वस्ववृत्तित्वस्वानवच्छेदकानवच्छिन्नत्वैतच्चतुष्टयसम्बन्धेन विवक्षणे चातिगौरवात् ॥

उच्यते तथास्थितासत्तेस्तात्पर्य्यविषयानिर्व्वाहकत्व आसत्त्यन्तरकल्पनाया दृष्टत्वात् काव्यप्रबन्धेषु नायंसुधांशुरित्यादौ तत्रह्येतद्भिन्नसुधांशौ व्योमगङ्गासरोरुहत्वप्रतीतेर्व्विवक्षितवच्छित्तिविशेषाप्रत्यायकत्वात् प्रकृतेऽपि विवक्षितलघुलक्षणप्रत्ययाय प्रतियोगितावच्छेकावच्छिन्नपदनञ्पदार्थयोरव्यवधानेनोपस्थितिकल्पना पदयोर्व्वाऽव्यवधानेनान्वयानुसन्धानकल्पनायुक्तैवेति एवंयत्पदघटितवाक्येनञ्समभिहारेयत्पदार्थस्यविशेष्यत्वयोग्यत्वेतस्यैतत्त्वमिति नञ्समभिहारेऽपिस एव विशेष्योऽन्यथोदाहरणवाक्यान्नञ्पदघटिताद्वह्निमद्भेदधूमवद्भेदयोर्व्याप्यव्यापकभावोनप्रतीयते नियमतः प्रतियोग्यभावान्वयस्यतुल्ययोगक्षेमत्वादिति ॥ अथात्रापि तादृशप्रतियोगितावच्छेदकाच्छिन्नघटादिभेदस्यसाध्येसत्त्वादतिव्याप्तिः प्रतियोगितावच्छेदकावच्छिन्नसामान्यभेदनिवेशे साध्यमात्रस्यैव यावदभावीयप्रतियोगितावच्छेदकावच्छिन्नत्वेनासम्भवः नच यथाश्रुतइष्यत इति वाच्यन्ना-

नाव्यक्तिसाध्यकस्थलाव्याप्तिमात्रप्रदर्शकवह्नित्वाद्यवच्छिन्नस्येत्यादि-
ग्रन्थविरोधात् यत्तु हेतुसमानाधिकरणाभाववृत्युभयावृत्तिधर्म्मनि-
ष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिताभावनिष्ठावच्छेदकताभिन्ना-
वच्छेदकत्वानिरूपितप्रतियोगितानिष्ठावच्छेदकताभिन्नावच्छेदकत्वा-
निरूपितावच्छेदकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितधर्म्म-
निष्ठावच्छेदकत्वभिन्नावच्छेदकत्वानिरूपितावच्छिन्नत्वनिष्ठावच्छेदक-
ताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिता-
कपर्य्याप्तिककूटत्वावच्छिन्नवत्वविवक्षायां समवायेन प्रमेयसाध्यके
व्यभिचारिणि प्रमेयाभावप्रतियोगितावच्छेदकावच्छिन्नभेदस्याप्रसि-
द्धत्वेऽपि घटपटादितत्तत्प्रमेयाभावप्रतियोगितावच्छेदकावच्छिन्नभे-
दकूटस्य साध्ये विरहान्नातिव्याप्तिसम्भावनाप्यसम्भवस्तु दूरनिरस्त
इति तन्न यथा श्रुते प्रतियोगिवैयधिकरण्यस्यापि यथाश्रुतस्यैव प्रवे-
शेनासमवेतप्रमेये तादृशभेदकूटसत्त्वात् प्रमेयत्वावच्छिन्नाप्रतियोगि-
कत्वे सति घटत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्वसमवायान्यत-
सम्बन्धेन प्रमेयसाध्यकव्यभिचारिणि प्रसिद्धस्वप्रतियोगितावच्छेद-
कावच्छिन्नभेदकघटाभावस्यैवोभयथापि प्रतियोगिव्यधिकरणाभाव-
तयाऽतिव्याप्तेश्च तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वावच्छि-
न्नानुयोगिताकपर्य्याप्तिककूटत्वावच्छिन्नवत्त्वं स्ववृत्युभयावृत्तिधर्म्म-
मात्रावच्छिन्नभेदवत्वसम्बन्धावच्छिन्नंतादृशाभावप्रतियोगितावच्छे-
दकावच्छिन्नत्वसमानाधिकरणोभयावृत्तिधर्म्मावच्छिन्नप्रतियोगिता-
कपर्य्याप्तिककूटत्वावच्छिन्नवत्त्वञ्चातिव्याप्तिवारकमपि यावदभाव-
मादायासंभववारणाय नालमिति ॥ अतएव तादृशप्रतियोगितावच्छे-
दकत्वव्यापककूटत्वावच्छिन्नवत्त्वंविवक्षणीयं व्यापकता च स्वाश्रय-
भेदप्रतियोगितावच्छेदकसामानाधिकरण्यसम्बन्धेनेत्यपि निरस्तं
समवायेन प्रमेयसाध्यकातिव्याप्तिवारणेऽप्युक्तसम्बन्धविशेषेणप्रमेय-
साध्यकातिव्याप्तितादवस्थ्यात् तत्तद्घटभेदकूटत्वस्यापि तादृशत्वा-
त् तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वसमानाधिकरणोभयावृत्ति-
धर्म्मत्वव्यापकतायाः स्वाश्रयभेदप्रतियोगितावच्छेदकत्वसम्बन्धेन
कूटत्वे निवेशेचासम्भवस्य जागरूकत्वादिति चेन्न साध्यतावच्छे-
दकातिरिक्तव्यासज्यवृत्तिधर्म्मानवच्छिन्नत्वस्य प्रतियोगिता विशे-
षणत्वेऽसम्भवापत्त्या प्रागुक्तसामान्यभेदनिवेशस्यादुष्टत्वात् स्व-

वृत्तिभेदीयतद्घटत्वावच्छिन्नप्रतियोगितासम्बन्धेन पटसाध्यक-कतद्घटत्वे सद्धेतौ यावदभावं तद्यक्त्यभावश्चादाय लक्षणा-सम्भवासम्भवाश्चेतिदिक् । वह्नित्वावच्छिन्नस्य सर्वस्यैवेत्यादि अत्र वह्नित्वावच्छिन्नस्येत्युक्तिस्सार्वभौमीयव्याख्यान्दूषयतुन्तथाहि तत्तद्व्यक्त्यभावमादायाव्याप्तिवारणाय यत्पदं लुप्तसप्तमीकम-वच्छिन्नपदञ्चावच्छेदकतानिरूपितार्थकं स्वीकृत्य हेतुसमाना-धिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रति-योगित्वात्यन्ताभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यमेव-मूलतात्पर्यार्थोवाच्यः प्रतियोगितायाश्चाव्याप्यवृत्तित्वाभ्युपगमा-न्नात्रदोषावसरः नच प्रतियोगितासामान्यशून्यत्वस्यैवास्तुल-क्षणघटकता किमिति शिरोवेष्टनेन नासिकास्पर्शानुधावनमिति वाच्यम् तत्सम्बन्धावच्छिन्नप्रतियोगितायास्तत्सम्बन्धप्रतियोगि-न्येवस्वीकारपक्षे द्रव्यवान्प्रमेयत्वादित्यत्रातिव्याप्तेः गगनादीनां सा-ध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताशून्यत्वात्तद्विवक्षणे स-मवायसम्बन्धावच्छिन्नद्रव्याभावप्रतियोगितावच्छेदकावच्छिन्नद्रव्य-भेदप्रतियोगित्वस्य द्रव्यमात्र एव सत्त्वान्नातिव्याप्तिः । साध्यता-वच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितकल्पे दोषाभावे दृष्यताम्वा तदेव तत्रैव मूलतात्पर्य्यस्य वक्तव्यत्वादिति सार्वभौमै-व्याख्यातम् तत्र वह्नित्वावच्छिन्ने प्रतियोगितावच्छेदकावच्छिन्नत्व-प्रदर्शनेन तन्नियतप्रतियोगिताया अपि सत्त्वे सूचिते तस्या व्याप्य-वृत्तित्वलाभादव्याप्तेर्न्न वारणमिति दूषणं सूचितम्भवति अत्र सत्ता-वान् जातेरित्यादौ विशिष्टसत्तासाध्याभावमादायाव्याप्त्यादीनि दूष-णान्तराण्यपिविशेषव्याप्तिव्याख्यानावसरे दीधितिकृता वक्ष्यमाणा-न्यवधेयानि । एवं शब्दाश्रयवान् तज्ज्ञानत्वादित्यत्र तद्व्यक्त्यभाव-मादायाव्याप्ति रपि दोषोत्रबोध्यः । केचित्ववच्छेदकतायां प्रतियो-गितानिरूपितायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य व-क्ष्यमाणतया वह्नित्वेनसाध्यतास्थले तद्व्यक्तित्वनिष्ठावच्छेदकतायान्त द्विरहेव्याप्त्यप्रशक्त्यावच्छिन्नत्वेनवह्निस्साध्यतालाभाय तथाविधोप-न्यासः नचाव्याप्तितादवस्थ्योक्तिरसंगतेऽतिवाच्यन्तादवस्थ्यस्याविशेषिताव्याप्तिपदार्थान्वयस्यैव विवक्षितत्वान्नचैवमग्रे तदनभिधाना-न्यूनतेतिवाच्यं तदभिधानस्याकिञ्चित्करत्वात् कथमन्यथावच्छेद-

कत्वविचारग्रन्थेनचैवमनतिरिक्तवृत्तित्वांशवैयर्थ्यमित्यादिपऽङ्क्तौ परिभाषिकावच्छेकत्वापत्तितादवस्थ्यादितिलिखनोपेक्षा घटते क्वचित्तदुक्तिश्च परस्यातिप्रतिभाशून्यताज्ञापनेन पराजयोत्कर्षसूचनायेति प्रागुक्तसाध्यतासमनियतसाध्यताकस्थलीयदोषसद्भाव एव तादवस्थ्यशब्दस्यपरिभाषितत्वान्नासंगतिः नहि तत्र साध्यत्वयारवच्छेकैक्यापेक्षेत्यपि कश्चिदिति वदन्ति तन्न साध्यतावच्छेकताघटकसम्बन्धावच्छिन्नत्वस्य पारिभाषिकस्य विवक्षणीयतया वह्निसाध्यकस्थलेऽपि सम्भवात् यतु प्रतियोगितावच्छेदकताघटकसम्भन्धेन प्रतियोगितावच्छेदकावच्छिन्नत्वाविवक्षाया आवश्यकतया विषयितया रूपत्वविशिष्टाभावमादायाव्याप्तेरप्रशक्तेरबच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिवेशनमनावश्यकमेवेति तन्न स्वरूपेणगुणभेदविषिष्टसत्तासाध्यकं सामानाधिकरण्यसम्बन्धेन गुणभेदविशिष्टाभावमादायाव्याप्तेः विषयितासमवायान्यतरसम्बन्धेन रूपत्वविशिष्टसाध्यकात्मघटान्यतरत्वेहतौ प्रत्येकसम्बन्धेन रूपत्वविशिष्टाभावमादायाव्याप्तेश्च वह्निमान्धूमादित्यत्र तद्व्यक्त्यभावस्य साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावप्रवेशादपिवारणसम्भवेन वह्नित्वावच्छिन्नसाध्यकस्थलाव्याप्तिसुचनाय वह्नित्वावच्छिन्नेत्युक्तमित्यस्यापि सुवचत्वाच्च वह्निपदस्य समवायेन वह्नित्वविशिष्टस्यैव बोधकतया नाना सम्बन्धेन वह्नित्वविशिष्टसाध्यकस्थलाव्याप्तेस्सम्भवन्त्यास्त्वदुक्तावलाभाद्वह्नित्वावच्छिन्नस्येत्युक्तन्तल्लाभायेतितुज्यायः । अन्यथा व्याचष्ट इति शब्दशक्यार्थत्यागेन तात्पर्यविषयार्थप्रतिपत्त्यनुकूलप्रतियोगितानवच्छेदकोयोधर्मे इत्यादिग्रन्थाभिव्यापारानुकूलकृतिमानित्यर्थः । अथात्र तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिवारणायावच्छेदकपदस्यावच्छेदकत्वेलक्षणांयत्पदार्थैकदेशान्वयञ्चस्वीकृत्योक्तव्याख्यानक्लेशोऽनुचितोदीधितिकृतां तादृशप्रतियोगितावच्छेदकावच्छिन्नपदशक्यार्थप्रतियोगितावच्छेदकनिष्ठावच्छेदकतानिरूपकभेदस्य यद्धर्म्मावच्छिन्नप्रतियोगित्वयत्पादर्थेऽन्वयस्वीकारादपिदोषवारणसम्भवान्नच प्रतियोगिताभेदएव लाघवान्निवेश्यः प्रतियोगिवैयधिकरण्यघटितव्याप्तौसाध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वस्यहेत्वधिकरणेतत्सम्बाधित्वस्यैवचाभावे निवेशनीयतया प्रतियोगितायां सा-

ध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशे प्रयोजनाभावाद्व्यभिचारिमात्रेऽतिव्याप्तिविरहेऽपि समवायसम्बन्धावच्छिन्नात्मत्वाभावस्यात्मावृत्तेरपितत्सम्बन्धितयातदात्मानुयोगिकसमवायेनात्मत्वसाध्यकज्ञानहेतावव्यतिव्याप्तिविरहेपि च प्रतियोगिवैयधिकरण्याघटिते वाच्यम् ज्ञेयत्वादित्यत्राव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगिताविशेषणताया आवश्यकतया व्यभिचारिमात्रे सम्बन्धान्तरावच्छिन्नसाध्यप्रतियोगितामादायातिव्याप्तिः । ननु तादृशाभावप्रतियोगितावच्छेदकानवच्छिन्नप्रातियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यपर्य्यवसिते लक्षणे व्याप्यवृत्तिसाध्यकस्थलीये तादृशप्रतियोगिताभिन्नप्रतियोगितावच्छेदकत्वघटितेऽव्याप्यवृत्तिसाध्यकस्थुलीये च जात्यवच्छिन्नाभावप्रतियोगितामादाय धूमवान्वह्नेरित्यादावतिव्याप्तिः प्रतियोगितानिरूपितनिरवच्छिन्नावच्छेदकत्वस्य दण्डादिसाध्यतावच्छेदकहेतावव्याप्त्या विवक्षितुमशक्यत्वादिति चेन्न तादृशप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वस्य साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदके विवक्षणे दोषाभावात् जातित्वस्वरूपावच्छेदकत्वस्याव्यासज्यवृत्तित्वेन धूमत्वगतैकत्वाद्यवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वेप्यवच्छेदकत्वे निरूपितत्वस्य साक्षात्परम्परा साधारणस्य प्रवेशेन जातित्वस्यापि प्रतियोगितावच्छेदकत्वादथ तादृशप्रतियोगितावच्छेदकताविशिष्टावच्छेदकतात्वावच्छिन्नप्रतियोगिताविवक्षणीया वैशिष्ट्यञ्च स्वतादात्म्य स्वनिरूपितत्वान्यतरसम्बन्धेन यद्वा तादृशप्रतियोगिताविशिष्टसाध्यतावच्छेदकत्वम्विवक्षणीयं वैशिष्ट्यञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वैतत्सम्बन्धावच्छिन्नस्ववृत्तित्वोभयसम्बन्धेन वैशिष्ट्यञ्च स्वसामानाधिकरण्य स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धावच्छिन्नस्ववृत्तित्वस्वानवच्छेदकानवच्छिन्नत्वस्वावच्छेदकसम्बन्धाववच्छिन्नत्वैतच्चतुष्टयसम्बन्धेन तार्णवह्निसाध्यकस्थले वह्निज्ञानत्वेन व्यभिचारिणि वह्न्यभावप्रतियोगितामादायातिव्याप्तिवारणाय प्रथमसम्बन्धनिवेशः तद्ग्राहकस्वसामानाधिकरण्यमपितदर्थकमेव जातिमद्वह्निसाध्यके व्यभिचारिणि जातिमदभावप्रतियोगितामादायाति-

व्याप्तिवारणाय स्ववृत्तित्वनिवेशः तत्रैव वह्न्यभावमादायातिव्याप्तिवारणायस्वानवच्छेदकानवच्छिन्नत्वनिवेशः कालिकेनवह्नित्वविशिष्टत्वे सतिसमवायेन वह्नित्वविशिष्टसाध्यके व्यभिचारिणि समवायेन वह्निविशिष्टाभावप्रतियोगितामादयातिव्याप्तिवारणाय स्वावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशः वह्निसाध्यकस्थले व्यभिचारिणि तार्णवह्न्यभावप्रतियोगितामादायातिव्यातिवारणाय स्ववृत्तित्वप्रवेशः तद्घटकस्वसामानाधिकरण्यमपि तदर्थकमेव जातिमत्साध्यकव्यभिचारिणि जातिमद्वह्न्यभावप्रतियोगितामादायातिव्याप्तिवारणाय स्ववृत्तित्वस्यप्रवेशः वह्निसाध्यकव्यभिचारिणि जाजितिमद्वह्न्यभावप्रयोगितामादायातिव्याप्तिवारणाय स्वानवच्छेदकानवच्छिन्नत्वस्य तद्घटकस्यप्रवेशः समवायेन वह्नित्वविशिष्टसाध्यके व्यभिचारिणि कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टाभावप्रतियोगितामादायातिव्याप्तिवारणाय स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशः साध्यता च प्रायोविषयितया बोध्येति चेन्नैवं वृत्त्यनियामकसम्बन्धस्यप्रतियोगितावच्छेदकत्वानवच्छेदकत्वाभ्युपगमेन कल्पद्वयस्य वक्ष्यमाणतया तन्मतद्वयानुसारेणानवच्छेदकत्वगर्भव्याख्यादरणात् वृत्त्यनियामकस्य प्रतियोगितावच्छेदकत्वपक्षे उक्तलक्षणस्य निर्दोषत्वंऽपि तस्या तथात्वेदोषसम्भवात् तत्र यद्यपि विषयितयागुरुधर्मसाध्यकेऽव्याप्तिर्नोद्भावयितुं शक्या सिद्धान्तेऽप्युक्तपक्षे पारिभाषिकावच्छेदकत्वविवक्षायामपि विषयितया गुरुधर्मेण साध्यातायाम्व्यभिचारिण्यतिव्याप्तेरशक्यपरिहारत्वेन तत्सम्बन्धादिसाध्यकस्थलस्य तत्पक्षपतल्लक्षणालक्ष्यताया एव स्वीकरणीयत्वात्तथापि संयोगादिना गुरुधर्मेण साध्यतायां सद्धेतौ गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽव्याप्तेरशक्यपरिहारत्वात् तादृशप्रतियोगितावच्छेदके यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वविवक्षा च तादृशप्रतियोगितावच्छेदकद्रव्यत्वादेर्धूमत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वेनधूमवान्वह्नेरित्यत्रातिव्याप्तेरशक्त्वात् तेन साध्यतावच्छेदके तादृशप्रतियोगितावच्छेदकत्वमनतिरिक्तवृत्तित्वमेव वाच्यमिति निरस्तं सासामानाधिकरण्यसम्बन्धेन घटभेदाविशिष्टसाध्यकसद्धेतौ साध्याभावस्य गुरुधर्मावच्छिन्नाभावतयाऽप्रसिद्ध्या घटभेदाभाववियतादृशप्रतियोगि-

तातिरिक्तवृत्तितया साध्यतावच्छेदकस्येत्यव्याप्तेः तादृशसत्ताभावप्रतियोगितावच्छेदकत्वस्य तादृशस्य बिशिष्टसत्तात्वे सत्त्वेन विशिष्टसत्तावाञ्जातेरित्यत्रातिव्याप्तेश्च अतएव तादृशप्रतियोगितावच्छेदके साध्यतावच्छेदकव्याप्यत्वविवक्षापि निरस्ता नच साध्यतावच्छेदकावच्छिन्नव्याप्यतावच्छेदकत्वम्विवक्षितुं शक्यं तद्धि साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाभाववन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वम्वा साध्यतावच्छेदके तादृशप्रतियोगितावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वपर्य्यवसायि वा तादृशयत्किञ्चिद्धर्मावच्छिन्नब्यापकतावच्छेदकत्वपर्य्यवसायि वा तत्र नाद्यः केवलान्वयिसाध्यकाव्याप्तेः न द्वितीयः व्यतिरेकिण्यव्याप्तेः साध्याधिकदेशवृत्तितावच्छेकतादृशधर्मावच्छिन्नाधिकरणविशेषे साध्यस्यावृत्तेः नान्त्यः गुरुधर्मेण साध्यतायां व्यभिचारिण्यतिप्रसङ्गात् तस्य साध्यतावच्छेदकसम्बन्धाच्छिन्नप्रतियोगितामात्रानवच्छेदकत्वात् नच विषयितासम्बन्धेन व्याप्यव्यापकभावः प्रकृते विवक्षणीयः गुरुधर्मसाध्यकसद्धेतावव्याप्तेः अथास्तु साध्यतावच्छेदकसम्बन्धेनैव तत् प्रतियोगिवैयधिकरण्यन्तुसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वप्रतियोगित्वावच्छिन्नाधिकरणत्वोभयाभावरूपमेव वाच्यन्तथाच व्यभिचारिमात्रेऽभावमात्रस्यैव प्रतियोगिवैयधिकरण्यवत्वेन तादृशप्रतियोगिताभिन्नप्रतियोगित्वाप्रसिद्ध्यैव नातिव्याप्तिति चेन्न धूमाभावप्रतियोगित्वविशिष्टस्यसंयोगेनसाध्यतायाम्व्यभिचारिणिवह्नौ धूमाभावप्रतियोगित्वावच्छिन्नाधिकरणत्वसाध्यतावच्छेदकीमूततादृशप्रातियोगित्वावच्छिन्नाधिकरणत्वद्वयाप्रासिद्ध्या धूमाभावस्य प्रतिगिव्यधिकरणत्वविरहेण तत्प्रतियोगितायास्तादृशत्वा दतिव्याप्तेः नच द्वयत्वमप्रवेश्यन्तथा च साध्यतावच्छेदकावच्छिन्नाधिकरणत्वत्वनिष्ठावच्छेदकताभिन्नप्रतियोगित्वावच्छिन्नाधिकरणत्वत्वनिष्ठावच्छेदकताभिन्नोभयत्वनिष्ठावच्छेदकताभिन्नावँच्छेदकत्वानिरुपितप्रतियोगिताकाभावत्वनैवाभावो लक्षणघटकः एवञ्च धूमाभावप्रतियोगित्वावच्छिन्नाधिकरणत्वाभावस्यापि तादृशत्वेन तस्य हेत्वधिकरणवृत्तित्वाद्धूमाभावोऽपि प्रतियोगिव्यधिकरण एवेति वाच्यम् । घटत्वावच्छिन्नप्रतियोगिकस्ववृत्तिवाच्यत्ववत्तासंयोगान्यतरसम्बन्धेन पटसाध्यकसद्धेतौ प्रतियोगिव्यधिकरणाभा-

वाप्रसिद्धेः यदि च प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वत्वनिष्ठावच्छेदकताभेद एव निवेश्यः तथा च नाभावाप्रसिद्धिरित्युच्यते तदाधिकरणतायां प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वनिवशे व्यधिकरणसम्बन्धावच्छिन्नसाध्याभावमादायातिव्याप्तिरधिकरणतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशे वह्नीयसंयोगेनसाध्यतायां प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाप्रसिद्ध्याऽव्याप्त्यापात्तिः सिद्धान्तकल्पे च सम्बन्धधर्मिकोभयाभावस्य वक्ष्यमाणतया न तत्र दोषावसरः अत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धसामान्ये साध्यतावच्छेदकावच्छिन्नाधिकरणत्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वद्वयप्रतियोगिकत्वहेत्वाधिकरणभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावश्च धूमवान्वह्नेरित्यत्रतादृशाधिकरणताद्वयाप्रसिद्ध्या धूमाभावस्यप्रतियोगिवैयधिकरण्यासम्भवादतिव्याप्त्या हेयः नचाधिकरणतायांसम्बन्धावच्छिन्नत्वस्यानिविष्टत्वेन कथन्तद्द्वयत्वाप्रसिद्धिरिति वाच्यन्तथाप्यभावाप्रसिद्धेः धूमत्वावच्छिन्नाधिकरणताद्वयप्रतियोगिकत्वतादृशानुयोगिकत्वोभयन्नास्तीत्यस्यैवतादृशाभावप्रतीतित्वेन तत्र द्वित्वस्य प्रतियागितावच्छेदककोटावेकधर्म्मावच्छेदेन भासमानतया तादृशधर्म्मव्याप्यत्वविशिष्टपर्य्याप्तेरेव तत्संसर्गत्वेन तेन द्वित्वमात्रस्यावच्छेदकत्वे क्षत्यभावेनाधिकरणतात्वस्यानवच्छेदकत्वात् नचैवमपिकिञ्चित्सम्बन्धावच्छिन्नत्वमधिकरणताद्वये प्रवेश्यन्तथाच विशेषाभावमादायैवनातिव्याप्तिरिति वाच्यमतिव्याप्तिविरहेपि वह्नित्वावच्छिन्नप्रतियोगिकसंयोगेन वह्निसाध्यकस्थले सद्धेतौ वन्ह्यभावस्यापि प्रतियोगिव्यधिकरणत्वादव्याप्तिस्स्यादिति अत एव त्रितयाभावोपि न निवेश्यः नापि च साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वैतत्त्रितयाभावस्साध्यतावच्छेदकसम्बन्धसामान्यनिष्ठः नच त्रित्वमनिवेश्य तन्निवेशश्शक्यः कर्तुं तथाहि त्रित्वनिष्ठावच्छेदकताभिन्नतत्तदवच्छेदकत्वानिरूपितप्रतियोगिताकाभावस्यैव चतुष्टयाभावादिवारणाय निविवेशनीयतया धूमवान्वह्नेरित्यत्रोभयाभावस्यातादृशत्वात् प्रत्येकाभावस्य साध्यतावच्छेदकसम्बन्धसामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धसामा-

न्ये वा ऽसत्वादत्तिव्याप्तेः अथ साध्यतावच्छेदकावच्छिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्नप्रतियोगितावच्छेदकावच्छिकावच्छिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्नद्वित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकताभिन्नप्रतियोगितात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगितानिष्ठावच्छेदकताभिन्ननिरूपकत्वत्वनिष्ठावच्छेदकताभिन्नहेत्वधिकरणीभूतयत्किञ्चिद्वृत्त्यनुयोगिकत्वत्वनिष्ठावच्छेदकताभिन्नोभयत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकाभावत्वेन निवेशः एवंसाध्यतावच्छेदकावच्छिन्नसाध्यातावच्छेदकसम्बन्धावच्छिनाधिकरणत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाभावस्यनिवेशेवानदोष इति चेत् सत्यं प्रमेयत्वावच्छिन्नप्रतियोगिकस्वरूपेण प्रमेयसाध्यकसद्धेतावव्याप्तिविना तत्र प्रमेयत्वावच्छिन्नाभावान्याभावस्य सर्वस्यैव प्रतियोगिव्यधिककरणत्वात् समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य प्रमेयाभावस्य प्रतियोगितावच्छेदकतायास्समवेतत्वादौ प्रमेयत्वावच्छिन्नप्रतियोगिकसमवायसम्बन्धावच्छिन्नप्रतियोगिताकस्यतस्यप्रतियोगितावच्छेदकतायाधर्मविधयाचसमवेतत्वे संसर्गविधया च समवाये संयोगसम्बन्धावच्छिन्नप्रतियोगितायाश्च प्रमेयाभावीयाया द्रव्यत्वे कालिकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताया अपि समवेतत्वादिष्वेव कल्पनाद्विषयत्वादीनांप्रतियोगितानवच्छेदकत्वात्तादात्म्यस्वरूपाद्यवच्छिन्नायां प्रमेयत्वावच्छेद्यत्वासम्भवात्तादृशप्रतियोगिताभिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरेवेति एतेन प्रतियोगिवैयधिकरण्यमुक्तदिशा निरुच्य तादृशप्रतियोगिताभिन्नप्रतियोगितानवच्छेदकत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वोभयाभाववत्त्वमेव साध्यतावच्छेदके गुरुधर्म्मसाध्यकसद्धेतावव्याप्तिवारणायोपादेयं व्यभिचारिमात्रे च तादृशप्रतियोगिताभिन्नप्रतियोगित्वाप्रसिद्धयैव नातिव्याप्तिरित्यपि प्रत्युक्तम् नच प्रतियोगितावच्छेदकतायां द्वितीयायां साध्यतावच्छेदकताघटकसम्बन्धाद्यवच्छिन्नत्वस्यानिवेशनीयतया विषयित्वानुयोगित्वादिना प्रमेयत्वविशिष्टाभावप्रतियोगिताया एव तादृशप्रतियोताभिन्नायाः सम्भवः प्रतियोगिवैयधिकरण्यघटकप्रतियोगितावच्छेदकनिष्ठावच्छेदकतायां सम्बन्धावच्छिन्नत्वाप्रवेशेन तादृशाभावस्य प्रतियोगिवैयधि-

करण्यासम्भवादितिवाच्यम् तत्रापि परम्पराविशेषसम्बन्धेन लाघवेन प्रमात्वादेरेवावच्छेदकत्वादिति एवं संसर्गीयप्रतियोगितायान्द्वित्वावच्छिन्नत्वास्वीकारे विशेषरूपेणसंसर्गत्वास्वीकारे च सिद्धान्ते प्रतियोगिताधर्म्मिकोभयाभावघटितकल्पस्य निर्दुष्टस्य संभवः अत्र च कल्पे न तत्संभवः तथाहि स्वप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणाभावभिन्नाभावीयप्रतियोगितासामान्ये साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व साध्यतावच्छेदकातिरिक्तधर्म्मावच्छिन्नत्वोभयाभावः साध्यतावच्छेदसम्बन्धानवच्छिन्नत्वसध्यतावच्छेदकावच्छिन्नत्वाभेयाभावः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकानवच्छिन्नत्वोभयाभावोवा निवेश्यः तत्र नाद्यः कालिकसम्बन्धावच्छिन्नघटाभावप्रतियोगितायामुमयस्यैवसत्त्वेन वह्निमान्धूमादित्यादावव्याप्त्यापत्तेः न द्वितीयः कालिकसम्बन्धावच्छिन्नवह्न्यभावप्रतियोगितायामुभयस्यैव सत्त्वात् नान्त्यः संयोगसम्बन्धावच्छिन्नद्रव्याभावीयप्रतियोगितायामुभयसत्त्वात् नापि यत्किञ्चित्प्रतियोगितायां प्राथमिकोभयाभावः संयोगसम्न्धावच्छिन्नद्रव्याभावीयप्रतियोगितायामुभयाभावसत्त्वेन धूमवाह्नेरित्यादावतिव्याप्त्यापत्ते रिति अत एवास्तु गुरुधर्म्मावच्छिन्नसाध्यकाव्याप्तिवारणाय प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगित्वावृत्ति साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्यात्रव्याप्तित्वं वृत्तिता च स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगितातादात्म्येन ग्राह्या व्यभिचारिणि तु साध्यतावच्छेदकस्य तादृशसाध्याभावप्रतियोगितावृत्तित्वस्यैव सत्त्वेन लक्षणसंभव इति निरस्तम् एवमत्रराद्धान्तापेक्षाया च यमंवविशेषमालोजयामोयदत्रोक्त परम्परायागुरुभूतायाः संशर्गत्वंसिद्धान्ते च कल्पे संसर्गविधयाऽनुगमे लघुभूतस्य तादृशानवच्छेदकधर्मावच्छिन्नत्वमात्रस्य संसर्गत्वमिति एतेन प्रकारतायां निविष्टस्य हेतुमन्निष्ठाभावीयप्रतियोगित्वावृत्तियद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्न प्रतियोगितातादात्म्यन्तद्धर्म्मावच्छिन्नसमानाधिकरण्यस्यापि व्याप्तित्वं निरस्तम् । सिद्धान्तकल्पापेक्षयाऽनतिविशेषात् एवं सिद्धान्ते तादृशप्रतियोगितासामान्यनिष्ठस्य गुरुधर्मसाध्यकाव्याप्तिवारकोभयाभावस्यात्र तादृशप्रतियोगित्वावृत्तित्वस्य च तादृशोभयनिष्ठस्यैक

पर्य्यवसायित्वादितिध्येयम् यत्तु गुरुधर्म्मसाध्यकाव्याप्तिवारणाय तादृशप्रतियोगिताभिन्नप्रतियोगितानवच्छेदकत्वयत्किञ्चिद्धेत्वधिकरण निष्ठाधिकरणतानिरूपकतानवच्छेदकत्वोभयाभावस्साध्यतावच्छेदके विवक्षणीय इति न दोषः निरूपकतावच्छेदकत्वाभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्ननिरूपकतावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकोबोध्यः नातः साध्यतावच्छेदकसम्बन्धाननुयोगि व्यभिचारनिरूपकाधिकरणकव्यभिचरिण्यतिव्याप्तिरिति तन्न प्रागुक्तप्रमेयसाध्यकाव्याप्यादिदोषतादवस्थ्यादिति अत एव पारिभाषिकावच्छेदकत्वविवक्षायामुक्तप्रकारेण साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वतादात्म्यसम्बन्धावच्छिन्नयादृशप्रतियोगित्वावच्छिन्नाधिकरणत्वोभयाभावनिवेशे, न कोपि दोषः सद्धेतौ साध्यसाध्यवदन्यतराभावप्रतियोगितामादायलक्षणसंगतिर्व्यभिचारिणि प्रतियोगित्वस्य तादृशस्याप्रसिद्धेर्लक्षणासंभवात् कालोघटवान्महाकालत्वादित्यत्र तादृशाभावप्रसिद्धेरिति निरस्तम् कश्चिदत्र प्रमेयवह्निमान्धूमादित्यत्र तादृशोभयाभावस्य गुरुधर्म्मावच्छिन्नाभावत्वेनाप्रसिद्धेरव्याप्तिस्तद्रूपस्य तादात्म्येनसाध्यताया‌ंव्यभिचारिण्यतिव्याप्तिश्च धूमाभावप्रतियोगिसाध्यकेऽतिव्याप्तिवारणाय प्रतियोगितावच्छेदकेतरवारकपर्य्याप्तिमात्रनिवेशेऽपि तद्रूपत्वावच्छिन्नाधिकरणत्वाभावस्य तद्रूपाभावप्रतियोगित्वावच्छिन्नाधिकरणत्वाभावस्य च गुरुधमर्म्मावच्छिन्नाभावत्वात् तत्प्रतियोगित्वावच्छेदकत्वस्य तद्व्यक्तित्व एव कल्पनात् । नच तादृशाधिकरणतात्वसमानाधिकरणोभयावृत्तिधर्म्मस्यै वेतरवारकपर्य्याप्तिर्निवेश्येति वाच्यन्तथासति साध्यसाध्यवदन्यतराभावस्य प्रतियोगिवैयधिकरण्यवारणाय तादृशाभावत्वावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगिकूटत्वावच्छिन्नाधिकरणत्वस्यैव निवेशनीयत्वेन तादृशाभावकूटान्तर्गतसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वाभावस्य हेत्वधिकरणे विरहेणाव्याप्त्यापत्तेः उक्ततद्व्यक्तित्वद्वयनिष्ठावच्छेदकतानिरुपितत्वप्रवेशे च वाच्यम् ज्ञेयत्वादित्यादौ तादृशोभयाभावप्रतियोगितावच्छेदकत्वस्य प्रतियोगित्वावच्छिन्नाधिकरणत्वनिष्ठतद्व्यक्तित्वएवकल्पनीयतयाऽव्याप्तेः प्रतियोगित्वावच्छिन्नाधिकरणत्वनिष्ठतद्व्यक्तित्वनिष्ठावच्छेदकत्वानिरुपितत्वप्रवेशे

द्रव्याभावमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिरित्याह तन्न साध्यतावच्छेदकावच्छिन्नाधिकरणत्वसमानाधिकरणोभयावृत्तिधर्म्मनिष्ठावच्छेदकताभिन्नप्रतियोगित्वावच्छिन्नाधिकरणत्वसमानाधिकरणोभयावृत्तिधर्म्मनिष्ठावच्छेदकताभिन्नोभयत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिततत्तदुभयावृत्तिनिष्ठावच्छेदकतानिरूपितप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकूटत्वावच्छिन्नवत्त्वविवक्षायां दोषाभावात् । यद्यप्यत्रवृत्त्यनियामकस्य प्रतियोगितावच्छेदकत्वे न पारिभाषिकावच्छेदकत्वविक्षाप्रयोजनवती नवा प्रतियोगिताविशिष्टत्वम्बिवक्षणीयम् । साध्ये तत्प्रतियोगित्वविवक्षयैवसामञ्जस्यात्तथाप्युक्तप्रतियोगिवैयधिकरणयस्य चिन्तामणिदीधित्याद्यलभ्यतयाव्याख्यातृभिरनुपादेयत्वादत्रचकल्पे गुरुधर्मस्य प्रतियोगितावच्छेदकत्वाङ्गीकारेण च गदाधरेणगौरवम्प्रदर्शितं तदपि दोषतया ग्राह्यं नच तन्मते सिद्धान्ते महानसीयवह्न्यभावादिवारणायसाध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वादिविशेषणस्यासत्त्वेन लाघवं युज्यत एव जगदीशमते च सिद्धान्ते तद्विशेषणसत्त्वेनात्र तदभावेनात्रैवलाघवमिति वाच्यमत्रप्रागुक्तप्रतियोगितावच्छेदकत्वपर्य्याप्तेः प्रतियोगिताविशिष्टत्वस्य वा प्रागुक्तस्यैकत्वादेः पर्य्याप्त्यनभ्युपगमेऽव्याप्तिसम्पादकत्वात्सिद्धान्तकल्पानिकृष्टविशेषणापेक्षया गुरुत्वाच्चेतिदिक् ॥ एवमेवच हेतुसमाधिकरणप्रतियोगिव्यधिकरणाभावभिन्नाभावप्रतियोगितावच्छेदकत्वादिविवक्षापि हेया । यद्यप्यत्र घटाभावभिन्नंपटत्वादित्यत्राव्याप्तिः प्रतियोगिव्यधिकरणहेतुसमानाधिकरणघटाभावात्मकत्वात्साध्याभावस्य नच तादृशाभावत्वरूपानुयोगिताभिन्नानुयोगितानिरूपितप्रतियोगितावच्छेदकत्वम्विवक्षणीयन्तथाच नाव्याप्तिरिति वाच्यम् । सम्योगसम्बन्धावच्छिन्नवाच्यत्वाभावभिन्नं वाच्यत्वादित्यत्रातिव्याप्तेः साध्याभावस्य वाच्यत्वाभावत्वरूपतया तस्य च तादृशानुयोगिताभिन्नत्वात्तथापि स्वनिरूपितत्वस्वनिष्ठानुयोगित्वानिरूपितत्वोभयसम्बन्धेन तादृशानुयोगिताविशिष्टप्रतियोगितावच्छेदकत्वम्बिवक्षणीयन्ताथा च नदोष इति कश्चिदुक्तलक्षणानाम्व्यभिचारज्ञानप्रतिबध्यत्वाभावादव्याप्तित्वमाह तदसमंजसं व्यभिचारस्य व्याप्त्यनुसारेण निर्वाच्यत्वादसमानप्रकारकयोरपि व्याप्तिव्यभिचारज्ञानयोः प्रतिबध्यप्र-

तिवन्धकभावाङ्गीकरणाच्च कथमन्यथा प्रतियोगिताधर्म्मिकोभयाभावादीनां व्याप्तिघटकत्वन्दीधितिकारा ह्यनुमतम् कथम्वा व्याप्तिग्रहविचारे चिन्तामणिकृता साध्याभाववद्वृत्तित्वस्य व्यभिचारत्वम्व्यापकसामानाधिकरण्यस्य च व्याप्तित्वम्वक्ष्यते ॥ * ॥ इत्थमेव च व्याप्यवृत्तिसाध्यकस्थ ले हेतुसमानाधिकरणत्वभिन्नत्रवृत्तितावच्छेदकाभावत्वनिरूपितप्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्यापि व्याप्तित्वं निरस्तम्वेदितव्यमित्यलं पल्लवितेन ॥ * ॥ अथात्र नञोन्तरार्थकत्वेपि तद्व्यक्त्यभावमादाय प्रसञ्जिताया अव्याप्तेर्व्वारणसम्भवान्नञ्व्यत्यासपक्षोनोचितस्तथाहि तदवच्छिन्नान्तरत्वञ्च तदवच्छिन्नाविषयकप्रतीतिविषयत्वन्तदनवच्छिन्नप्रकारताश्रयत्वम्वा तस्य साध्यतावच्छेदकावच्छिन्नेऽन्वये साध्यतावच्छेदके लभ्यते तदवच्छेदकत्वन्तथाच तद्व्यक्तित्वावच्छिन्नाविषयकप्रीतिविषयतावच्छेदकत्वस्य वह्नित्वे सत्त्वान्नाव्याप्तिर्न्नवाद्रव्यत्वादिनाधूमत्वावच्छिन्नाविषयकप्रतीतिविषयत्वे ष्यतिव्याप्ति रादरणीयतमश्चानयोरुत्तरः कल्पः तेन सद्धेतुविशेषे साध्यज्ञानस्य हेत्वधिकरणावृत्तियत्किञ्चित्पदार्थविषयक त्वनियमेपिनाव्याप्ति रेवंच वह्नित्वावच्छिन्नप्रकारकज्ञानस्य महानसीयवह्नित्वावच्छिन्नाविषयकत्वात्तत्प्रकातायां वा महासीयवह्नित्वानवच्छिन्नत्वादव्याप्तिविरहेण वक्ष्यमाणतद्वारकविशेषणमपि नोपादेयमितिचेन्न तत्कल्पे नञ्व्यत्यासपक्षापेक्षयातिगौरवस्य व्यक्तत्वात् नचात्र साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वाद्यनिवेशे न लाघवमिति वाच्यम् भवेदेवं यदि यथाश्रुत एव महानसीयवह्न्यभावमादायाव्याप्तेर्वारणं सम्भवेत् शुद्धवह्नित्वावच्छिन्नाविषयत्वस्यापि तत्प्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नत्वान्नच तत्सम्भवति प्रतियोगितावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वस्य साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदके निवेशश्च पर्य्याप्तीयप्रतियोगिताचतुष्टये निरूपितत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वचतुष्टयस्य तादृशानुयोगितावच्छेदकत्वचतुष्टयस्य तत्र प्रविष्टत्वेन साध्यतावच्छेदकतादितरोभयानवच्छिन्नघटितादपि प्रतियोगितानवच्छेदकत्वकल्पादतिगुरुत्वादेकत्वादेः प-

र्य्याप्त्यभ्युपगम एव तन्निवेशस्य सम्भवेन नञ्व्यत्यास-
कल्पेप्येवंसति प्रतियोगितावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयो-
गितानवच्छेदकत्वस्यैव निवेश्यतया सुतरामतिगुरुत्वाच्च हेयः ॥
नच साध्यतावच्छेदकगतरूपे विषयतावच्छेदकपर्य्याप्त्यनुयोगिता-
वच्छेदकत्वानिवेशनमेतत्कल्पे व्यर्थं तार्णवह्नेर्विषयितया साध्यतायां
तार्णविषयकवह्निविषयकज्ञानत्वे व्यभिचारिणि तादृशविषताशून्य
केवलवह्निविषयक तार्णविषयकज्ञानविषयतावच्छेदकत्वस्य साध्यता
वच्छेदके सत्त्वेनातिव्याप्तेः। यत्तु पर्य्याप्तिघटितकल्पस्योभयत्रैवासम्भ-
वः तादृशाभावप्रतियोगितावच्छेदकत्वादेरनेकधर्मपर्य्याप्ततयैकत्वह्नि-
त्वादेस्तदनवच्छेदकत्वादिति तत्तुच्छम् तादृशप्रतियोगितावच्छे-
दकत्वादिनिष्ठप्रतियोगितायाः पर्य्याप्तीयायास्तद्यक्तिनिरूपितप्र-
तियोगित्वनिष्ठनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेद-
कतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगितात्वेनै-
व तत्र निवेशात् तादृशप्रतियोगिताविशिष्टत्वेन वा रूपस्य
निवेशात् वैशिष्ट्यञ्च स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयो-
गितावच्छेदकत्वसम्बन्धेनेति एवमेकत्वादिः पर्य्याप्त्यनुयोगितान-
वच्छेदकत्वपक्षे स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वा-
निरूपितत्वस्ववृत्तितोभयसम्बन्धेन प्रतियोगिताविशिष्टविषय-
त्वादीनामेव निवेशनीयतया वक्ष्यमाणमहानसीयवह्न्यभाववारक
निवेशघटितकल्पापेक्षयात्र गौरवमेव निर्बाधम् ॥ अथ यत्त्वत्रप्रतियोता
वच्छेदकाविषयकप्रतीतिविषयकत्वनिवेशापेक्षयाप्यस्यगुरुत्वं भट्टा-
न्वार्य्येणाभिहितत्तदसमञ्जसं महानसीयत्वविशिष्टवह्नित्वस्य वह्नित्वा
नतिरिक्ततया वह्नित्वविषयकज्ञानस्य तद्विषयकत्वनियमेन महानसी-
यवह्न्यभावभदायाव्याप्तेस्तल्लक्षणस्य दुष्टतया तदवधिकगुरुत्वस्यादोष
त्वात्पर्य्याप्तिघटितनिवेशश्चात्राशक्य एव तथाहि तादृशप्रतियोगिता-
वच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिविषयता-
शून्यप्रतीतिविषयतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वं साध्य-
तावच्छेदकगतरूपे विवक्षणीयं तत्र महासीयत्ववह्नित्वगतद्वित्ववृत्तिवि-
षयत्वस्यासम्भवात् महानसीयत्वे वह्नित्वे च विषयत्वस्यभेदान्महा-
नसीयवह्निसाध्यकव्यभिचारण्यतिव्याप्तिरव्याप्तिरेव वा महानसीय-
वह्निसाध्यकसद्धेतौ, नच यत्किञ्चिज्ज्ञाननिष्ठनिरूपितत्वसम्बन्धा-

वच्छिन्नावच्छेदकताभिन्नविषयतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितस्वनिष्ठप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वृत्तित्वम्विवक्षितमिति न दोष इति वाच्यम्ः महानसीयत्ववह्नित्वोभयमात्रविषयकज्ञानासम्भवात् महानसीयत्वादेर्म्महानसत्वादेर्वाऽवश्यम्भासनादितिचेदबोधविजृम्भितमेतत् । मुख्यविशेष्यतानिरूपितप्रकारतात्वेनावयवतान्निवेश्योक्तरीत्या निवेशे दोषाभावात्तादृशरूपाविषयकप्रतीतिविषयत्वस्य साध्यतावच्छेदकगतरूपे निवेशे दोषाभावाच्चेति ॥ अथ प्रतियोगितावच्छेदकावच्छिन्नभेद एवोभयावृत्तिधर्म्मावच्छिन्नाप्रतियोगिकस्सामानाधिकरण्यसम्बन्धेन साध्यतावच्छेदकविशेषणमस्तु नच व्यभिचारिण्यतिव्याप्तिस्तादृशप्रतियोगितावच्छेदकावाच्छिन्नत्वसमानाधिकरणोभयावृत्तिधर्म्मावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्य्याप्तिककूटत्वावच्छिन्नवत्त्वस्य विवक्षणादेवञ्च वह्निनिष्ठतद्व्यक्तित्वावच्छिन्नभेदकूटेन प्रत्येकं सामानाधिकरण्यस्य वह्नित्वे सत्त्वेन नतद्व्यक्त्यभावमादायाव्याप्तिर्नापि च महानसीयवह्न्यभावमादाय वक्ष्यमाणाव्याप्तिरितिकिमिति नञ्व्यत्यासेन व्याख्यानुसरणमितिचेन्न धूमव्यक्तिभेदकूटेन सामानाधिकरण्यस्य प्रत्येकंधूमत्वे सत्त्वेन धूमावान्वह्नेरित्यत्रातिव्याप्तेः सत्तावाञ्जातेरित्यत्र विशिष्टसत्ताभावमादायाव्याप्तेश्च नच तादृशाभावप्रतियोगितावाच्छेदकतासमानाधिकरणावच्छेदकताकप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगिकूटत्वावच्छिन्न एव निवेश्योधूमभेदस्यापि तादृशकूटान्तर्गतत्वान्नातिव्याप्तिरव्याप्तिवारणाय चात्रापि प्रतियोगितायाम्वक्ष्यमाणोभयाभाववत्त्वान्निवेश्यमितिवाच्यम् गगनवान्तज्ज्ञानत्वादित्यत्र तद्व्यक्त्यभावमादायाव्याप्तेरिति ध्येयम् ॥ यद्यपि प्रतियोगितायाः प्रतियोगितावच्छेदकस्वरूपतया प्रतियोगिताभेद एव सध्यतावच्छेदके निवेशयितुं युक्तस्तथापि प्रतियोगितायाः प्रतियोगितदभावोभयस्वरूपत्वेऽतिरिक्तत्वे वा व्यभिचारिमात्रेतिव्याप्तिः प्रतियोगितावच्छेदकभेदनिवेश एव वारयितुंशक्येति तदुपेक्षाकृता ॥ यत्तु प्रतियोगितावच्छेदकावच्छिन्नत्वन्तादात्म्येन वाच्यं व्यभिचारिणितु साध्यवदभावमादायैव नदोष इति तत्तुच्छम् अवृत्तेरपि व्यापकत्वापत्तेः तत्तद्व्यक्तिमदभावमादायाव्याप्तेस्तादवस्थ्या-

द्विषयितया जातेः साध्यतायां जातिमद्भावद्रव्याद्यभावमादाया-
व्याप्तेश्चेति अथ भवतु प्रतियोगितावच्छेदकत्वाभावनिवेश आवश्यकः
परन्त्ववच्छेदकताया अवच्छेदकतात्वेन प्रवेशो व्यर्थ इति चेन्न प्रमे
यत्वे तादृशप्रतियोगितानिरूपिताधेयत्वस्यैव सत्त्वेन प्रमेयसाध्यकव्या-
प्तेरिति ॥ यत्तु तादृशावच्छेदकतात्वावच्छिन्ननिरूपकाभाव एव प्रवे-
श्य इति तत्तुच्छम् धूमसाध्यकाऽतिव्याप्तेः धूमत्वत्वस्वरूपाभावस्य
तादृशावच्छेदकतात्वावच्छिन्नाधेयतानिरूपकत्वेन तस्य धूमत्वे
सत्त्वात् प्रतियोगितानिरूपितत्वेनाभावप्रवेशोपि प्रमेयत्वावच्छिन्ना-
धेयत्वस्य प्रतियोगितानिरूपितस्य साध्यतावच्छेदकमात्रे सत्त्वेनाति-
व्याप्त्या हेयः नच प्रतियोगितानिरूपकत्वेनाभावः प्रवेश्य इति वा-
च्यम् प्रतियोगितवच्छेदकत्वयोः परस्परनिरूप्यनिरूपकभावेनाव-
च्छेदत्वसाध्यकव्यभिचारण्यतिप्रसङ्गादिति ॥ यद्यपीत्यादि अत्र
सामान्याभावस्य साधयिष्यमाणतया विशेषाभावकूटातिरिक्तसा-
मान्याभावस्य सिद्धत्वेन महानसीयवह्न्यभावस्येत्यपहाय महानसी-
यवह्निर्नास्तीतिप्रतीतिसिद्धस्येत्युक्तम् तथाच सामान्याभावोऽति
रिच्यतास्माबोभयथाप्युक्तप्रतीतौ महानसीवह्निमत्ताबुद्धिविरोधि
त्याम्प्रतियोग्यंशे भासमानमहानसीयवह्नित्वावच्छिन्नप्रतियोगिता-
काभावत्वेनैवाभावस्य भासमानतया तद्विषयाभावस्य हेतुसमानधि-
करणस्य प्रतियोगितावच्छेदकतायाः कथञ्चिदपि न वह्नित्वे क्षतिरिति-
भावः॥ ननु निरवच्छिन्नावच्छेदकतानिरूपितत्वमग्रेविवक्षणीयन्तदेव-
सावच्छिन्नावच्छेदकत्वानिरूपितत्वरूपम्वाच्यन्तावतैवोक्ताभावमादा
य न दोषः ॥ सावच्छिन्नसाध्यतावच्छेदकस्थलीयलक्षणेऽपि वक्ष्य-
माणं साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नावच्छेकताकत्वन्ता-
दृशावच्छिन्नावच्छेदकत्वानिरुपितत्वात्मकमेव विवक्षणीयन्तथाच व-
ह्नित्वाश्रयवान्धूमादित्यत्र नाव्याप्तिः अत एव महानसीयवृत्तित्ववि-
शिष्टजातिमद्वह्नित्ववन्नास्तीतिप्रतीतिकाभावमादाय साध्यतावच्छे-
दकतदितरोभयानवच्छिन्नत्वादिविशेषणसत्त्वेप्यव्याप्तिरिति निरस्त-
मिति चेन्न निरवच्छिन्नसाध्यतावच्छेदकस्थलीयलक्षणे माहानसी-
यवह्निमान्धूमादित्यत्रातिव्याप्तेरुक्तानिरूपितत्वस्य विवक्षितुमशक्य-
त्वात् अत्यन्ताभावस्य त्रितयप्रतियोगिकत्वमते गोत्ववान् कालत्वादि-
त्यत्र सृष्टिकालवृत्तित्वविशिष्टघटत्वाद्यभावस्यैव प्रतियोगिव्यधिकर-

णतया तत्प्रतियोगितायामुक्तानिरूपितत्वविरहेणाव्याप्तस्सावच्छिन्ना- वच्छेदकत्वकसाध्यतास्थलीयेऽप्युक्तानिरूपितत्वस्य साध्यतावच्छेद- कनिष्ठोक्तावच्छेदकत्वानिरूपितत्वरूपस्यैव विवक्षणीयत्वादिति । इद- मत्रावधेयम् । यत्कचिदत्यान्ताभास्य त्रितयप्रतियोगिकत्वमुक्तन्त- त्प्रतियोगिवत्प्रागभावध्वंसयोरत्यन्ताभावविरोधित्वेनोपचारिचतप्रति- योगित्वनिवन्धनन्तयोर्मुख्यप्रतियोगित्वेऽपि घटनिष्ठप्रतियोगित्वा- त्तदतिरिच्यतामभावाऽवच्छेदकन्तु घटत्वमेव ध्वंसत्वाद्यनुपस्थिता- वप्यभावबुद्ध्युत्पत्तेः एवं च घटव्यक्त्यभावस्य प्रतियोगिवैयधिक- रण्यं न दुर्लभम् अस्तु वा घटाद्यत्यन्ताभावबुद्धावभावांशे घटस्य घट- त्वावच्छिन्नप्रतियोगित्वघटध्वसप्रागभावत्वावच्छिन्नप्रतियोगित्वैरेव भानं ध्वंसत्वादीनाम्प्रतियोगितावच्छेदकत्वेऽपिहि विशेषणतानवच्छे- दकत्वादेव न तद्बुद्ध्यपेक्षा तथाप्यभावाघटितनिरुक्तौ घटत्वावच्छि- न्नप्रतियोगित्वस्य तादृशत्वसम्भवेन न दोषावसर इति । यतु तार्ण- वह्न्यभावमादायैवाव्याप्तिरतएवादिपदमप्युपात्तमर्थवदिति । ततुच्छम् वह्नित्वादिसाङ्कर्येण तार्णवह्नितादितरसाधारणतार्णत्वजातेरभावात् । वह्निवैजात्यस्य तार्णत्वस्य प्रतियोगिप्रकारत्वे तन्मात्रस्यैवावच्छेदकत्वा- दिति यदिच साङ्कर्यं न जातिवाधकं गुरुधर्म्मस्य प्रतियोगितावच्छे- दकत्वमिदानीमभिमतन्तदेदमपि साधेत्रवेति मन्तव्यम् । परेतु गो- त्वेनेमज्ञानामीत्यनुव्यवसायान्यथानुपपत्त्योल्लिख्यमानजातेस्समवा- यान्यसम्बन्धेन स्वरूपातोभानस्य व्यवस्थापितत्वेन कालिकेन गुण- त्वविशिष्टरूपाभावमादाय गुणवान्वायुत्वादित्यत्राव्याप्तिरादिपदग्रा- ह्या । नह्युक्ताभावप्रतियोगितावच्छेदकत्वं रूपत्वमात्रे संम्भवति ज- लीयपरमाणौ तत्प्रतीत्यनुपपत्तेरित्याहुः ॥ अथैवमपि महानसीयत्व- व्यवहारस्य रूपादिसाधारणत्वेन कालिकाद्यन्यसम्बन्धेन महानस वृत्तित्वस्यैव महानसीयत्वरुपतया तदवच्छेदकतायां साध्यतावच्छे- दकताघटकसम्भबन्धावच्छिन्नत्वविरहात्कथमव्याप्तिः । न च वह्नित्व- निष्ठावच्छेदकतायान्तत्सत्त्वमितिवाच्यम् । साध्यतावच्छेदकताघट- कसम्बन्धातिरिक्तसम्बन्धावच्छिन्नावच्छेदकत्वानिरूपितत्वस्यैव वि- वक्षणीयत्वादतएव तादात्म्येन जलसाध्यकसद्धेतौ कालिकेन जलत्व- विशिष्टत्वे सति समवायेन जजत्वविशिष्टाभावमादाय नाव्याप्तिः । नच वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यकस्थलेऽव्याप्तिवार-

णायातिरिक्तसम्बन्धावच्छिन्नावच्छेदकतायां साध्यतावच्छेदकनिष्ठत्वस्य वाच्यतया महानसीयवह्न्यभावमादायाव्याप्तिसम्भव इति वाच्यमुक्तावच्छेदकतानिरूपितत्वस्वनिरूपितावच्छेदकतावत्त्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकवृत्तित्वोभयाभावस्यैव तद्वारणाय वाच्यत्वादिति चेन्नैवं तत्सम्बन्धावच्छिन्नवृत्तितायास्तत्सम्बन्धरूपतया वह्निनिष्ठमहानसीयत्वस्य वह्निनिष्ठतत्संयोगरूपत्वे तदवच्छेदकतायाः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वादुक्तपरिष्कारेऽपि दोषसम्भवादेवञ्च साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वेऽवच्छेदकताधर्मिकसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्वक्ष्यमाणरीत्या परिष्कृतमपि साध्वेव नच तादात्म्येन जलसाध्यकाव्याप्तिरनुपदोक्ता तत्र दोष इति वाच्यमुभयानवच्छिन्नत्वनिवेश एव हि तद्दोषवारणम्व्यक्तीभविष्यति ॥ अव्याप्तितादवस्थ्यमिति यद्यपि सर्वत्र सद्धेताबुभयाभावादिकमादायाव्याप्तिसम्भवेनाव्याप्त्यभिधानमनुचितं तत्तथापि यथाश्रुते तादात्म्येन तद्रूपसाध्यकसद्धेतावव्याप्त्यभावात्समाधेयम् ॥ केचित्तु घटत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्ववत्तासम्बन्धेन सद्धेतौ घटाभावान्याभावस्य प्रतियो॰वैयधिकरण्यविरहेणाव्याप्त्यसंभवादव्याप्त्यभिधानमेवोचितमित्याहुः नच तादृशावच्छेदकतेत्यादि अयमाशयः साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपावच्छेदेन तादृशप्रतियोगितावच्छेदकतात्वावच्छिन्नाभावोविवक्षणीयः तथाच महानसीयवह्न्यभावप्रतियोगितावच्छेदकतायाः प्रत्येकमव्यासज्यवृत्तित्वेऽपि तादृशावच्छेदकतात्वेन व्यासज्यवृत्तितया तदवच्छिन्नाभावस्यैकत्वावच्छेदेन वह्नित्वे सत्त्वेनाव्याप्तिः महानसीयवह्न्यभावप्रतियोगितावच्छेदकता त्वावच्छिन्नाभावस्यैकत्वावच्छेदेन वह्नित्वादौ सत्त्वेऽपि स्वप्रतियोगितावच्छेदकावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकधर्म्मावच्छेदेन सत्त्वायोगात् महानसीयवह्निमान्धूमादित्यत्र नातिव्याप्तिरिति ॥ * ॥ प्रत्येकमुभयत्त्वेति एतच्चावच्छेदकत्वनिरुक्तौ विवेचयिष्यामः तथाचैकत्वावच्छेदेनापि तादृशाभावस्य वह्नित्वादावसत्त्वेनाव्याप्तितादवस्थ्यमितिभावः नन्वेवं तादृशावच्छेदकतात्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेद एव निवेश्यः व्यासज्यवृत्तिधर्म्मावच्छिन्नप्रतियोगिताकभेदस्य केवलात्वयित्वात्क-

धमन्यथाऽयमेको न द्वाविति प्रतीतिः गदाधरभट्टाचार्य्येण निवेशितम पि तथैवेति चेन्न तर्कालङ्कारमते अत्यन्ताभावस्यैव भेदस्यापीदंत्वावच्छे- देन प्रत्येकेऽनभ्युपगमात् अन्यथा यः प्रत्येकमात्रवृत्तिधर्म्मावच्छेदेन यदभाववान्स उभयत्वावच्छेदेन तदभाववानिति व्याप्तेरुभयत्वावच्छे- देन तत्सत्त्वापत्त्येमौ नद्वाविति प्रतीत्यापत्तेः नचायं न द्वावित्यस्य कथं प्रमाण्यं शुद्धपर्य्याप्तिसम्बन्धेन द्वित्ववद्भेदस्य सत्त्वायोगादिदन्त्वा- वच्छेद्यपर्य्याप्तिसम्बन्धावच्छिन्नद्वित्वनिष्ठावच्छेदकताकप्रतियोगिता- कभेदस्याप्रसिद्धेः द्वित्वस्य धर्म्युपसर्ज्जनत्वादनुयोगिवाचकपदो- त्तरसप्तम्यभावाच्च तत्सम्बन्धावच्छिन्नद्वित्वाभावस्य बोधयितुम शक्यत्वादिति वाच्यमुक्तनियमानुरोधेनात्यन्ताभावबोधनियमस्य स- ङ्कोचकल्पनादिति भट्टाचार्य्येण तूक्तनियमस्याप्रयोजकत्वमङ्गीकृत्वे- दन्त्वावच्छेदेन द्वित्वात्यन्ताभाववद्भेदौ स्वीकृतौ तथासतीमौनद्वा- विति प्रत्ययाप्रसङ्गात् । एवंचायं नद्वाविति प्रतीतिरपि भेदविषयिण्येवे- त्यत्यन्ताभावबोधनियमो न संकोचनीयः इति तेषां तादृशानिवेशोयुक्त इति विवेकः अथ साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगिता- वच्छेदकरूपावच्छेद्यपर्य्याप्तिसम्बन्धावच्छिन्नतादृशावच्छेदकत्वाभा- वस्य तादृशरूपावच्छेदेन निवेशे न कोपिदोष इति चेत्सत्यमत्यन्ता- भावगर्भे तत्र न दोषः भेदगर्भे तादृशनिवेशासम्भवात् कल्पद्वयसाधा- रण्यायोभयानवच्छिन्नत्वस्वक्ष्यतीत्यवधेयम् एकत्वादेः पर्याप्त्यनभ्यु- पगमे साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदके ता- दृशप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदक- त्वविवक्षाया असंभवात्सोपेक्षितेतिबोध्यम् । यद्यपि साध्यतावच्छे- दकावच्छिन्नत्वसाध्यतासमानाधिकरणभेदप्रतियोगितावच्छेदकत्वो- भयाभावनिवेशे न महानसीयवह्न्यभावमादायाव्याप्तिवारणसंभवस्त- थापि वह्निघटोभयाभावस्य सत्तासाध्यके विशिष्टसत्त्वाभावस्य च वारणसंभवेनाव्याप्त्या तत्परित्यज्यगुरुभूतमप्युभयानवच्छिन्नत्वन्त- द्वारणयाह तथापि साध्यतावच्छेदकतदितरोभयेति अथ किमुभयान- वच्छिन्नत्वमेकावच्छिन्नत्वविशिष्टापरावच्छिन्नत्वाभावः किम्बा तदु- भयनिष्ठावच्छेदकतानिरूपितत्वाभावः तादृशावच्छेदकतानिरूपित- त्वद्वयाभावो वा तत्र नाद्यः प्रमेयवद्वान्वाच्यत्वादित्यत्र घटत्वादेस्सा- ध्यतावच्छेदकत्वाद्वक्ष्यमाणरीत्या तदितरत्वाच्चेति घटाद्यभावीयप्र-

तियोगितायां स्वविशिष्टस्यैव सत्त्वेनाव्याप्त्यापत्तेः नच साध्यतावच्छेदकावच्छिन्नत्वविशिष्टसाध्यतावच्छेदकेतरावच्छिन्नत्वाभावप्रतियोगितावच्छेदकत्वस्य प्रमेयेतरावच्छिन्नत्वत्व एव कल्पनीयतया सामान्याभावस्याप्रसिद्धेः साध्यतावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतानिरुपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्नावच्छेदकतानिरुपितासती साध्यतावच्छेदकेतरत्वसमानाधिकरणावच्छेदकतानिरुपितावच्छेदकत्वनिष्ठावच्छेदकतानिरुपितनिरुपितत्वत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वावच्छिन्नानुयोगिताकपर्य्याप्तिककूटत्वावच्छिन्नवत्त्वमेव निवेशनीयन्तत्र तादृशविशिष्टाभावोहि न घटत्वावच्छिन्नत्वविशिष्टघटत्वावच्छिन्नत्वाभावो गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वेनाप्रसिद्धेः किन्तु घटत्वावच्छिन्नत्वविशिष्टपटत्वावच्छिन्नत्वाभाव एव सच घटाद्यभावप्रतियोगितास्वस्त्येवेति नाव्याप्तिरिति वाच्यङ्गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वपक्षे गत्यभावात् यत्त्ववच्छिन्नत्वस्यैकस्याभावेन प्रतियोगितानिष्ठस्यैव तस्य प्रवेशनीयतया प्रमेयसाध्यकाव्याप्तिः प्रमेयघटाद्यभावप्रतियोगितावच्छेदकत्वस्य घटत्वमात्रे कल्पनीयतया प्रमेयत्वावच्छिन्नत्वविशिष्टघटत्वाद्यवच्छिन्नत्वस्याप्रसिद्धेरिति तन्न साध्यतावच्छेदकनिष्ठावच्छेदकतायी साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यानिवेशनीयतया विषयितया प्रमेयत्ववज्ज्ञानाभावप्रतियोगितायामुभयावच्छिन्नत्वसम्भवात् नापि द्वितीयः जातिमद्वान् ज्ञानत्वादित्यत्र साध्यतावच्छेदकयत्किञ्चिज्जातिवक्ष्यमाणतदितरत्ववज्जात्यन्तरोभयनिष्ठावच्छेदकतानिरूपितत्वस्य साध्याभावप्रतियोगितायां सत्त्वेनातिव्याप्तेः । न तृतीयः प्रतियोगिनिष्ठनानाविशेष्यतानिरुपितावच्छेदकप्रकारतास्थल एवावच्छेदकताभेदस्य शक्तिवादादावुक्तत्वेन महानसीयवह्न्यभावप्रतियोगितायामुभयाभावसत्त्वादव्याप्त्यापत्तिरिति चेदुच्यते सावच्छिन्नत्व निरवच्छिन्नत्वादिविरुद्धधर्म्माध्यासेनावच्छेदकताभेदस्यैव प्रामाणिकतयोभयाभावनिवेशोनिर्दुष्ट एवेति केचित्तूभयमतसाधारण्यानुरोधेन साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वघटितविशिष्टाभावोनिवेश्यः वैशिष्ट्यं च स्वसाजात्यस्वसामानाधिकरण्योभयसम्बन्धेन एवंच घटाभावीयप्रतियोगितायां सावच्छिन्नावच्छेदकता-

निरुपितत्वविरहेण विशिष्टाभावसत्त्वान्न प्रमेयवह्नान् वाच्यत्वादित्यत्राव्याप्तिः नच वह्नित्वबद्धान्धूमादित्यत्र महानसीयवह्न्यभावमादायाव्याप्तिः प्रतियोगितानिरुपितावच्छेदकताविशिष्टान्यत्वस्य साध्यतावच्छेदकतायाम्बिवक्षितत्वात् वैशिष्ट्यं च प्रागुक्तोभयसम्बन्धेनेति अतएव पटसमवेतत्वविशिष्टाभावमादायाव्याप्तिवारणाय वक्ष्यमाणोभयानवच्छिन्नत्वस्य ध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नत्वार्थकताया आवश्यकतया घटत्ववदभावस्य लक्षणाघटकत्वात् घटाभावीयप्रतियोगितानिरूपितसावच्छिन्नावच्छेदकत्वाप्रसिद्धेः प्रमेयवत्साध्यकाव्याप्त्या प्रतियोगितानिरुपितावच्छेदकतायां महानसीयवह्न्यभावमादायाव्याप्तिम्वारयितुं सावच्छिन्नत्वनिवेशस्य कर्तुमशक्यत्वेऽपि न क्षतिरिति वदन्ति यद्यपि साध्यतावच्छेदकवृत्तिभेदप्रतियोगित्वरूपतदितरत्वस्य प्रमेयवह्नान्वाच्यत्वादित्यत्र नाप्रसिद्धिस्तथापि तथाबिवक्षणे महानसीयवह्निभिन्नवह्निमान्धूमादित्यत्रातिव्याप्तिः साध्यतावच्छेदकस्यैकस्यापरसाध्यतावच्छेदकवृत्तिभेदप्रतियोगित्वेन तदितरत्वादित्यतइतरपदस्यान्तरार्थकतामभ्युपेत्याह स्वानवच्छिन्नप्रकारतावच्छेदकेति अत्र स्वानवच्छिन्नप्रकारताश्रयत्वोक्तौ यद्यपि वह्निनिष्ठप्रकारताया वह्नित्वावच्छिन्नायास्स्वानवच्छिन्नत्वविरहेपि द्रव्यत्वावच्छिन्नायास्तथात्वेन वह्निविशिष्टवह्न्यभावमादाय वह्निमान् धूमादित्यत्र नाव्याप्तिः तथापि महानसीयवह्निमान्धूमादित्यादावतिव्याप्तिः साध्यतावच्छेदकस्यापि साध्यतावच्छेदकेतरत्वादिति प्रकारतावच्छेदकपर्य्यन्तानुधावनं स्वानवच्छिन्नत्वं च साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितत्वं तेनावच्छिन्नप्रकारतामात्रस्य प्रमेयावच्छिन्नत्वेऽपि प्रमेयसाध्यतावच्छेदकस्थले नाव्याप्तिः वैशिष्ट्यं च स्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन स्वसामानाधिकरण्योपादानान्निरवच्छिन्नावच्छेदकताद्वयनिरुपितप्रतियोगिताकाभावक्कालिकेन गुणत्वविशिष्टं रूपं नास्तीतिप्रतीतिसिद्धमादाय गुणवान्वायुत्वादित्यत्र नाव्याप्तिः यत्तु स्वसाजात्यस्वसामानाधिकरण्योभयसम्बन्धेन वैशिष्ट्य स्वाच्यमिति तन्न समवायेन वह्निर्विशिष्टस्य संयोगेन साध्यतायान्धूमे सद्धेतौ समवायेन वह्निविशिष्टमहानसीयबिशिष्टाभावमादायाव्याप्तेः अवच्छेदकभेदेनावच्छेदकताया भिन्नत्वे जातिमदभावप्रतियोगितायां घटत्वावच्छिन्नावच्छेदकताकतादृशप्रकारतावच्छेदकघटत्वावच्छिन्न-

त्वसत्त्वेन जातिमत्साध्यकव्यभिचारिण्यतिव्याप्तिवारणाय प्रकारतावच्छेदकावच्छिन्नत्वमपि प्रकारतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वमेव वाच्यं वैशिष्ट्यं च स्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन एवंचावच्छेदकभेदेनावच्छेदकताभेदाभावेऽपि तादृशप्रकारतानिरूपितावच्छिन्नावच्छेदकतावद्वह्नित्वावच्छिन्नत्वस्य महानसीयवह्न्यभावप्रतियोगितायां सत्त्वेन महानसीयवह्निमान्धूमादित्यत्रातिव्याप्तिरिति निरस्तम् स्ववृत्तित्वप्रवेशेन दोषासम्भवात् अनवच्छिन्नघटत्वनिष्ठावच्छेदकतायास्तादृशप्रकारतानिरूपिताया वैशिष्ट्यस्यानवच्छिन्नवह्नित्वनिष्ठावच्छेकतायां सत्त्वेन महानसीयवह्निमान्धूमादित्यत्रातिव्याप्तेः स्वसामानाधिकरण्यप्रवेशः अथ कालिकेन महासीयत्वविशिष्टं सत्समवायेन वह्नित्वविशिष्टं यत्र साध्यं तत्र सद्धेतावव्याप्तिः समवायेन महानसीयत्वविशिष्टस्सन् कालिकेन वह्नित्वविशिष्टो नास्तीतिप्रतीतिसिद्धाभावीयप्रतियोगितायामुक्ततादितरोभयानवच्छिन्नत्वात् एवङ्गुणत्ववद्वान्द्रव्यत्वादित्यत्र जलीयपरमाणौ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणं कालिकविशेषेण गुणत्वविशिष्टं सत्समवायेन गुणत्वविशिष्टन्नास्तीतिप्रतीतिसिद्धाभावमादायाव्याप्तिरिति नचोक्ताभावयोः प्रतियोगिवैयधिकरण्यासम्भव इति वाच्यमुक्तरीत्या साध्यतायाम्व्यभिचारिण्यतिव्याप्तेः प्रतियोगिवैयधिकरण्यस्य परिष्क्रियमाणत्वादिति चेन्न साध्यतावच्छेदकतावैशिष्ट्यस्य स्वावच्छेदकसम्बन्धावच्छिन्नत्वघटितचतुष्टयसम्बन्धेनोक्तौ दोषाभावात् एवंचोक्तसाध्यकव्यभिचारिणि साध्याभावप्रतियोगितायामुभयानवच्छिन्नत्वसम्पत्यर्थं प्रकारतावच्छेदकतावैशिष्ट्यमपि स्वावच्छेदकसम्बन्धावच्छिन्नत्वघटितचतुष्टयसम्बन्धेनैव वाच्यमिति दिक् । यद्रूपेणसाध्यतावच्छेदकस्य साध्यतावच्छेदकतेति क्वचित्पाठः अथात्र महानसीयवह्निमान्धूमादित्यत्र व्यभिचारिण्यतिव्याप्तिः वह्नित्वस्य स्वरूपत एव साध्यतावच्छेदकत्वेन तादृशप्रकारतावच्छेदकतया तदवच्छिन्नत्वस्य साध्याभावीयप्रतियोगितायां सत्त्वादिति चेन्नैतस्याप्युक्तार्थ एव तात्पर्य्यात् अत एवानवच्छिन्नावच्छिन्नसाध्यतावच्छेदकतास्थलीयलक्षणयोरैकोक्तिसम्भवः केचित्तु प्रकारतावच्छेदकनिष्ठसावच्छिन्नावच्छेदकतानिरूपितत्वमेव विवक्षणीयमिति तत्प्रतियोगितायां

सावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितत्वविरहान्नातिव्याप्तिरिति वदन्ति तदसत् गुणत्ववद्वान् वायुत्वादित्यत्र कालिकविशेषण स्वरूपतो रूपत्वविशिष्टस्य गुणत्ववतोऽभावमादायाव्याप्तेरिति ॥ वस्तुतस्तु लाघवेन साध्यतावच्छेदकानिष्ठावच्छेदकतानिरुपितत्वसाध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरुपितत्वोभयाभाव एव साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वशब्दार्थो वाच्यः वैशिष्ट्यंच प्रागुक्तचतुष्टयसम्बन्धेनेति अथ साध्यतावच्छेदकताविशिष्टान्यसमवायानिष्ठावच्छेदकतानिरूपितत्वस्य समवायावच्छिन्नवह्न्यभावप्रतियोगितायां सत्त्वेन तस्य लक्षणाघटकतया साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशोवक्ष्यमाणोऽव्यर्थः साध्यतानिरूपितावच्छेदकतात्वस्य धर्म्मनिष्ठसंसर्गनिष्ठावच्छेदकतासाधारणस्य प्रवेशात्संसर्गतायान्तादृशावच्छेदकताविशिष्टान्यत्वासम्भवेनातिव्याप्त्यप्रशक्तेर्विशिष्टान्यावच्छेदकतायां सम्बन्धावच्छिन्नत्वप्रवेशे प्रयोजनाभावात् एवंच स्वावच्छेदकसम्बन्धावच्छिन्नत्वं स्वानवच्छेदकसम्बन्धानवच्छिन्नत्वरूपं वाच्यमन्यथातिव्याप्तेः नच समवायस्यापि परम्परया साध्यतावच्छेदकत्वमेवेतिवाच्यं महानसीयकालीनवह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादायाव्याप्तेस्साक्षात्साध्यतानिरूपितत्वस्यैव प्रवेश्यत्वात् नच तत्र कालीनत्वरूपं साध्यतावच्छेदकमनवच्छेदकन्तादृशप्रतियोगिताया इति नाव्याप्तिरिति वाच्यम् घटवृत्तिरूपविशिष्टस्य संयोगेन साध्यतायान्तद्भूतलत्वे रूपवद्घटवृत्त्यभावमादायाव्याप्तेः घटवृत्तितात्वेन घटवृत्तितामात्रस्य परम्परावच्छेदकत्वात् । एवञ्च विशिष्टान्यावच्छेदकतानिरूपितत्वमपि साक्षादेव ग्राह्यमन्यथामहानसीयवह्निवृत्तित्वविशिष्टजातिमत्साध्यकव्यभिचारिण्यतिव्याप्तिरिति चेन्न संयोगिनः कालिकेन साध्यतायां स्पन्दत्वे सय्योगिन स्सय्योगेनाभावमादायाव्याप्तेर्वारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेश्यत्वात् यत्त्ववच्छेदकभेदेनावच्छेदकताया भेदे सत्त्वद्रव्यत्वादिनिष्ठावच्छेदकतायाभिबशिष्टान्यत्वसम्भवेन महानसीयवह्निवृत्तित्वविशिष्टजातिमदभावमादायाव्याप्त्यसम्भवान्निरवच्छिन्नत्वनिवेशोव्यर्थ इति तत्तुच्छम् महानसीयवृत्तित्वविशिष्टवह्नित्ववदभावमादायाव्याप्तेर्दुरुद्धरतया तन्निवेशावस्यकत्वात् अवच्छेदकतादेरवच्छेदकरूपतायामेव भेदसम्भ-

वेन तस्य चासिद्धान्ततया यथाश्रुतेऽपि निर्वाहसम्भवाच्चेति ॥ * ॥
अथ साध्यवद्वृत्त्यभावीयत्वसाध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभाव एव प्रतियोगिताविशेषणमस्तु किंप्रकृतोभयाभावनिवेशनेन एवञ्चावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वं निरवच्छिन्नत्वादिकं च प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं च न निवेश्यं प्रयोजनानुपलम्भात् प्रतियोगिवैयधिकरण्यञ्च प्रतियोगितावच्छेदकसम्बन्धेन ग्राह्यं नातः कालिकेन महानसीयवह्न्यभावमादायाव्याप्तिः नवा स्वरूपाधेयत्वान्यतरसम्बन्धेन वह्निसाध्यकवह्नित्वे साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकत्वाभावस्य प्रतियोगिवैयधिकरण्यविरहेऽप्यव्याप्तिः साध्यतावच्छेदकताभेदस्य प्रतियोगिवैयधिकरण्यसम्भवात्।नचावच्छेदकताया अवच्छेदकस्वरूपतानये तादात्म्येन प्रमेयविशिष्टस्य तादात्म्येन साध्यतायां घटत्वविशिष्टे घटत्वे वा प्रमेयावच्छिन्नसाध्यतानिरूपितावच्छेदकतात्वे सद्धेतौ साध्यतानिरूपितावच्छेदकत्वाभावस्य प्रतियोगितावच्छेदकसम्बन्धमात्रेणैव स्वप्रतियोग्यधिकरणहेत्वधिकरणवृत्तित्वादतिव्याप्तिरिति वाच्यम्। साध्यतावच्छेदकतात्वनिष्ठावच्छेदकतायां स्वरूपसम्बन्धावच्छिन्नत्वनिवेशे प्रयोजनविरहेण विषयितया साध्यतावच्छेदकतात्वविशिष्टाभावस्य प्रतियोगिवैयधिकरण्यसम्भवात्। स्ववृत्तिभेदीयघटत्वावच्छिन्नप्रतियोगितासम्बन्धेन पटसाध्यकघटत्वहेतावपि साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकत्वाभावस्य प्रतियोगिवैयधिकरण्यविरहेऽपि प्रतियोगितावच्छेदकस्वरूपेण तत्सम्भवः। केचित्त्वत्राभाववान्वाच्यत्वादित्यत्र गुणाभावाभावं गुणाधिकरणत्वात्मकाभावञ्चादायाव्याप्त्या स्वरूपसंयोगसमवायैः प्रत्येकं घटत्वाभावस्य कालिकेन योभावस्तस्य स्वरूपेण साध्यतायां वाच्यत्वे व्यभिचारिणि साध्याभावस्य घटत्वाभावात्मकस्य स्वरूपेणात्मवृत्तित्वादतिव्याप्त्या स्वरूपसमवायसंयोगान्यतमेनोक्तसाध्यकात्मत्वे सद्धेतौ साध्यवत्ताबुद्धिविरोधिताघटकेन कालिकेन साध्यवद्वृत्तित्वाप्रसिद्ध्या जात्यभावसाध्यकसद्धेतौ साध्यवन्निरूपितवृत्तित्वाप्रसिद्ध्याचाव्याप्त्या साध्यवत्ताबुद्धिविरोधिताघटकसम्बन्धेन च साध्यवद्वृत्तित्वस्य विवक्षितुमशक्यतया स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसम्बन्धेन तद्वाच्यमिति

जात्यभावाभावप्रतियोगिमत्ताग्रहाविरोधिताघटकसमवायेन साध्यवद्वृत्तित्वाप्रसिद्ध्याऽभावान्तरमादाय जात्यभाववान्वाच्यत्वादित्यत्रातिव्याप्तिरिति वदन्ति तदसत् साध्यवद्व्यक्तिकिञ्चिन्निरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वाभाववत्स्वप्रतियोगिमत्ताग्रहाविरोधिताघटकसम्बन्धावच्छिन्नाधिकरणत्वानिरूपकत्वस्य विवक्षितत्वात् वस्तुतस्तु स्वपदमत्र न लक्षणघटकाभावपरं किन्तु साध्यवद्वृत्त्यभावपरमिति यथाश्रुत एव हि न दोषस्य सम्भव इति यत्तु कपिसंयोगाभावस्य तद्व्यक्त्यभावस्य च साध्यवद्वृत्तित्वेन लक्षणाघटकतया प्रतियोगिवैयधिकरण्यमनवच्छेदकत्वं च नानुसरणीयम् इति तत्तुच्छम् । अव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वपक्षेऽपि शुद्धस्वरूपेण तादृशेन संयोगाभावस्य साध्यवद्वृत्तितया संयोगी सत्त्वादित्यत्रातिव्याप्तेर्वारणाय निरवच्छिन्नत्वविशेषिततादृशसम्बन्धेनैव साध्यवद्वृत्तित्वस्य वाच्यत्वादव्याप्तेः नच गुणावृत्तित्वावच्छिन्नाभावस्य साध्यवद्वृत्तित्वविरहादतिव्याप्तिविरहेण निरवच्छिन्नत्वन्न विशेषणमितिवाच्यं सम्बन्धविशेषावच्छिन्नत्वस्याविशेषणत्वे स्ववृत्तिभेदीयवह्नित्वावच्छिन्नप्रतियोगितास्वरूपान्यतरसम्बन्धेन साध्यतावच्छेदकतात्वविशिष्टस्य समवायेनाभावमादाय वह्निमान्धूमादित्यादावव्याप्त्यापत्तिरित्यनवच्छेदकत्वानुसरणस्यावश्यकतया गुणावृत्तित्वावच्छिन्नाभावमादायातिव्याप्तिवारणासम्भवात् यदि च परंपरासम्बन्धेन संयोगत्वविशिष्टाभावं व्याप्यवृत्तिमादाय नातिव्याप्तिरित्युच्यते तदा सम्बन्धविशेषेण हेतुसामानाधिकरण्यस्य वाच्यतया यथासन्निवेशे, न प्रतियोगिवैयधिकरण्यस्य वैयर्थ्यमिति गृहाण एतेन संयोगसाध्यकव्यभिचारिण्यतिव्याप्तिवारणाय स्वप्रतियोगिमत्ताबुद्धिविरोधिताघटकसम्बन्धस्य निरवच्छिन्नत्वविशेषितत्वे तद्वृक्षवृत्तिकपिसंयोगाभावेतद्वृक्षवृत्तिकपिसंयोगाभावान्यतरस्य निरवच्छिन्नस्वरूपेण साध्यतायां वृक्षत्वे सद्धेतौ प्रत्येकाभावमादायाव्याप्तिवारणायानवच्छेदकत्वानुसरणं सति च तस्मिन्नतिव्याप्तिवारणाय निरवच्छिन्नत्वस्य विशेषणत्वमित्यन्योन्याश्रयोऽप्यपास्तः साध्यवद्वृत्त्यभावीयत्वञ्च साध्यवन्निरूपितवृत्तित्वावच्छेदकानुयोगिताविशिष्टत्वं वाच्यं तेन विशिष्टसत्ताभाववाञ्जातेरित्यादौ नातिव्याप्तिः वैशिष्ट्यञ्च स्वनिरूपितत्वस्वनिष्ठानुयोगित्वानिरूपितत्वोभयसम्बन्धेन तेन साध्यवन्निरू-

पितवृत्तितावच्छेदकसंयोगसम्बन्धावच्छिन्नवाच्यत्वाभावस्य साध्याभावरूपत्वेऽपि संयोगसम्बन्धावच्छिन्नवाच्यत्वाभावभिन्नं वाच्यत्वादित्यत्र नातिव्याप्तिरिति चेन्नैवमवच्छेदकतावान् वाच्यत्वादित्यत्र साध्यतानिरूपितावच्छेदकत्वाभवीयतादृशप्रतियोगितावच्छेदकस्य साध्यतावच्छेदके सत्त्वेनाव्याप्तेरेतेन आध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितकल्पे स्ववृत्तिभेदीयघटत्वावच्छिन्नप्रतियोगितासम्बन्धेन पटसाध्यकघटत्वे साध्यतावच्छेदकत्वाभावस्य प्रतियोगिवैयधिकरण्यविरहेणाव्याप्तिवारणाय निरुक्तोभयाभाववत्प्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकः प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदवकत्वाभावो विवक्षणीयः। तथा च घटाभावस्यैव प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावत्वान्न दोषः। एवं स्थलान्तरेऽपीत्यपि निरस्तम्। अथ प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यं वाच्यन्तादृशोभयाभाववत्प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकत्वाभावश्च साध्यतावच्छेतात्वानवच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको विवक्षणीयः। तथाच साध्यतावच्छेदकत्वाभावप्रतियोगितावच्छेरकत्वस्योक्तसम्बन्धव्याधिकरणत्वेन तेन सम्बन्धेन तद्भावस्य केवलान्वयित्वेन न काप्यव्याप्तिसम्भावना। अत्र साध्यतावच्छेदकतात्वानवच्छिन्नत्वं प्रकृतसाध्यघटितमन्यथा सम्बन्धकोटिप्रविष्टे तत्र तदनिवेशे घटत्वावच्छिन्नसाध्यतावच्छेदकत्वसाध्यकवाच्यत्वेऽतिप्रसङ्गात्। साध्याभावप्रतियोगिताया अवच्छेदकस्योक्तसम्बन्धव्याधिकरणत्वात् उभयाभावघटके तदनिवेशेऽवच्छेदकतावान्वाच्यत्वादित्यत्राव्याप्तेः घटत्वावच्छिन्नसाध्यतावच्छेदकत्वाभावप्रतियोगितावच्छेदकत्वस्योक्तसम्बन्धाव्यधिकरणत्वात्। प्रकृतसाध्यतावच्छेदकनिष्ठावच्छेदकतात्वानवच्छिन्नत्वमपि न वाच्यं घटत्वनिष्ठावच्छेदकत्वे साध्ये घटत्वस्यापि साध्यतावच्छेदकतया साध्याभावप्रतियोगितायां तादृशावच्छेदकतात्वानवच्छिन्नत्वविरहादतिव्याप्तेस्सम्बन्धकोटौ तदप्रवेशेऽवच्छेदकतासाध्यके सद्धेतौ अवच्छेदकतात्वनिष्ठावच्छेदकत्वाभावमादायाऽव्याप्तिवारणायोभयाभावकोटावप्यप्रवेश्यत्वादिति एवंच साध्यतावच्छेदकत्वोभयाभावमादायाव्याप्तेरसम्भ-

वेन पूर्वकल्पवत्साध्यतावच्छेदकतात्वानवच्छिन्नत्वं साध्यतावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वरूपन्नात्र वाच्यमिति चेदुच्यते वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वाभावपक्षे साध्यतावच्छेदकवृत्त्यनियामकसम्बन्धेन साध्याधिकरणे सम्बन्धान्तरावच्छिन्नसाध्याभावमात्रस्य यत्र स्ववृत्तिभेदीयतत्परमाणुत्वावच्छिन्नं प्रतियोगित्वसम्बन्धेनैतत्परमाणुसाध्यकपरमाणुत्वे हेतौ व्यभिचारिणि वृत्तित्वं तत्रातिव्याप्तिरत्र कल्पे दुरुद्धरा सिद्धान्ते त्वतिव्याप्तिशङ्कानेति यदि च गगनादेस्स्वरूपेण वृत्तिमत्त्वपक्षे प्रतियोगिताधर्म्मिकोभयाभावघटितलक्षणस्य वक्ष्यमाणत्वेन तत्र वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छदकताया अभ्युपगन्तव्यत्वादवच्छेदकताधर्म्मिकोभयाभावस्य वा विवक्षणीयत्वादत्रापि वृत्त्यनियामकस्य प्रतियोगितावच्छेदकत्वमङ्गीकार्यं प्रतियोगितावच्छेदकतायां साध्यवद्वृत्त्यभावीयप्रतियोगितानिरूपितत्वसाध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभाववत्त्वं साध्यतावच्छेदकतात्वानवच्छिन्नावच्छेदकतावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नतदवच्छेदकत्वाभाववत्त्वं साध्यतावच्छेदके प्रतियोगिकावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानाधिकरणत्वघटितं प्रतियोगिवैयधिकरण्यं च वा विवक्षणीयन्न हि महानसीयवह्निमदभावमादायाव्याप्तिवारणायावच्छेदकतायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वं समवायेनवह्निमदभावमादायाव्याप्तिवारणाय साध्यतावच्छेकावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभाववत्त्वम्वा विवक्षणीयमिति विभाव्यते । तदापि गगनादेरवृत्तित्वपक्षीयप्रतियोगितानवच्छेदकसाध्यतावच्छेदकघटितयथाश्रुते तदितरोभयानवच्छिन्नत्वमेव प्रतियोगिताविशेषणं वक्तुमुचितमणुरपि विशेषोध्यवसायकर इति न्यायात् । ननु गगनादेः स्वरूपेण वृत्तित्वपक्षे किमित्यतिलघुभूतस्य साध्यतावच्छेदकतात्वानवच्छिन्नत्वघटितस्यानुपदोक्तस्य न लक्षणत्वमिति चेत्तस्य लक्षणत्वन्तु न वारयामः सद्धेतोः किन्त्वनुमित्यनुकूलव्याप्तित्वन्तथा सति प्रकृतानुमितित्वानवच्छिन्नत्वघटितोभयाभावस्य साध्यतात्वानवच्छिन्नत्वघटितोभयाभावस्य साध्यतानिरूपितसंसर्गत्वतदवच्छेदकत्वतत्त्वाद्यनवच्छिन्नत्वघटितोभयाभावस्य साध्यतावच्छेदकावच्छिन्नप्रकारतात्वाद्यनवच्छिन्नत्वघटितोभयाभावस्य च व्याप्तिघ-

टकत्वं स्याद्विनिगमकाभावात् । साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वस्यैव तथात्वे किं विनिगमकमिति चेत्तद्घटकपदार्थोपस्थितेः क्लृप्तत्वमक्लेशकल्पत्वम्वा प्रकृतानुमितेः पूर्वं प्रकृतानुमितितद्विधेयत्वादेश्चोपस्थिति र्न सर्वेषां क्लृप्ता नाप्यक्लेशेन कल्पनीयेतिगृहाण । एतेन वृत्त्यनियामकसम्बन्धसाध्यतावच्छेदकव्यभिचारिणि साध्यतावच्छेदकसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसम्बन्धितात्त्वान्यतरविशिष्टाभावमादायातिप्रशक्त्यभावेऽपि न क्षतिः । एवं सामान्यधर्म्मावच्छिन्नाधिकरणत्वास्वीकारे साध्यवत्त्वस्य पारिभाषिकस्य वक्तव्यतया लाघवाभावोऽप्यत्र दोषः । विशेषरूपेण संसर्गत्वानभ्युपगमे निवेशासम्भोऽपि चेत्यलम्पल्लवितेन ॥*॥ अत एव परिष्कृतसाध्यतावच्छेदकातिरिक्तधर्म्मानवच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठप्रतियोगिताकाभावविवक्षापि हेया । अत एव साध्यवद्वृत्त्यभावीयत्वयत्किञ्चित्साध्यतावच्छेदकावृत्तित्वोभयाभाववत्त्वम्प्रतियोगिताविशेषणमस्तु प्रतियोगिवैयाधिकरण्यं चात्र प्रतियोगितावच्छेदकसम्बन्धेनैवग्राह्यं नातस्तादात्म्यसमवायानातरसम्बन्धेन वह्निसाध्यकवह्नित्वेसद्धेतौ साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकाभावस्य प्रतियोगिवैयधिकरण्यविरहेऽप्यव्याप्तिः नच वह्निमतस्तादात्म्येन साध्यतायां धूमे वह्निमद्वृत्त्यभावमादायाव्याप्तिरिति वाच्यं तादृशोभयाभाववत्प्रतियोगितावच्छेदकत्वाभावस्य स्वघटकप्रतियोगितावृत्त्युभयाभावीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्साध्यतावच्छेदकावृत्तिप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य विवक्षितत्वात् । एवं च साध्यतावच्छेदकातिरिक्तवृत्तित्वविवक्षामन्तरेणापि साध्यसाध्यतावच्छेदकोभयाभावप्रयुक्ताव्याप्त्यसम्भवः । साध्यतावच्छेदके सम्बन्धघटके तादृशावच्छेदकतावत्त्वविशेषणात्तादात्म्येन प्रमेयवत्साध्यके नाव्याप्तिरित्यप्यपास्तम् । यत्त्वत्र धूमविशिष्टधूमस्य साध्यतायाम्व्यभिचारिरिणि साध्याभावप्रतियोगितावच्छेदकत्वाभावस्य केवलान्वयित्वेनातिव्याप्तिरपि दोष इति तन्न विषयितास्वरूपान्यतरसम्बन्धेन प्रागुक्तान्यतरवदभावमादाय वारणसम्भवात् । अतएव साध्यवद्वृत्त्यभावीयत्वजगद्धि-

रूपितवृत्तितानवच्छेदकानुयोगितानिरूपितत्वोभयाभावएव विवक्षणीयः लाघवात् नचाभाव एव साध्यवद्वृत्तित्वजगद्वृत्तिभिन्नत्वोभयाभावो विशेषणमस्त्विति वाच्यमभावस्याधिकरणरूपतापक्षे महानसीयवह्न्यभावादीनामपि गगनाभावरूपत्वादव्याप्तेरन्यथैष्यतामबा तदेव प्रतियोगिवैयधिकरण्यं चात्र प्रतियोगितावच्छेदकसम्बन्धेनैव वाच्यं स्ववृत्तिवाच्यत्ववत्त्वसम्बन्धेन पटसाध्यकस्थले स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावङ्केवलान्वयिनमादाय लक्षणसङ्गतिरालोचनीया, नच वह्निगगनोभयाभावस्य विषयितया वह्नित्वविशिष्टस्य स्वरूपेणाभावस्य महानसीयवह्निवृत्तित्वविशिष्टजातिमतस्स्वरूपेणाभावस्य स्वरूपेण वह्न्यभावस्य च केवलान्वयितयाऽव्याप्तिरिति वाच्यं तादृशप्रतियोगितावच्छेदकत्वाभावस्य जगन्निरूपितवृत्तितानवच्छेदकानुयोगितानिरूपितप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य विवक्षितत्वादित्यपि निरस्तम् । अत एव साध्यवद्वृत्तित्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वोभयाभावो विवक्षणीयः प्रतियोगिव्यधिकरणाभावमात्रस्य प्रमेयरूपसाध्यप्रतियोगिकत्वादव्याप्तेस्साध्यतावच्छेदकावच्छिन्नेति न च प्रमेयवद्वाच्यत्वादित्यत्राव्याप्तिः प्रतियोगिव्यधिकरणाभावीयप्रतियोगितामात्रस्यैव प्रमेयावच्छिन्नत्वादिति वाच्यं । साध्यतावच्छेदकताव्यापकतावच्छेदकताकप्रतियोगिताकत्वस्य विवक्षितत्वादिति अत्र साध्यवद्वृत्त्यभावीयप्रतियोगितानिरूपितसाध्यतावच्छेदताव्यापकावच्छेदकत्वानिरूपितप्रतियोगिताकत्वमस्य पर्यवसितार्थ इत्यपिहेयम् । केचिदत्र गुरुधर्मस्य प्रतियोगितावच्छेदकत्वे साध्यतावच्छेदकावच्छिन्नत्वयत्किञ्चिद्धेत्वधिकरणनिरूपितसम्बन्धितावच्छेदकावच्छिन्नत्वोभयाभाव एव प्रतियोगिताविशेषणत्वेनोपादेयो लाघवात् वृत्त्यनियामकसम्बन्धसाध्यकव्यभिचारिण्यपि सम्बन्धान्तरावच्छिन्नसाध्याभावप्रतियोगितायां व्यभिचारनिरूपकाधिकरणनिरूपितसम्बन्धितावच्छेदकावच्छिन्नत्वविरहेणोभयाभावसत्त्वान्नातिव्याप्तिः नच धूमवान्वह्नेरित्यत्र धूमत्वाच्छिन्नसंयोगेन साध्यतायामतिव्याप्तिः अयोगोलकनिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्धेरिति वाच्यं साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकावच्छि-

त्वोभयाभावस्य सम्बन्धिताविशेषणत्वात् नचैवमपि वह्नेर्विषयितया साध्यतायां वह्निविषयकवह्निविशिष्टविषयकत्वह्नित्वविशिष्टविषयकज्ञानान्यतरत्वेऽतिव्याप्तिः वह्नित्वस्य हेत्वधिकरणमात्रानिरूपितसम्बन्धितावच्छेदकत्वादिति वाच्यन्तादृशसम्बन्धितावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्य विवक्षितत्वात् वैशिष्ट्यञ्च स्वसाजात्यस्वसामानाधिकरण्योभयसम्बन्धेनेति वदन्ति तदसत् महानसीयवह्निमान्धूमादित्यत्रातिव्याप्तेः वह्नित्वस्य प्रतियोगितावच्छेदकस्य निखिलहेत्वधिकरणानिरूपितसम्बन्धितावच्छेदकत्वात् सम्बन्धितावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वनिवेशे पर्वतनिरूपितसम्बन्धितावच्छेदकातिरिक्तावच्छिन्नमहानसीयबह्न्यभावप्रतियोगितामादायाव्याप्तितादवस्थ्यापत्तेः नच सम्बन्धिताविशेषणोभयाभावघटकसाध्यतावच्छेदकावच्छिन्नत्वं च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन साध्यताविशिष्टत्वरूपम् वाच्यन्तथा सति महानसीयववह्नित्वावच्छिन्नकालिकसम्बन्धावच्छिन्नपर्वतनिरूपितसम्बन्धिताया उभयाभाववत्त्वेन नाव्याप्तिरितिवाच्यं वह्नेर्विषयितया साध्यतायां वह्निविषयकमहानासीयवह्निविषयकज्ञानान्यतरत्वेऽतिव्याप्तेः साध्याभावप्रतियोगिताया महानसीयबह्नित्वावच्छिन्नोभयाभाववत्सम्बन्धितावच्छेदकातिरिक्तानवच्छिन्नत्वात् महानसीयधूमत्वावच्छिन्नकालिकसम्बन्धावच्छिन्नसम्बन्धितामादाय धूमवान्वह्नेरित्यत्राप्यतिव्याप्तेः तन्महानसीयवह्न्यभावमादायाव्याप्तितादवस्थ्याच्च प्रतियोगितायान्तन्महानसासमानकालिकयत्किञ्चिद्धेत्वधिकरणनिरूपितसम्बन्धितावच्छेदकावच्छिन्नत्वविरहादिति इदम्पुनरिहावधेयम् विभिन्नकालीनयोरपि परम्परासम्बन्धस्वीकारेणाव्याप्तिर्न्न सम्भवति प्रागुक्तातिव्याप्तिवारणाय स्वानवच्छेदकानवच्छिन्नत्वैतत्सम्बन्धावच्छिन्नस्ववृत्तित्वोभयसम्बन्धेन तादृशसम्बन्धिताविशिष्टत्वमेव वाच्यं प्रतियोगिवैयधिकरण्यञ्च प्रतियोगितावच्छदकसम्बन्धेनैवात्र वाच्यं तथा च सम्बन्धांधर्मिकोभयाभावोवक्ष्यमाणोनादरणीयः गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वेऽपि साध्यतावच्छेदकावच्छिन्नत्वस्य पर्य्याप्तिघटितत्वाभावेन न दोषः साध्यतावच्छेदकानिष्ठावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वानिवेशे प्रयोजनाभावेन विषयितया साध्यताव-

च्छेदकाविशिष्टाभावप्रतियोगितायां तत्प्रसिद्धेश्च यत्तु साध्यताव-
च्छेदकावच्छिन्नत्वञ्च साध्याधिकरणयत्किञ्चिन्निरूपितसाध्यताव-
च्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकावच्छिन्नत्वरूपं विवक्ष-
णीयं यत्किञ्चित्त्वनिवेशात्तादात्म्येन प्रमेयसाध्यके नाव्याप्तिरिति
तत्र घटवान्नित्यज्ञानत्वादित्यत्राव्याप्तिर्दुरुद्धरा साध्यतावच्छेदक-
तदितरोभयानवच्छिन्नत्वकल्पे च प्रतियोगिताधर्मिकोभयाभावघ-
टितकल्पानुसरणे न दोष इति वेदितव्यम् यद्यपि साध्यता-
वच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपानिरूपितस्वाव-
च्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्न-
वृत्तित्वाभावोक्तरूपानिरूपितस्वरूपसम्बन्धवच्छिन्नवृत्तित्वाभावोभया-
भाववत्त्वम्प्रतियोगिताविशेषणमेकत्वादेः पर्याप्त्यनभ्युपगमे न प्र-
तिविहितन्तथापि पुनः प्रतिविधीयते वह्नेराधेयत्वपर्याप्त्यन्यतरसं-
बन्धेन साध्यतायां वह्नित्वत्वेऽव्याप्तेः वह्नित्वगतैकत्वाभावस्य प्रति-
योगिवैयधिकरण्यासम्भवात् नच प्रतियोगितावच्छेदकसम्बन्धेन
प्रतियोगिवैयधिकरण्यं वाच्यं समवायसम्बन्धावच्छिन्नवह्न्यभाव-
मादायाव्याव्याप्तेः यत्त्वेकत्वसाध्यकवाच्यत्वे साध्यतावच्छदकगतै-
कत्वाभावमादायाव्याप्तिरिति तन्न । स्वरूपेण तादृशरूपावृत्तिप्रति-
योगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभाववि-
वक्षायान्दोषाभावादिति ॥ * ॥ यत्त्वत्र प्रतियोगितायां
साध्यतावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धातिरिक्तस-
म्बन्धावच्छिन्नत्वोभयाभावनिवेशे समवायसम्बन्धावच्छिन्नवह्न्यभा-
वमादाय न दोषः नच वृत्त्यनियामकसम्बन्धसाध्यकव्यभिचारि-
ण्यतिव्याप्तिः वृत्त्यनियामकस्य प्रतियोगितानवच्छेदकत्वादिति
वाच्यं साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वयत्कि-
ञ्चिद्वृत्त्यधिकरणनिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नसम्ब-
न्धितावच्छेदकावच्छिन्नत्वोभयाभावस्य विवक्षितत्वात् नचैवम-
पि साध्यतावच्छेदकावच्छिन्नप्रतियोगिकवृत्त्यनियामकसम्बन्धसा-
ध्यकव्यभिचारिण्यतिव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्न-
त्वसाध्यत्वावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वोभयाभाव-
स्य सम्बन्धितायां निवेशनीयतया वृत्त्यनियामकसम्बन्धसाध्य-
कसद्धेतावव्याप्तिः प्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदक-

स्याप्युक्तसम्बन्धितावच्छेदकत्वादिति वाच्यं साध्यतावच्छेदकताव्यापकावच्छेदकताकत्वघटितत्रितयाभावस्य प्रतियोगिताविशेषणत्वे दोषाभावादिति वदन्ति तेऽनाकलयन्तो लाघवगौरवादिकम्पूर्वपक्षरासिका इति ध्येयम् ॥ अथ साध्यतावच्छेदकावच्छिन्नाधिकरणत्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वोभयाभाव एव हेत्वधिकरणे वक्ष्यमाणप्रतियोग्यनधिकरणत्वशब्देन विवक्षणीयः प्रतियोगितावच्छेदकावच्छिन्नत्वं च न पर्य्याप्तिघटितन्तथा च महानसीयवह्न्यभावप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नाधिकरणत्वस्य हेत्वधिकरणमात्रे सत्त्वान्नाव्याप्तिः प्रतियोगितावच्छेदकनिष्ठनिरूपकतावच्छेदकतावच्छेदकतायां साध्यतावच्छेदकतानिरूपितसंसर्गतावच्छेदकधर्म्मावच्छिन्नसंसर्गतानिरूपितत्वमेव वाच्यन्तथा सति विषयितया रूपत्ववदभावमादायापि नाव्याप्तिः संसर्गतावच्छेदकपर्य्याप्त्यनिवेशाद्वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यके नाव्याप्तिः महानसीयवह्निमान्तज्ज्ञानत्वादित्यत्र वक्ष्यमाणरीत्या वारणीयस्य महानसीयाभाववह्न्यभावावादायाव्याप्तिप्रसङ्गस्य नावकाशः प्रतियोगितावच्छेदकमहानसीयत्वाद्यवच्छिन्नमहानसीयवह्नित्वावच्छिन्ननिरूपकताकाधिकरणत्वस्य हेत्वधिकरणे सत्त्वात् प्रतियोगितावच्छेदकावच्छिन्नत्वस्य स्वव्यापकत्वसम्बन्धेन प्रतियोगितावच्छेदकतावृत्त्यवच्छेदकताकत्वार्थकत्वे वह्निमान्तज्ज्ञानत्वादित्यत्र वह्नित्वविशिष्टाभावं वह्नित्वविशिष्टसाध्यकतज्ज्ञानत्वे वह्न्यभावं चादायापि नाव्याप्त्यवकाश इति चेदत्यन्ताभावस्य त्रितयप्रतियोगिकत्वमते गोत्ववान् कालत्वादित्यत्र लक्षणघटकत्वेन सम्प्रतिपन्नस्य सृष्टिकालवृत्तित्वविशिष्टघटत्वाद्यभावस्य प्रतियोगिवैयधिकरण्यासम्भवे नाव्याप्तिरतः प्रतियोगितायामेवोभयाभावनिवेशो युक्तः नचोक्ताव्याप्तेरभावाघटितकल्पेऽसम्भवेन तत्र तन्निवेशो नोचित इति वाच्यं तद्विशेषणस्याभावघटितकल्पाभिप्रायकत्वे ग्रन्थसामञ्जस्यादिति एतेन स्वावच्छिन्नत्वस्वेतरावच्छिन्नत्वोभयसम्बन्धेन धर्म्मविशिष्टान्यत्वस्य महानसीयवह्न्यादिसाध्यकव्यभिचारिण्यतिप्रसङ्गापादकत्वेऽपि साध्यवद्वृत्त्यभावीयत्वधर्म्मविशिष्टत्वोभयाभावस्य निवेशो न कोऽपि दोषः वैशिष्ट्यं च स्वावच्छिन्नत्वस्वेतरावच्छिन्नत्वोभयसम्बन्धेनेत्यपि निरस्तम् सृष्टिकालवृत्तित्वविशिष्टघटत्वाभावप्रतियो-

गित्वस्य साध्यवद्वृत्त्यभावीयत्वधर्म्मविशिष्टत्वयोस्सत्त्वेन गोत्ववान्का-
लत्वादित्यत्राव्याप्तेरिति, अत्र च कालोघटवान्महाकालत्वादित्यत्रा-
व्याप्तेर्वारणाय प्रतियोगितावच्छेदकसाध्यतावच्छेदकान्यतरसम्बन्धा-
वच्छिन्नत्वस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वविशेषणत्वे
निरुक्तोभयाभावात्मकप्रतियोगिवैयधिकरण्यघटितलक्षणविवक्षायां
न कोपि दोषः नच स्ववृत्तिभेदीयमहाकालत्वावच्छिन्नप्रतियोगिता-
सम्बन्धेन घटसाध्यकमहाकालत्वे सद्धेतौ का गतिरिति वाच्यं
घटानुयोगिककालिकप्रतियोगित्वादिसम्बन्धावच्छिन्नप्रतियोगिताक-
महाकालाभावमादाय लक्षणसम्भवात् यदि विशेषरूपेण न संसर्ग-
त्वादिः प्रतियोगित्वादीनाम्वृत्त्यनियामकतया न प्रतियोगितावच्छेद-
कत्वमित्युच्यते तदा त्वयापि सम्बन्धधर्म्मिकप्रतियोगिताधर्म्मिको-
भयाभावघटितकल्पोऽनुसरणीयस्तत्रैवोक्तरीत्यनुसरणे विफलमेव प्र-
तिभात्युभयानवच्छिन्नत्वादिकमिति चिन्त्यम् परन्त्वत्र न पश्यामो
दूषणवेलेशमपि दीधितिव्याख्याकर्त्तुर्जगदीशस्य यदुक्तरीत्यनुसरणे
तद्ग्रन्थविरोधस्य भवति पुरःप्राप्तिः नापि दीधितिकारस्य मार्ग-
मात्रपदर्शकत्वात्तस्य प्रतियोगितातवच्छेदकत्वघटकावच्छेदकतायाः
पर्य्याप्तिविवक्षायान्तत्तात्पर्य्यस्य वक्तुं शक्यत्वात् जगदीशेन चैक-
त्वादेः पर्य्याप्त्यनभ्युपगमे शिष्यबुद्धिवैशद्याय कथञ्चिदुभयानवच्छि-
न्नत्वसरणे दर्शिततयाऽतिसूक्ष्मापराधान्वेषणेऽपि नापराध्यति सोप्या-
शयविदामिति मन्तव्यम् परे तु रूपत्ववदभावमादाय दोषासम्भवा-
दवच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वन्न नि-
वेशनीयमिति यदुक्तं तन्न युक्तं स्ववृत्तिवाच्यत्ववत्त्वसमवायोभय-
सम्बन्धेन वह्नित्वविशिष्टसाध्यकसद्धेतौ प्रतियोगिव्यधिकरणाभावा-
प्रसिद्ध्या संसर्गतावच्छेदकपर्य्याप्तेर्निवेशनीयतया वह्नित्वप्रतियो-
गिकसमवायेन वह्नित्वविशिष्टसाध्यकेऽव्याप्त्या परिष्कृतस्य तस्या-
वश्यनिवेशनीयत्वात् एवं च तदनिवेशप्रयुक्तलाघवन्दूरापेतं सामा-
न्यधर्म्मावच्छिन्नाधिकरणत्वास्वीकारे साध्यतावच्छेदकवृत्त्यभावीय-
प्रतियोगितानिरूपितपरम्परावच्छेदकत्वस्यैव साध्यतावच्छेदकाव-
च्छिन्नाधिकरणतारूपत्वं वाच्य मभावश्च स्वाश्रयवन्निष्ठाधिकरणतान-
वच्छेदकत्वाधिकरणतावच्छेदकत्वोभयाभावरूपस्तथा च क्क प्रति-
योगिताविशेषणोभयाभावापेक्षया लाघवम् एवमेकत्वादेः पर्य्याप्त्य-

नभ्युपगमपक्ष एवोक्तविशेषणस्यादरणीयतया स्वसाजात्यस्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वैतत्त्रितयसम्बन्धेन वैशिष्ट्यघटितस्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वतत्सम्बन्धावच्छिन्नस्ववृत्तित्वस्वावच्छेदकसम्बन्धावच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यताविशिष्टनिरूपकताकाधिकरणत्वस्यैव साध्यतावच्छेदकावच्छिन्नाधिकरणतात्मकत्वम्वक्तव्यन्तथा सति किं लाघवम् नचोक्तसम्बन्धैः प्रतियोगिताविशिष्टनिरूपकताकाधिकरणत्वस्य प्रतियोगिवैयधिकरण्यघटकत्वम्भवत्कल्पेऽपि वक्ष्यमाणमेवेति वाच्यमतिगुरुभूतव्यापकत्वसम्बन्धेन प्रतियोगितावच्छेदकतावृत्त्यवच्छेदकताकनिरूपकताकाधिकरणपरत्वस्याधिकस्य गौरवसम्पादकस्य युष्मत्पक्षे प्रवेशादित्याहुः तदपि केवलसाध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वमात्रनिवेशमालम्ब्य परिचिन्तितम्बोध्यम् तत्पक्षे स्थितानां दोषान्तरवारकविशेषणानामनुसन्धानेऽत्रैव लाघवम्प्रतिभाति ॥ केचित्तु नित्यज्ञानामुयोगिकत्वविशिष्टमहानसीयवह्नित्वावच्छिन्नप्रतियोगिकत्वाभाववद्विषयितासंबन्धेन घटसाध्यकनित्यज्ञानत्वे प्रतियोगिव्यधिकरणतादृशाभावत्वेनाभिमतमहानसीयवह्न्यभावप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नाधिकरणत्वस्य साध्याऽधिकरणे सत्वेनाऽव्याप्तिरिति वदन्ति तन्नातिरमणीयमुक्तरूपेण संसर्गताया इदानीमनभ्युपगमात् अन्यथोक्तसम्बन्धेन वह्नेस्साध्यतायान्नित्यज्ञानत्वे महानसीयवह्न्यभावप्रतियोगितायामुभयाभावविरहेणाव्याप्तिर्दुरुद्धरा स्यादिति। अथ बिशेषरूपेणसंसर्गताभ्युपगमस्यापि इष्टत्वेन तत्पक्षेऽनुपदोक्तस्थले सिद्धान्ते का गतिरिति चेद्दीधितिकारोक्तव्यधिकरणधर्म्मावच्छिन्नाभावखण्डनाभासग्रन्थस्थप्रतियोगितावच्छेदकतापर्य्याप्तिनिवेश एव गदाधरपरिगृहीतस्तद्वारणायालमादरणीयः एतेनोक्तोभयाभावस्य प्रतियोगिताविशेषणस्यैकत्वादेः पर्य्याप्त्यभ्युपगमानभ्युपगमोभयपक्षनिर्दुष्टतया पर्य्याप्तिघटितकल्पानुसरणङ्गदाधरभट्टाचार्य्याणामनुचितमित्यपास्तम् साध्यतावच्छेदकतदितरोययानवच्छिन्नत्वनिवेशनञ्च शिष्यबुद्धिवैशद्याय,नचैकत्वादेः पर्य्याप्त्यनभ्युपगमेन यदवच्छेदकत्वविचाररूपग्रन्थे एकत्वादेः पर्य्याप्त्यनभ्युपगमे त्वाहेत्युक्तन्तस्याभासग्रन्थत्वेन न मतनिर्णायणत्वमितिगृहाणेति दिक् इदन्तु चिन्त्यते यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेद-

कताकत्वसाध्याधिकरणयत्किञ्चिद्व्यक्तिनिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकताविशिष्टान्यावच्छेदकतावत्त्वोभयाभाववत्त्वमेव प्रतियोगिताविशेषणं वक्तव्यम् वैशिष्ट्यञ्च प्रागुक्तत्रितयसम्बन्धेन तादृशावच्छेदकतावत्ता च निरूपितत्वसम्बन्धेन तथा च वह्निमान्धूमादित्यादौ न महानसीयवह्न्यभावमादायाव्याप्तिः नवा वह्नित्वविशिष्टसाध्यकतज्ज्ञानत्वे वह्न्यभावं वह्निसाध्यकतज्ज्ञानत्वे च वह्निमदभावमादायाव्याप्तिः नापि च विषयितया रूपत्ववदभावमादायायेतितत्तद्दोषवारकविशेषणानि नोपादेयानि यद्वोक्तदोषाणां वारणाय यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकतावत्त्वसाध्यतावच्छेदकताविशिष्टान्यावच्छेदकताकत्वोभयाभाव एवोपादेयः वैशिष्ट्यञ्च प्रागुक्तत्रितयसम्बन्धेन अत्रोभयत्र व्यापकत्वप्रवेशः प्रमेयवद्वान्वाच्यत्वादित्यत्र तथाविधाभावीयतादृशप्रतियोगिताप्रसिध्यर्थः अवच्छेदकताकत्वम्विहायावच्छेदकतावत्त्वोपादानाद्विषयितया रूपत्ववदभावीयप्रतियोगितायामवच्छेदकताद्वयनिरूपितत्वविरहेऽपि न क्षतिः यत्किञ्चित्वनिवेशाच्च महानसीयवह्निघटोभयाभावीयप्रतियोगितानिरूपितवह्नित्वनिष्ठावच्छेदकतादेस्साध्यतावच्छेदकता व्यापकत्वविरहेऽपि महानसीयवह्निसाध्यकसद्धेतौ नाव्याप्तिरिति ॥ अथ महानसीयवह्निमान्तज्ज्ञानत्वादित्यत्र महानसीयाभाववह्न्यभावप्रतियोगित्वयोस्साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वेनाव्याप्तिः केचिदत्र साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकयत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तितावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकरूपावृत्तित्वं प्रतियोगितायाम्विशेषणान्तरम्प्रवेश्यन्तथाच वह्नित्वगतैकत्वमहानसीयत्वगतैकत्वयोरुक्तमहानसीयवह्नित्वावच्छिन्नवृत्तितावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकत्वान्नाव्याप्तिः नच यत्किञ्चित्वन्न निवेशनीयमिति वाच्यम् तादात्म्येन प्रमेयविषिष्टस्य साध्यतायाम्वाच्यत्वघटत्वगतैकत्वादीनान्तादृशानवच्छेदकत्वावच्छेदकत्वोभयवत्त्वेन घटाद्यभावानांलक्षणाघटकत्वात् द्वित्वस्य तादात्म्यसम्बन्धावाच्छिन्नवृत्तितावच्छेदकत्वविरहेपि तदवच्छिन्नाभावप्रतियोगित्वे निरुक्तोभयानवच्छिन्नत्वस्य तदवच्छेदकतायाम्वावक्ष्यमाणसाध्यतावच्छेदकेतरानवच्छिन्नत्वस्यासत्त्वेन तदभावानां च लक्षणाघटक-

त्वादव्याप्तेः एवं च धूमाभावीयप्रतियोगितायामयोगोलकनिरूपितवृत्तिताावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकरूपावृत्तित्वसत्त्वेन धूमवान् वह्नेरित्यत्रातिव्याप्तिविरहेपि वह्निमान्वह्निविषयकमहानसीयवह्निविषयकज्ञानान्यतरत्वेऽतिव्याप्तिः स्यादिति तादृशानवच्छेदकत्वविशेषणमिति समादधति ते च तादृशप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितानवच्छेदकत्वं साध्यतावच्छेदकगतरूपे न निवेशनीयमित्यकारणकृतप्रतिज्ञा इति जानीमहे किञ्चात्र प्रमेयवतस्तादात्म्येन साध्यतायाम्वाच्यत्वे हेत्वधिकरणनिरूपितप्रमेयावच्छिन्नवृत्तितावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकत्वस्यैव तत्तद्धर्म्मवृत्तित्वविशिष्टावच्छेदकतावच्छिन्नप्रतियोगित्वमादाय सर्वेष्वेकत्वेषु सत्त्वादवच्छेदकभेदेनावच्छेदकताभेदे तु सुतरामेवेत्यव्याप्तिः उक्तयुक्त्या द्वित्वादीनामप्यवच्छेदकत्वेन वह्निमान्धूमादित्यादावपि नच वृत्तितावच्छेदकताविशिष्टप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वम्विवक्षणीयम्वैशिष्ट्यञ्च स्वतादात्म्यस्वनिरूपितत्वान्यतरसम्बन्धेन स्वविशिष्टावच्छेदकतात्वावच्छिन्नत्वसम्बन्धेन तथा च प्रमेयत्वसहितप्रमेयगतरूप एवावच्छेदकत्वमिति नाव्याप्तिरिति वाच्यम् तथापि प्रमेयत्वघटत्वादिगतैकत्ववृत्त्यन्यतमत्वेनैवावच्छेदकत्वकल्पने दोषोभावेनाव्याप्तितादवस्थ्यात् तच्छुक्लमहानसीयवह्निमान्तज्ज्ञानत्वादित्यत्र तच्छुक्लाभावम्महानसीयवह्न्यवञ्चादायाव्याप्तेश्च तत्रशुक्लत्वगतद्वित्वादीनान्तादृशावच्छेदकताविशिष्टप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वविरहात् यदि चोक्तवृत्तिताया लाघवेन प्रमेयत्वरूपप्रमेयस्यैवावच्छेदकत्वङ्कल्पनीयमिति प्रमेयवत्साध्यकेऽव्याप्तिविरहेण वृत्तितावच्छेदकताविशिष्टप्रतियोगिता न निवेशनीया एवञ्च विषयितया वह्नित्वविशिष्टसाध्यके वह्न्यभावमादाय नाव्याप्तिरपीति विभाव्यते तदापि हेत्वधिकरणपर्वतादिनिरूपिताया घटत्वदिकालीनवाह्नित्वावच्छिन्नवृत्तितायास्स्ववृत्तिवाच्यत्ववत्त्वादिसम्बन्धेन घटत्वाद्यवच्छिन्नवृत्तितायाश्चावच्छेदकत्वस्यैव घटत्वादिषु सत्त्वेन वह्निमान्धूमादित्यादौ लक्षणासम्भवः वृत्तितायास्साक्षान्निरूपितत्वस्यावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य च प्रवेशेपि स्ववृत्तिवाच्यत्ववत्तासम्बन्धेन-

वह्नित्वविशिष्टसाध्यकधूमेऽव्याप्तिः प्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नवृत्तितावच्छेदकत्वविवक्षायाञ्च वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टस्य वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टनिरुपितविषयितया साध्यतायां तज्ज्ञानत्वे हेत्वधिकरणनिरुपितवृत्तितानिरूपितप्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्ध्याऽव्याप्तिः यदि च प्रतियोतावच्छेकताघटकसम्बन्धावच्छिन्नत्वम् न्यूनवारकमात्रमेव विवक्षणीयमुक्तस्थले समवायेनघटत्वविशिष्टाभावमादाय न दोषइत्युच्यते तदापि समवायसम्बन्धावच्छिन्नावच्छेदकताकविषयितासम्बन्धेन वह्निसाध्यकनित्यज्ञानत्वेऽव्याप्तिः शुद्धसमवायेन विशिष्टसमवायेन वा धर्म्ममात्रविशिष्टाभावस्य प्रतियोगिवैयधिकरण्यविरहात्स्वरूपादिना किञ्चिद्धर्म्मविशिष्टाभावस्य प्रतियोगिवैयधिकरण्येऽपि तत्प्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरणनिरुपितवृत्तित्वस्याप्रसिद्धेः यत्तु वह्निमान्तज्ज्ञानत्वादित्यत्र तादृशानवच्छेदकत्वविशिष्टतादृशावच्छेदकत्ववद्रूपाप्रसिध्याऽव्याप्तिरिति तन्न स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितानवच्छेदकत्वस्वकालीनयत्किञ्चिद्धेत्वधिकरणानरूपितवृत्तितावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकत्वोभयसम्बन्धेन साध्यत्वाभाववद्रूपवृत्तित्वस्य विवक्षितत्वात् यद्युक्तविषयित्वादीनां संसर्गत्व मिदानीं न स्वीकरणीयम् । केवलविषयित्वादीनां तदङ्गीक्रियते चेद्भवतामनुशासनन्नदोक्तप्रकारस्यापि सदोषत्वङ्कोनाम ब्रूयादित्युपरम्यते ॥ * ॥ येतु यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तियत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तितावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितत्वस्वाच्यम् वृत्तिता च स्वनिरूपितप्रतियोगितावच्छेदकतावत्त्वसम्बन्धेन अवच्छेदकतावत्ता च स्वसाजात्यस्वसामानाधिकरण्योभयसम्बन्धेन वैशिष्ट्यञ्च स्वसाजात्यस्वसामानधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वैतत्त्रितयसम्बन्धेन तथा च महानसीयाभावहृयभावावादाय नाव्याप्तिः उक्तोभयसम्बन्धेन वृत्तित्वोपादाने तार्णवह्निसाध्यकव्यभिचारिणि प्रतियोगितावच्छदेकतायाः प्रत्येकं यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तित्वेनातिव्याप्तिस्स्यादिति तदुपेक्षितम् सामानाधिकरण्यमात्राक्तौ प्रमेयव-

त्साध्यकेऽवच्छेदकतामात्रस्य साध्यतावच्छेदकतायां वृत्तित्वेनाव्याप्तिरतस्साजात्यप्रवेशः निरवच्छिन्नसाध्यतावच्छेदकताद्वयस्थले प्रत्येकधर्मनिष्ठनिरवच्छिन्नावच्छेदकताकप्रतियोगिताकाभावमादायाव्याप्तेर्वारणाय स्वसामानाधिकरण्येति वैशिष्ट्यघटकस्वसाजात्योपादानात् प्रमेयावच्छिन्नवृत्तितामादाय न दोषः यदि च पर्वतादिनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तितानिरूपितप्रमेयत्वावच्छिन्नाप्यवच्छेदकतावह्नित्वादिष्वेवेत्युरीक्रियते तदा तत्फलं मृग्यम् घटत्वप्रतियोगिकसमवायसम्बन्धावच्छिन्नघटत्वनिष्ठावच्छेदकतायाम्पर्वतादिनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तितावच्छेदकताघटकसम्बन्धन्यावच्छिन्नत्वविरहेण तन्निरूपकप्रतियोगितामादाय लक्षणसङ्गतौ विशेषरूपेण संर्गत्वास्वीकार एव सामानाधिकरण्यनिवेशे शरणम्बोध्यम्। स्वावच्छेदकसम्बन्धावच्छिन्नत्वन्तु स्ववृत्तिवाच्यत्वादिसम्बन्धावच्छिन्नवृत्तितावच्छेदकतामादायातिव्याप्तिवारणायोपादेयमेवेति वदन्ति तेऽपि शुद्धपटत्वावच्छिन्नाप्रतियोगिकालिकसंयोगान्यतरसम्बन्धेन घटसाध्यकमहाकालत्वे पटाभावमात्रस्यैव लक्षणघटकतया तत्प्रतियोगितायां हेत्वधिकरणनिरूपितशुक्लपटत्वावच्छिन्नवृत्तितावच्छेदकताविशिष्टयत्किञ्चित्साध्यतावच्छेदकत्वावृत्त्यच्छेदकतानिरूपितत्वस्य सत्त्वेनाव्याप्त्यापत्तेरेव निरस्ता वेदितव्या यद्युक्तदोषवारणाय हेत्वधिकरणनिरूपितवृत्तितायामेव यत्किञ्चित्त्वाम्विशेषणन्तदा मठत्वाद्यवच्छिन्नवृत्तितामादायोक्ताभावस्य लक्षणघटकत्वसम्भवेऽपि महानसीयवह्नेर्विलक्षणविषयितया स्वविशिष्टमुख्यविशेष्यताद्वयशून्यज्ञानीयविषयतावच्छेदकावच्छिन्ननिरूपितविषयितया साध्यतायाम्वह्निविषयकज्ञानमहानसीयविषयकज्ञानान्यतरत्वहेतौ वह्निविषयकज्ञानात्मकहेत्वधिकरणनिरूपितयत्किञ्चित्वृत्तितावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितत्वस्य महानसीयाभावप्रतियोगितायां वह्न्यभावप्रतियोगितायां च महानसीयविषयकज्ञानात्मकहेत्वधिकरणनिरूपितयत्किञ्चित्वृत्तितावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितत्वस्य सत्त्वेन तत्प्रतियोगित्वे आदायाव्याप्तिन्न विदन्ति तत्समुचितम्बालानामिति ॥ परेत्वत्र तादृशप्रतियोगिताविशिष्टान्यत्वयत्साध्यत्वन्तदवच्छेदकावच्छिन्नसामानाधिकरण्यम्वाच्यम्वैशिष्ट्यञ्च स्वानवच्छेदकानवच्छिन्नत्वस्वसामा-

नाधिकरण्योभयसम्बन्धेन तथा च महानसीयवह्निमान्तज्ज्ञानत्वादि-त्यत्र नाव्याप्तिरितिति वदन्ति ते च स्ववृत्तित्वघटितसम्बन्धेन वैशिष्ट्याभिधाने महानसीयवह्न्यभावस्यापि वारणसम्भवेन साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वविशेषणवैफल्यप्रशक्तेः तदनभिधानेन परिहारः स्वसाजात्यस्वमानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वैतत्त्रितयसम्बन्धेन स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वस्य वैशिष्ट्यघटकत्वाभ्युपगमे महानसीयवह्निवृत्तित्वविशिष्टजातिमदभावस्य विषयितया रूपत्ववदभावस्य च वारणसम्भवान्निरवाच्छिन्नत्वसाध्यतावच्छेकताघटकसम्बन्धावच्छिन्नत्वयोर्न्निरर्थकतान्तदनुक्त्या वारयन्तो जगदीशव्याख्यायामनुग्रहकारिण इति मन्यामहे अथोक्तविशेषणानामत्रैव तात्पर्य्यमिति चेत् साध्यतावच्छेदके तादृशप्रतियोगितानवच्छेदकत्वघटितत्वानुपपत्तिः प्रयोजनवशादिष्यत एवेति चेत्प्रकृतानुमितेः पूर्व्वं प्रकृतानुमितिविधेयतायाःप्रायसोऽनुपस्थितत्वेन तद्घटितव्याप्तेर्दुर्ग्रहतयाऽनुमितेरनुपपत्तिः व्याप्तिघटकतया वह्नित्वानुपस्थितावप्यनुमित्यापत्तिः महानसीयवह्निमान्तज्ज्ञानत्वादित्यत्र वह्निमहानसीयाभावमादाय भवद्भिरपि दोषत्वेनाधितो व्याप्तिर्दोषोऽत्रालोचनीयइति ॥ अत्र ब्रूमः सर्व्वेषान्निरवच्छिन्नत्वसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वादीनां यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकताकत्वसाध्यतावच्छेदकतात्वसामानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयाभाववत्त्व एव तात्पर्य्यं प्रतियोगितावच्छेदकता च स्वनिरूपितावच्छेदकतावत्त्वस्वनिरूपितावच्छेदकतात्वव्यापकत्वोभयसम्बन्धेन व्यापकता च स्वनिरूपितसाध्यतानिरूपितावच्छेदतावत्त्वसम्बन्धेन अवच्छेदकतावत्ता चोभयत्र प्रसिद्धचतुष्टयेषु यावदादेयन्तावद्भिः तथा च महानसीयवह्निसाध्यकस्थले प्रत्येकाभावमादाय न दोषः सम्बन्धफलन्तु पूर्व्ववदेववोध्यम् यद्वा यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकताकत्वसाध्यताविशिष्टान्यत्वोभयाभाव एव तात्पर्य्यमुक्तविषेशणनामालोचनीयम् वैशिष्ट्यञ्च स्वनिरूपितावच्छेदकताविशिष्टान्याच्छेदकत्वानिरूपितत्वस्ववृत्तित्वोभयसम्बन्धेन वृत्तित्वञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वसम्बन्धेन वैशिष्ट्य-

श्च प्रागुक्तत्रितयसम्बन्धेन एवंच महानसीयवह्निसाध्यकस्थले प्रत्येका-
भावम्विषयितया वह्नित्वविशिष्टसाध्यके वह्न्भाभावञ्चादाय नाव्याप्ति-
रिति नचास्यापि साध्यताघटितत्वेन दनुपस्थितिकालीनानुमित्यनुपप-
त्तिर्द्दोष उक्तोभयाभाववत्प्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धाव-
च्छिन्नतादृशप्रतियोगितावच्छेदकत्वाभावस्याव्याप्तिघटकत्वाङ्गीकारे-
णानुपस्थितस्यापि संसर्गतया भानसम्भवेन व्याप्तिग्रहसंभवात् नन्व-
त्रापि महानसीयवह्निमान्तज्ज्ञानत्वादित्यत्र वह्निमहानसीयाभावमा-
दायाव्याप्तिरिति चेन्न स्वावच्छेद्यविशेष्यताविशिष्टविशेष्यतावच्छे-
द्याभावप्रमीयप्रकारतावच्छेदकत्वस्य वैशिष्ट्यघटकताङ्गीकारात् वै-
शिष्ट्यञ्च स्वावच्छेदकीभूतधर्म्मावच्छिन्नत्वस्ववृतिनिरवच्छिन्नत्व-
वत्त्वान्यतरसम्बन्धेन तथा च साध्यत्वावच्छेद्यविशेष्यत्वस्य वह्नि-
त्वावच्छेद्यत्वात्प्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतावच्छेदकविशे-
ष्यत्वस्य च महानसीयत्वावच्छिन्नत्वान्नाव्याप्तिरिति ॥ इदञ्च महा-
नसीयवह्नित्वावच्छिन्नप्रतियोगित्ववह्निमहानसीयत्वावच्छेद्यप्रतियोगि-
त्वयोस्स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपभेदा-
द्भेदपक्षे नच द्वित्वयोस्तयोः कथंभेदइति वाच्यं प्रतियोगित्वभेदा-
न्यथानुपपत्याकल्प्यत्वात् नच भेदकाभावः महानसीयधर्म्मिकव-
ह्नित्वज्ञानोत्तरापेक्षाबुद्धिरेकस्य हि सामग्र्यपरस्य हि वह्नित्वावच्छि-
न्नधर्म्मिकमहानसीयत्वज्ञानोत्तरापेक्षाबुद्धिरिति भेदककल्पनात् व-
स्तुतस्संयोगसम्बन्धावच्छिन्नमहानसीयवह्न्यभावप्रतियोगितावच्छे-
दकत्वस्य लाघवेन महानसीयत्ववह्नित्वयोस्सिद्धावपि विषयित्व-
सम्बन्धावच्छिन्नमहानसीयवह्न्यभावप्रतियोगितावच्छेदकत्वं सा-
मानाधिकरण्यसम्बन्धेन महानसीयत्वविशिष्टवह्नित्व एव कल्पनीयमे-
वम्वह्निमहानसीयाभावप्रतियोगितावच्छेकत्वम्महानसीयत्व एव
वह्नित्वविशिष्ट इति पक्षेचोक्तसम्बन्धो न निवेश्यः स्वनिरूपितावच्छे-
दकताविशिष्टान्यत्वघटकसम्बन्धस्य स्वानवच्छेदकानवच्छिन्नत्वरूप-
तोक्ताववोक्ताभाववारणात् विषयितासम्बन्धेन महानसीयवह्निवि-
धयेतावच्छेदकतापि महानसीयत्वविशिष्टवह्नित्व एव नातो विष-
यितया महानसीयवह्निसाधकेव्यभिचारिण्यतिव्याप्तिः एवञ्च यथा-
श्रुतेऽपि नोक्तसङ्केताव्याप्तिशङ्कापि प्रतियोगितावच्छेदकसाध्यता-
वच्छेदकयोर्भेदादिति बोध्यम् यद्वा महानसीयवह्न्यभावप्रतियो-

गितावच्छेदकत्वं साक्षादेव महानसीयत्ववह्नित्वयोरङ्गीकार्य्यं महानसीयत्वस्य च वह्नित्वावच्छिन्नानुयोगिकसमवायेनैव तथात्वमेवम्वह्निमहानसीयाभावप्रतियोगितावच्छेदकत्वम्महानसीयत्वावच्छिन्नानुयोगिताकसमवायेनैव वह्नित्वस्य प्रतियोगितयोर्भेदाय कल्पनीयमिति कल्पेऽपि विशेष्यत्वघटितसम्बन्धो न निवेश्यः स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्य पर्य्याप्तिघटितस्य निवेशेनैव प्रागुक्तदोषवारणादिति ॥ अथ संय्योगादिसम्बन्धावच्छिन्नमहानसीयवह्न्यभावप्रतियोगित्ववह्निमहानसीयाभावीयसय्योगसम्बन्धावच्छिन्नप्रतियोगित्वयोर्भेदाभावेऽपि क्षत्यभावेन भेदककल्पनाया अन्याय्यत्वेन वृत्यनियामकसम्बधस्य प्रतियोगितानवच्छेदकत्वपक्षे विषयितया महानसीयवह्नेस्साध्यतायां महानसीयवह्निविषयकवह्निमहानसीयविषयकज्ञानान्यतरत्वे व्यभिचारिण्यतिव्याप्तिः साध्याभावस्य प्रतियोगिवैयधिकरण्यविरहादिति चेन्न समनियतनानाधर्म्मावच्छिन्नप्रतियोगित्वानाम्भेदपक्षे दोषाभावात्पक्षान्तरे च साध्यतावच्छेदकावच्छिन्नाधिकरणत्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वोभयाभावस्यैव प्रतियोगिवैयधिकण्यपदार्थत्वात् साध्यतावच्छेदकावच्छिन्नाधिकरणत्वञ्च साध्यताविशिष्टनिरूपकताकाधिकरणत्वम्वैशिष्ट्यञ्च प्रागुक्तसाध्यताविशिष्टान्यत्वघटकवैशिष्ट्यनियामकसम्बन्धे ग्राह्यमिति एवंचाव्याप्तिवारणाय कोपि प्रयासो न विधेय इति ॥ यत्तु नीलान्यघटपीतान्यपटोभयसाध्यकपीतघटनीलपटोभयहेतौ पीतान्यघटनीलान्यपटोभयाभावमादायाव्याप्तिरिति तदपि निरस्तं प्रतियोगितावच्छेदकोभयत्वस्य साध्यतावच्छेदकोऽभयत्वादन्यत्वात् न चोभयत्वस्य प्रतियोगितावच्छेदकत्वं न स्वीकरणीयं प्रयोजनाभावादिति वाच्यं प्रतियोग्यंशे उभयत्वभानम्विना तादृशाभावप्रतीतेरनुदयात्प्रमेयत्वम्विना प्रतियोग्यंशेघटत्वादिभानस्य घटोनास्ती तिप्रतीतौ दृष्टत्वेन प्रमेयघटोनास्तीतिप्रतीतिसिद्धाभावप्रतियोगितावच्छेदकत्वस्य प्रमेयत्वे त्यक्तुं युक्तत्वादिति दिक् ॥ ० ॥ ० ॥ साध्यतावच्छेदकभिन्नो य इति साध्यतावच्छेदकताविशिष्टान्यसाध्यतावच्छेदकसमानाधिकरणवृत्त्यवच्छेदकत्वानिरूपितत्वन्तत्पर्य्यवसितार्थः तेन प्रमेयसध्यतावच्छेदकस्थले साध्यतावच्छेदकेतराप्रसिद्धावपि न क्षतिः अनवच्छेदकत्वानुशार-

णवैयर्थ्यस्येष्टत्वाभ्युपगमादव्याप्तेर्व्वलवत्वाच्चाह अपिचेति यत्त्वत्र साध्यतावच्छेदकताघटकसम्बन्धेन साध्यवृत्तित्वोक्तौ घटत्वस्य स्वरूपेणावृत्तित्वान्न दोष इति तत्तुच्छम् वह्नित्वप्रतियोगिकसमवायेन वह्नित्वस्य साध्यतावच्छेकत्वे तादृशधर्म्माप्रसिद्धेः नच साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य पर्य्याप्तिघटितस्यानुपादेयत्वेन नाप्रसिद्धिः एवमुक्तपर्य्यवसितार्थे निरवच्छिन्नसाध्यतावच्छेदकस्थले सावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकतैव तादृशी परत्रच विपरीतेति वाच्यं तादात्म्यस्वरूपान्यतरसम्बधेन प्रमेयत्वविशिष्टसाधकेऽव्याप्तेस्तथाप्यनुद्धारात् अवच्छेदकताधर्म्मिकसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वपरिष्कारे तद्वह्नयभावस्यापि वारणासम्भवाच्च ॥ ० ॥ ननु साध्यतावच्छेदकातिरिक्तधर्म्मे गगनत्वातिरिक्तत्वमस्तु विशेषणं तथा च गगनाभाव एव तादृशप्रतियोगिताकस्तादृशोभविष्यति प्रमेयवान्वाच्यत्वादित्यादौ नच प्रमेयवान्गगनत्वादित्यत्राव्याप्तिस्साध्यतावच्छेदकतादात्म्येन गगनाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यमवृत्तिवृत्तिधर्म्मातिरिक्तत्वस्य विशेषणतया विवक्षितत्वेनात्माद्यभावस्य तत्र तादृशत्वसम्भवादात्मगगनान्यतरसाध्यके प्रत्येकाभावमादायाव्याप्तिरनवच्छेदकानुशरणेन वारणीया यदि चात्मसाध्यकज्ञाने सद्धेतौ तदात्मभेदमादायाव्याप्तिः तद्व्यक्तित्वस्यावृत्तिवृत्तित्वात् महानसीयात्मगतद्वित्वविशिष्टवह्नयभावमादायाव्याप्तिस्तु न सम्भवति अवृत्तिमात्रवृत्तित्वस्य विवक्षितत्वादित्युच्यते तदा साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्म्मनिष्ठा या गगनत्वनिष्ठावच्छेदकताभिन्नासती महाकालत्वनिष्ठावच्छेदकताभिन्नावच्छेदकता तदनिरूपितत्वमेवविवक्षणीयं नचैवमपि द्वित्वत्वेन द्वित्वविशिष्टवह्निसाध्यके सद्धेतौ वह्निगगनोभयाभावमादायाव्याप्तिः घटमहाकालयोर्य्यस्संयोगस्तद्व्यक्तिमतस्तादात्म्येन साध्यतायां घटत्वेचाव्याप्तिः तद्व्यक्तिमन्महाकालभेदस्य तादृशप्रतियोगिताकत्वात् नच तदवच्छेदकम्महाकालत्वमात्रमुक्तभेदस्याव्याप्यवृत्तित्वादिति वाच्यं साध्यतावच्छेदकातिरिक्तधर्म्मावच्छेद्यत्वगगनत्वातिरिक्तमहाकालत्वातिरिक्तधर्म्मावच्छेद्यत्वोभयाभावस्य विवक्षितत्वात् एतेन गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वे प्रमेयगगनाभावमादाय प्रमेयवान्वाच्यत्वादि-

स्यत्राव्याप्तिरित्यप्यपास्तम् यत्तु तत्क्षणविशिष्टकालिकविशेषणतया गगनत्वविशिष्टसाध्यकतत्कालत्वे गगनत्ववन्महाकालाभावमादायाव्याप्तिरिति तत्तुच्छं निरुक्तधर्म्मावच्छेद्यत्वगगनत्वातिरिक्तधर्म्मावच्छेद्यत्वमहाकालत्वातिरिक्तधर्म्मावच्छेद्यत्वैतत्त्रितयाभावस्य विवक्षितत्वादेवञ्च विषयितया प्रमेयस्य साध्यतायां प्रमेयविषयकगगनादिविषयकज्ञानत्वेऽपि नाव्याप्तिः गगनाद्यभावस्य प्रतियोगिवैयधिकरण्यविरहेऽपि घटाद्यभावस्यैव तादृशप्रतियोगिताकस्य संभवाच्च महानसीयवह्न्यभावप्रतियोगित्वस्य धर्म्मत्रयानवच्छिन्नत्वादव्याप्तितादवस्थ्यमिति वाच्यम् अवच्छेद्यत्वसम्बन्धेन तादृशधर्म्मवद्घटितत्रितयाद्यभावस्य विवक्षितत्वात् स्ववृत्तिभेदीयघटत्वावच्छिन्नप्रतियोगितासम्बन्धेन प्रमेयसाध्यकघटत्वे घटाभावमात्रस्य प्रतियोगिव्यधिकरणाभावस्य तादृशप्रतियोगिताकत्वेपि स्ववृत्तिभेदीयनीलघटत्वावच्छिन्नप्रतियोगितासम्बन्धेन साध्यतायान्तत्राव्याप्तिरिति तु न साधुः उक्तभेदानुयोगितानवच्छेदकधर्म्मविशिष्टस्याप्युक्तभेदघटितसम्बन्धेन व्यापकत्वाङ्गीकारे स्ववृत्तिभेदीयमहानसीयवह्नित्वावच्छिन्नप्रतियोगितासम्बन्धेन वह्निसाध्यकमहानसीयवह्नित्वे सद्धेतौ महानसीयवह्न्यभावमात्रस्य लक्षणघटकतया तत्प्रतियोगितायामुक्तोभयानवच्छिन्नत्वविरहेणाव्याप्तेर्दुरुद्धरत्वादिति चेन्न घटवन्नित्यज्ञानत्वादित्यत्र नित्यज्ञानान्यत्वविशिष्टपटाद्यभावस्यैव लक्षणघटकतायाः सम्भावितत्वेन तदीयप्रतियोगितायामुक्तत्रितयाभावविरहादव्याप्तेरनिवार्य्यत्वादिति ॥ ० ॥ अथ साध्यवृत्तित्वं साध्यतावच्छेदकवृत्तित्वरूपम्वाच्यम्वृत्तिता च स्वसामानाधिकरण्यसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नाभावप्रतियोगित्वविशिष्टस्वाभाववद्वृत्तित्वाभाववत्त्वसम्बन्धावच्छिन्नस्वाभाववत्त्वोभयसम्बन्धेन तथाच प्रमेयसाध्यकस्थले वाच्यत्वादिरेव तादृशो धर्म्मः स्वाभावस्याप्रसिद्धत्वात् प्रमेयत्व उक्तप्रतियोगित्वविरहेण तद्विशिष्टोक्तवृत्तित्वाभाववत्त्वसम्बन्धेन घटत्वस्यैव सत्त्वेन स्वाभाववत्वघटित सम्बन्धेन घटत्वादीनाम्वृत्तित्वविरहादिति न तादृशाभावाप्रसिद्धिरितिचेन्नैवम्पूर्व्वकल्पापेक्षयागुरुत्वात् गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वे प्रमेयघटाभावमादायाव्याप्तितादवस्थ्यात् प्रमेयत्वस्यापि विशिष्टाभावादिप्रतियोगित्वेन धर्म्ममात्रस्य तद्वृत्तित्वात्प्रमेयसाध्यका-

व्याप्तितादवस्थ्याच्च कथञ्चित्प्रमेयत्वे प्रतियोगित्ववारणसम्भवेऽपि घटान्यप्रमेयसाध्यकभूतलत्वादौ घटाभावस्य प्रतियोगिवैयधिकरण्यविरहादभावान्तरस्य तादृशप्रतियोगिताकत्वविरहादव्याप्तेश्चेति ॥ ० ॥ अथ साध्यतावच्छेदकातिरिक्तधर्म्मव्यासज्ज्यवृत्त्यन्यत्वम्विशेषणं देयम्प्रमेसाध्यके घटादिगतद्वित्वावच्छिन्नाभावमादायैव लक्षणसङ्गतिः नच वह्निघटोभयाभावमादायाव्याप्तिर्व्यासज्ज्यवृत्त्यन्यसाध्यताच्छेदकातिरिक्तघटत्वस्य साध्यवृत्तित्वविरहादिति वाच्यमिदानीं साध्यवृत्तित्वनिवेशप्रयोजनाभावात्सर्व्वत्रैव सद्धेतौ द्वित्वादिमात्रावच्छिन्नाभावमादाय लक्षणसमन्वयात् नच रूपवान्घटत्वादित्यत्र रूपद्वयन्नास्तीतिप्रतीतिसिद्धाभावमादयाव्याप्तिः रूपत्वद्वित्वयोरेवावच्छेदकत्वेन तत्प्रतियोगितायामुक्तानवच्छिन्नत्वसत्त्वादितिवाच्यं साध्यतावच्छेदकातिरिक्तधर्म्मावच्छेद्यत्वव्यासज्ज्यवृत्तिधर्म्मातिरिक्तधर्म्मावच्छेद्यत्वोभयाभावस्य प्रतियोगिताविशेषणत्वात् इति चेन्न द्वित्वविशिष्टस्य साध्यतायां यत्र घटगतगुणएकस्मिन्द्वयोर्व्वा द्वित्वमुत्पन्नं न त्रिषु तद्घटनिष्ठतद्व्यक्तित्वे सद्धेतौ द्वित्वत्रयन्नास्तीत्यभावमादायाव्याप्तेः व्यासज्ज्यवृत्तिधर्म्मातिरिक्तधर्मावच्छेद्यत्वस्य प्रतियोगितायाम्विरहात् विषयितया प्रमेयस्य साध्यतायान्नित्यज्ञानत्वे नित्यज्ञानान्यत्वविशिष्टघटाभावमात्रस्य लक्षणघटकतया तत्प्रतियोगितायामुभयाभावविरहेणाव्याप्तेश्चेति ॥ ० ॥ कश्चिदेतस्य ग्रन्थोक्तविशेषणस्य तादात्म्येन जातिमत्साध्यकसत्त्वे घटाद्यभावं सद्घटाभावञ्चादायाव्याप्तिवारणाय साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितानवच्छेदकसाध्यवृत्तिवृत्तिरुपावृत्तित्वार्थकतामाह तन्नैकत्वादेः पर्य्याप्त्यनभ्युपगम एवोक्तकल्पादरणात् एतद्दोषसदृशस्य दण्ड्यादिसाध्यकस्थलाव्याप्तेर्ग्रन्थकृतैव वक्ष्यमाणत्वात्प्राक्परिष्कृते तत्कल्पे दोषासम्भवाच्च अभावस्याप्रसिद्धेरिति यद्यपि तादृशधर्म्मानवच्छिन्नप्रतियोगित्वाप्रसिद्धिरेवदातुमुचिता तथापि संयोगादिसम्बन्धावच्छिन्नप्रमेयाभावप्रतियोगित्वस्य विषयितया प्रमेयत्ववदभावीयप्रतियोगित्वस्य ध्वंसीयप्रतियोगित्वस्य तादृशस्य प्रसिद्धेरभावात्प्रसिद्धिपर्य्यन्तानुधावनं तथा च साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणस्य सध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छे-

दकताघटकसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकस्य हेतुसमानाधिकरणात्यन्ताभावस्य न प्रसिद्धिरिति ॥ ० ॥ द्रव्यत्वादिरूपेणेत्यादि अत्र तृतीयाया अवच्छिन्नत्वमर्थः धूम इतिसप्तम्यन्तस्य च धूमनिष्ठलिङ्गत्वम्वह्निव्याप्यत्वञ्च वह्निविधेयताकानुमितिजनकतायां विषयितयावच्छेदकीभूतोधर्म्मः तदेकदेशेऽनुमितौ द्रव्यत्वावच्छिन्नधूमनिष्ठलिङ्गकत्वस्यान्वयः धूमत्वावच्छिन्नलिङ्गताकत्वन्धूमसामान्य इति सप्तम्यन्तार्थः तस्य तत्तद्वह्निव्याप्यत्वशब्दार्थीभूततत्तद्वह्निविधेयताकानुमितिजनकतावच्छेदकघटकानुमितावन्वयः उक्तावच्छेदकद्वयोश्चेतरभेदानुमित्युद्देश्यतावच्छेदकाभावसम्पादनरूपप्रकृतवारणशब्दार्थाभाव आधेयतासम्बन्धेनान्वयः चतुर्थ्या इच्छाधीनत्वमर्थः विशिष्येत्यस्य विशिष्टमित्यर्थः क्त्वाप्रत्ययार्थस्याविवक्षितत्वात् विशिष्टता च साध्यतावच्छेदकावच्छिन्नविधेयत्वहेतुतावच्छेदकावच्छिन्नलिङ्गताकत्वघटितत्वं लक्ष्यमितरभेदानुमित्युद्देश्यं निर्द्दिशति बोधयतीत्यर्थः अयमाशयः तद्धर्म्माश्रयनिष्ठलिङ्गताकतद्धर्म्माश्रयनिष्ठविधेयताकानुमितिजनकतावच्छेदकम्पक्षीकृत्य तद्धर्म्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदक तद्धर्म्मावच्छिन्नसामानाधिकरण्येन हेतुनेतरभेदसाधने धूमत्वाश्रयनिष्ठलिङ्गतात्वस्य द्रव्यत्वावच्छिन्नलिङ्गतायां वह्नित्वाश्रयनिष्ठविधेयतात्वस्य च तत्तद्वह्नित्वावच्छिन्नविधेयतायां सत्त्वेनोद्देश्यतावच्छेदकस्य द्रव्यत्वावच्छिन्नलिङ्गताकवह्नित्वावच्छिन्नविधेयताकानुमितिजनकतावच्छेदके धूमत्वावच्छिन्नलिङ्गताकतद्वह्नित्वावच्छिन्नविधेयताकानुमितिजनकतावच्छेदके च सत्त्वात् तत्र चोक्तावच्छेदकद्वये धूमत्वावच्छिन्नसामानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यविरहाद्भागासिद्धिस्स्याद्विशिष्यलक्ष्यानिर्द्देशेचोद्देश्यतावच्छेदकस्य तत्रासत्त्वेन न भागासिद्ध्यवकाशः अथ द्रव्यत्वावच्छिन्नलिङ्गताकवह्नित्वावच्छिन्नविधेयताकानुमितिजनकतावच्छेदकस्याप्रसिद्धतया कथं तदन्तर्भावेण भागासिद्धिः धूमवदनुयोगिकसंयोगरूपप्रकृतहेतुतावच्छेदकसम्बन्धावच्छिन्नद्रव्यत्वावच्छिन्नलिङ्गताकतादृशानुमितिजनकतावच्छेदकस्य प्रसिद्धत्वेऽपि तस्योक्तसामानाधिकरण्याभिन्नत्वेन भागासिद्ध्यसम्भव एवेति चेन्न भ्रमप्रमासाधारण्यानुरोधे न हि विषयितासम्बन्धेन व्याप्तिविशिष्टनिश्चयत्वेन कारणत्वम्परित्यज्य निरू-

प्यनिरूपकभावापन्नविषयताकनिश्चयत्वेन कारणात्वम्वाच्यम्विषयविधियेत्यादिग्रन्थस्त्वापाततो विषयविशिष्टनिश्चयत्वेन कारणत्वपक्षीयः वस्तुतो व्याप्तिरित्यस्योक्तजनकतानतिरिक्तवृत्तिविषयितानिरूपक इत्यर्थः अनतिरिक्तवृत्तित्वञ्च स्वव्यापकतत्कत्वन्तथा च यादृशरूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकनिरूपकताकविषयिताव्यापिकोक्तजनकता तादृशरूपमुक्तजनकतावृत्त्यभावीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्पर्य्यवसायिपक्षीकृत्योक्तसामानाधिकरण्यत्वगतसामुदायत्वहेतुकानुमाने तादृशजनकत्वपक्षकोक्तसामानाधिकरण्यत्वाववच्छिन्ननिरूपितविषयित्वावच्छिन्नत्वहेतुकानुमाने वा विशिष्य लक्ष्यानिवेशे भागासिद्धौ तात्पर्य्यमिति॥ परे तु व्याप्यत्वस्य व्याप्यत्वव्यहारस्येत्यर्थः लक्ष्यमितरभेदानुमित्युद्देश्यरूपव्याप्यत्वपदार्थम् अयम्भावः तत्तद्धर्म्मावच्छिन्नहेतुसाध्यबोधकपदसमभिव्याहृतव्याप्यत्वपदार्थस्तद्धर्म्मघटित एव तत्र व्याप्यत्वय्यँदितद्धर्म्माश्रयनिष्ठलिङ्गताकतद्धर्म्माश्रयनिष्ठविधेयताकानुमितिजनकतावच्छदेकरुपन्तदा द्रव्यम्वह्निव्याप्यमितिव्यवहारापत्तिस्स्यात्तत्प्रयोजकस्य द्रव्यत्वाश्रयनिष्ठलिङ्गताकवह्नित्वावच्छिन्नविधेयताकानुमितिजनकतावच्छेदकस्य धूमत्वावच्छिन्नलिङ्गताकवह्नित्वावच्छिन्नविधेयताकानुमितिजनकतावच्छेदकधूमत्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यरूपविषयस्य सत्त्वाद्विशिष्य लक्ष्यनिर्द्देशे तु द्रव्यत्वावच्छिन्नलिङ्गताकवह्नित्वावच्छिन्नविधेयताकानुमितिजनकतावच्छेदकरूपविषययस्याप्रसिद्धेर्न्नापत्तिरिति प्राहुः॥ केचित्तु व्याप्यत्वस्येत्यन्तरमुक्तसामानाधिकरण्यरुपतायाः इति पूरणीयन्तथाच व्याप्तिरित्येतावदुक्तावविशेषात्तद्धर्म्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकतद्धर्म्मावच्छिन्नसामानाधियरण्यस्य तद्धर्म्मावच्छिन्नलिङ्गताकतद्धर्म्मावच्छिन्नविधेयताकानुमितिजनकतावच्छेदकत्वस्येव धर्म्मान्तरावच्छिन्नलिङ्गताकधर्म्मान्तरावच्छिन्नविधेयताकानुमितिजनकतावच्छेदकत्वस्य प्रसङ्गे न तादृशव्याप्तिज्ञानविरहदशायान्तत्तद्धर्म्मावच्छिन्नलिङ्गताकतद्धर्म्मावच्छिन्नविधेयताकानुमित्यनुपपत्तिः तद्रूपविशिष्टेत्यनुक्तौ च धूमत्वावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्याज्ञाने द्रव्यत्वाव-

च्छिन्नलिङ्गतादिकानुमित्यनुपपत्तिर्द्दोषः तद्रूपाविशिष्टस्येत्याद्युक्तौचान्यधर्म्मावच्छिन्नलिङ्गतादिकानुमितिजनकतावच्छेदकस्य तद्धर्म्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकतद्धर्म्मावच्छिन्नसामानाधिकरण्यरूपताविरहान्न परामर्षानुमित्योः कार्य्यकारणभावे व्यभिचारसम्भव इति भाव इति वदन्ति ॥०॥ सामान्यरूपतालाभायेति वह्नित्वाश्रयनिखिलव्यक्तिगमकताप्रयोजकतालाभायेत्यर्थः यत्किञ्चिद्व्यक्तिसामानाधिकरण्ये यावत्प्रतियोगिकत्वविरहाद्यावदित्यादेर्य्यथाश्रुतार्थकताव्यवच्छेदाय लक्षणयोक्तार्थवोधकत्वंसूचयितुं लाभायेति ॥ ० ॥ निरवच्छिन्नमेवेति किञ्चित्सम्बन्धावच्छिन्नावच्छेदकत्वानिरूपितमेवेत्यर्थः अवच्छेदकतामात्रस्य सम्बन्धावच्छिन्नत्वेन निरवच्छिन्नावच्छेदकत्वाप्रसिद्धेस्सम्बन्धावच्छिन्नेति ॥ ननु विशिष्टसाध्यतावच्छेदकस्थलेऽवच्छेदकतायान्निरवच्छिन्नत्वविवक्षया पटसमवेतत्वविशिष्टजातिमदभावमादाय यद्यप्यव्याप्तिवारणं सम्भवति तथापि दण्डिमान्द्रव्यत्वादित्यत्र दण्डस्य निरवच्छिन्नावच्छेदकताविरहेणातिव्याप्तिस्स्यादित्यत आह येन रूपणेत्यादि साध्यतावच्छेदानिष्ठावच्छेदकतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वसाध्यतावच्छेदकतावच्छेदकानिष्ठावच्छेदकतानिरूपितत्वोभयाभाववदित्यर्थः विशिष्टत्यञ्च प्राग्वत् एवंच प्रमेयस्य साध्यतावच्छेदकतावच्छेदकत्वे तदितराप्रसिद्धावपि न क्षतिः अत्रोभयानवच्छिन्नेति सम्पातायातमुक्तविशिष्टान्यावच्छेदकत्वानिरूपितत्वमात्रम्विवक्षितं लाघवात्कथमन्यथा जातिमद्वान्घटत्वादित्यत्राव्याप्तिवारणायोक्तविशेषणमुपादीयेत पटसमवेतत्वविशिष्टवदभावमादायाव्याप्तेस्तदवस्थानात् कथम्वा तद्व्यक्तिमदभावन्तत्ताविशिष्टदण्डत्वविशिष्टवदभावञ्चादाय दण्डिमान्दण्डिसंयोगादित्यत्राव्याप्तिसद्भावे तत्राव्याप्त्यभावप्रतिपादकं यदिचेत्यादिकमन्यथोच्येत यत्तु वह्नित्वविशिष्टस्य विषयितया साध्यतायान्तज्ज्ञानत्वे सद्धेतौ वह्न्यभावमादायाव्याप्तिरत उभयानवच्छिन्नत्वमेव विवक्षितन्तथासति तादृशावच्छेदकतायां सावच्छिन्नत्वविशेषणेन वह्न्यभाववारणञ्च साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नावच्छेदकतायां सावच्छिन्नत्वम्विवक्षितुं शक्यं वह्नित्वाश्रयवान् धूमादित्यत्र प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगि-

तानिरूपिततादृशावच्छेदकत्वाप्रसिद्ध्या अव्याप्त्यापत्तेरिति तत्तुच्छमुक्तग्रन्थासङ्गतेर्लाघवाच्चोभयानवच्छिन्नत्वस्याविवक्षणीयत्वात् साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नावच्छेदकत्वाभावे विक्षणीये सम्बन्धघटककावच्छेदकतायां सावच्छिन्नत्वस्य विशेषणीयतया वह्न्यभावमादायाव्याप्तिवारणासम्भवात् एवञ्च रूपत्वन्यूनवृत्तिजातिपदेन नीलत्वत्वपीतत्वत्वाद्यन्यतमविशिष्टजातिर्ग्राह्या नीलाद्यभावादेर्न्नीलत्वादिमदभावे तात्पर्य्यन्नातस्तदा दण्ड्यादावित्यादिपदेनेत्यादिग्रन्थविरोधः प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वकल्पे साध्यतानिरूपितावच्छेदकताविशिष्टान्यसंसर्गतानिरूपितत्वसाध्यतावच्छेदकताव्यापकत्वोभयाभावरूपमुक्तावच्छिन्नत्वं वाच्यं तथा च वह्न्यभाववारणसंभवोग्रन्थासङ्गत्यभावश्चेतिपरमार्थः वशिष्ट्यञ्च स्वनिरूपितसंसर्गतानिरूपितावच्छेदकतावद्धर्म्मावच्छिन्नत्वस्वसमानाधिकरणसावच्छिन्नावच्छेदकतानिरूपितत्वोभयसम्बन्धेन येतु वह्न्यभावमादायाव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यमेव साध्यतावच्छेदकावच्छिन्नाधिकरणत्वप्रतियोगिताश्रयाधिकरणात्वोभयाभावरूपस्वाच्यमिति वदन्ति तेऽपि प्रतियोगिताश्रयनिष्ठनिरूपकताकाधिकरणत्वप्रवेशे प्रमेयावच्छिन्ननिरूपकतामादाय घटाभावस्यापि प्रतियोगिवैयधिकरण्यासम्भवः प्रतियोगित्वावच्छिन्नाधिकरणत्वप्रवेशे वह्निविषकज्ञाने तद्विरहेण वह्न्यभावस्यापि प्रतियोगिवैयाधिकरण्यसम्भवः प्रमेयत्वावच्छिन्नावच्छेदकताकानिरूपकतामादाय घटाभावस्य प्रतियोगिवैयधिकण्यानुपपत्त्या प्रतियोगितावच्छेदकानिष्ठावच्छेदकताकनिरूपकताकाधिकरणत्वानिवेशोऽपि हेय इति हेया केचित्तु साध्यतावच्छेदकतावच्छेदकातिरिक्तानवच्छिन्नावच्छेदकतायान्निरवच्छिन्नत्वसाध्यतावच्छेदकताव्यापकत्वोभयाभावरूपसावच्छिन्नत्वानिवेशान्न वह्न्यभावमादायाव्याप्तिसम्भवो नवा वह्नित्वाश्रयवान्धूमादित्यत्राव्याप्तिप्रसङ्ग इति प्राहुः ॥ ० ॥ अथात्र विशिष्टसाध्यतावच्छेदकस्थले शुद्धसाध्यतावच्छेदकस्थले च स्वानवच्छेदकानवच्छिन्नत्वसम्बधेन साध्यतावच्छेदकताविशिष्टान्यसाध्यतावच्छेदकनिष्ठावच्छेदकत्वानिरूपितत्वमेव वाच्यं तावतैव महानसीयवृत्तिजातिमदभावस्य पटसमवेतत्वविशिष्टजातिमदभावस्य च वारणसम्भ-

वात् नचैवमपि तत्ताविशिष्टदण्डत्वविशिष्टवदभावस्य न वारणमिति वाच्यं स्वानवच्छेदकानवच्छिन्नत्वस्य स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वसम्बन्धावच्छिन्नस्वाभाववत्त्वरूपस्य वाच्यत्वात् एवञ्च निरवच्छिन्नसाध्यतावच्छेदकतायास्स्वावच्छेदकाप्रसिद्धावपि न क्षतिः वैशिष्ट्यं च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन अथ निरवच्छिन्नसाध्यतावच्छेदकतास्थले स्वनिरूपितावच्छेदकत्वाप्रसिद्ध्या निरवच्छिन्नसाध्यतावच्छेदकतावच्छेदकतास्थले स्वनिरूपितावच्छेदकतायास्स्वावच्छेदकाप्रसिद्ध्या चैकसम्बन्धस्य साध्यतावच्छेदकताव्यधिकरणत्वेन तत्सम्बन्धावच्छिन्नस्वाभाववत्त्वेन सर्व्वस्य साध्यतावच्छेदकताविशिष्टत्वादव्याप्तिः प्रमेयस्य साध्यतावच्छेदकतावच्छेदकतायामवच्छेदकत्वे प्रमेयावच्छिन्नावच्छेदकतायास्स्वानवच्छेदकाप्रसिद्ध्या तत्सम्बन्धावच्छिन्नस्वाभावस्य केवलान्वयित्वात्साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वाप्रसिद्धिः निरवच्छिन्नसाध्यतावच्छेदकतावच्छेदकतास्थले प्रमेयावच्छिन्नसाध्यतावच्छेदकतावच्छेदकतास्थले च तद्दोषवारणाय स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वसम्बन्धावच्छिन्नस्वाभाववत्त्वोपादानेऽनवस्थापीतिचेदत्र स्ववृत्तित्वस्य स्वनिरूपितयत्किञ्चिदवच्छेदकत्वावृत्तित्वसम्बन्धावच्छिन्नस्वाभाववत्त्वसम्बन्धावच्छिन्नस्य स्वानवच्छेदकानवच्छिन्नत्वपदेन वाच्यत्वाददोष इति वयं ब्रूमः अवृतित्वघटकवृत्तित्वं च स्वनिरूपितावच्छेदकतासामानाधिकरण्येन वाच्यन्निरूपितत्वञ्च साक्षात्परम्परासाधारणं ग्राह्यं वह्नित्वाश्रयवान्तज्ज्ञानत्वादित्यत्र वह्न्यभावमादायाव्याप्तेर्व्वारणाय स्वनिरूपितयत्किञ्चिदवच्छेदकत्वावृत्तित्वसम्बन्धावच्छिन्नस्वाभाववत्त्वमपि वैशिष्ट्यघटकतयोपादेयं स्ववृत्तित्वस्वानवच्छेदकानवच्छिन्नत्वयोस्सर्वत्रैवायमेव निष्कर्षो बोध्यः न चैवं प्रमेयवद्वान्वाच्यत्वादित्यत्र प्रमेयत्वावच्छिन्नावच्छेदकत्वान्यावच्छेदकत्वमात्रस्य विशिष्टान्यत्वादव्याप्तिरिति वाच्यं विशिष्टान्यावच्छेदकतायां स्वसजातीयावच्छेदकतावत्त्वसम्बन्धेन स्वरूपसम्बन्धेन वा साध्यतावच्छेदकताव्यापकत्वस्य वैशिष्ट्यस्य च स्वावच्छेदकसम्बन्धावच्छिन्नत्वगर्भस्योक्तौ दोषाभावात् सावच्छिन्नघटत्वादिनिष्ठावच्छेदकत्वस्यैव विषयित्वाद्यवच्छिन्नप्रमेयत्वा-

द्यवच्छिन्नावच्छेदकत्वस्यैव वा तादृशविशिष्टान्यावच्छेदकतात्वात्। एवञ्च साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वन्न स्वातन्त्र्येणोपादेयमिति चेदत्र केचित् उभयस्थले चैकस्य व्याप्तित्वे व्याप्तिज्ञानरूपकारणभेदाभावात्सर्व्वदैव सावच्छिन्ननिरवच्छिन्नावच्छेदकताकविधेयत्वनिरूपकानुमित्योः प्रसङ्गः स्यादिति कारणभेदाय व्याप्तिद्वयनिर्व्वचनमिति वदन्ति तदपरे न मन्यन्ते भेदकसौलभ्यात्। तथाहि वह्नीतरावृत्तित्वेन वह्नित्वे व्यापकतावच्छेदकत्वग्रहे निरवच्छिन्नवह्नित्वनिष्ठावच्छेदकताकविधेयताकानुमितिर्व्वह्नित्वत्वेन वह्नित्वे तद्ग्रहे च वह्नित्वत्वावच्छिन्नावच्छेदकताकविधेयताकानुमितिरितिनियमे तत्तद्व्याप्तिज्ञानमेव भेदकं नचैवमपि वह्निमानित्यनुमिते वह्नीतरावृत्तिमद्वानित्यनुमितेश्च न भेदकसिद्धिः व्याप्तिभेदपक्षे च निरवच्छिन्नवह्नित्वानिष्ठावच्छेदकताकविधेयताकानुमितौ निरवच्छिन्नावच्छेदकत्वघटितव्याप्तिज्ञानस्य तत्तद्धर्म्मावच्छिन्नावच्छेदकताकविधेयताकानुमितिषु तत्तद्धर्म्मातिरिक्तधर्म्मानवच्छिन्नावच्छेदकत्वघटितव्याप्तिज्ञानानां कारणत्वाद्भेदकसौलभ्यमिति वाच्यं निरवच्छिन्नवह्नित्वनिष्ठावच्छेदकताकविधेयताकानुमितौ वह्नीतरावृत्तित्वावच्छिन्नविशेष्यकस्य व्यापकतावच्छेदकत्वज्ञानस्य वह्नित्वत्वावच्छिन्नावच्छेदकताकविधेयताशाल्यनुमितौ वह्नित्ववदितरावृत्तित्वावच्छिन्नविशेष्यकव्यापकतावच्छेदकत्वज्ञानस्य वह्नीतरावृत्तित्वावच्छिन्नावच्छेदकताकविधेयताशाल्यनुमितौ वह्नीतरावृत्तिमदितरावृत्तित्वावच्छिन्ने व्यापकतावच्छेदकत्वावगाहिज्ञानस्य च कारणत्वकल्पनया भेदकसौलभ्यात् व्याप्तिभेदपक्षेऽपि व्यापकतावच्छेदकत्वधर्म्मितावच्छेदकस्य तद्विशेषस्य चावश्यनिवेश्यत्वादन्यथा व्यभिचारग्रहेपि तादृशानवच्छेदकत्वावच्छिन्नग्रहसम्भवेन वह्नित्वव्यापकत्वाद्यवच्छिन्न इन्धनव्यापकतावच्छेदकत्वस्य द्रव्यत्वादौ प्रमोत्पादेन चानिष्टप्रशक्तेः वह्नित्वत्वातिरिक्तधर्म्मानवच्छिन्नावच्छेदकत्वघटितव्यापकतावच्छेदकत्वस्य धूमजनकतावच्छेदकजातित्वावच्छिन्ने ग्रहाद्वह्नित्ववद्वानित्यनुमित्यापत्तेश्च। अत्रोच्यते धूमादिलिङ्गिकाया निरवच्छिन्नवह्नित्वनिष्ठावच्छेदकताकविधेयताकानुमितेरभ्रान्तस्योत्पत्तयेऽवश्यन्तादृशप्रतियोगितानिरूपितविशिष्टावच्छेदकत्वाभावस्यैव व्याप्तिघटकत्वम्वाच्यं तज्ज्ञानस्यैव च कारणत्वं तत्रोक्तविशिष्टान्यावच्छेदकत्वानिरूपितत्वन्न विशेषण

मुक्तफलसम्पादकनिरवच्छिन्नत्वाविषयित्वस्य कारणतावच्छेदकघटकत्वापेक्षया तादृशानिरूपितत्वविषयस्य तत्त्वे गौरवादिति तद्घटितस्य विषयितया तादृशानुमितिजनकतावच्छेदकत्वरूपशुद्धसाध्यतावच्छेदकस्थलीयव्याप्तित्वासम्भवः नच विशिष्टसाध्यतावच्छेदकस्थलीयव्याप्तित्वन्निरवच्छिन्नत्वघटितस्य तद्विषयितायाःकारणतावच्छेदकत्वे लाघवसद्भावेऽपि दण्डादिविधेयतावच्छेदकव्यभिचारलिङ्गकानुमितेरभ्रान्त उत्पत्तिप्रसङ्गरूपप्रतिकूलतर्कस्य सम्भवात् अथ साध्यसाधनभेदेन कार्य्यकारणभावभेदे निरवच्छिन्नावच्छेदकताकविधेयताशाल्यनुमितौ लाघवेन निरवच्छिन्नावच्छेदकत्वघटितस्य सावच्छिन्नावच्छेदकत्वकाविधेयताशाल्यनुमितौ तादृशानिरूपितत्वघटितस्य च वस्तुनो ज्ञानस्य यथा कारणत्वं तथा सल्लिङ्गकोक्तानुमितिद्वय एव निरवच्छिन्नत्वघटितव्याप्तिज्ञानस्यासल्लिङ्गिकायाश्च निरवच्छिन्नविधेयतावच्छेदकताकानुमितौ निरवच्छिन्नत्वघटिताया इतरत्र चोक्तानिरूपितत्वघटिताया व्याप्तेर्ज्ञानस्य कारणत्वाङ्गिन्नस्यादिति चेन्नैवंसति सल्लिङ्गकानुमितौ साध्यसामानाधिकण्यज्ञानस्यासल्लिङ्गकानुमितौ व्यापकत्वघटितज्ञानस्य कारणत्वमित्येवाकिन्न रोचयेः हन्त लाघवमन्विष्यतो मम महदिदमनिष्टमापादितन्देवानाम्प्रियेणेति चेत्क्लृप्तमात्ररीतिम्बिदुषो न चित्रमेतद्भवति कल्पनाप्रसरः सोऽप्यत्र साध्यैकपरतन्त्रो दृष्टानुसारी च तथा हि वह्निसामानाधिकण्यस्य गमकताप्रयोजकत्वेऽविशेषाद्धूमस्येव रासभस्यापि तेन तत्त्वङ्कल्पयेन्नह्येषा कल्पना धूमरासभयोः प्राणित्वाप्राणित्वादिरूपलिङ्गवशिष्ट्यमपेक्षत उभयोरपि गमकतासाम्ये धूमाद्वह्न्यनुमितौ समर्था प्रवृत्तीरासभेनानुमितौ चासमर्थेति किङ्कृतोविशेषः स्यात् तत्तद्धेतोर्गमकतायान्तत्तद्धेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्नसामानाधिकरण्यस्य प्रयोजकत्वेऽपि तस्य रासभ इव धूमेऽप्यसत्त्वया न विशेषकरत्वमिति निरवच्छिन्नत्वघटितस्य तथात्वम्वाच्यन्तस्यापि वह्न्यनुमितिप्रयोजकत्व इव दण्ड्यनुमितेरपि प्रयोजकत्वेऽविशेषाद्दण्डसंयोगस्येव संयोगसामान्यस्यापि दण्डिगमकताम्बास्तविकीङ्कल्पयेद्दृष्टानुसारिणीत्वात्कल्पनायाः दण्डिसंयोगस्य सल्लिङ्गत्वमसल्लिङ्गत्वञ्च संयोगासामान्यस्येति दण्डिसंयोगस्य निरवच्छिन्नत्वघटिताव्याप्तिर्गमकताप्रयोजिका संयोगस्य तु दण्डत्वातिरिक्तधर्म्मान-

वच्छिन्नावच्छेदकत्वघटितेतितु स्वशिष्य एव प्रतिबोधनीये व्याप्तिस्वरूपावधारणात्प्राक् लिङ्गे सत्त्वासत्त्वयोर्दुर्न्निरूपत्वादित्युपरम्यते ॥*॥ अथ यादृशधर्म्मानवच्छिन्ना साध्यतावच्छेदकता तत्तद्धर्म्मावच्छिन्नावच्छेदकत्वानिरूपितत्वमुभयस्थलीयलक्षणप्रतियोगिताविशेषणमस्तु भवतिचैवमक्लेशेन विशिष्यबोधफलश्शब्दानुगमः नच यत्त्वतत्त्वघटितत्वादननुगमः अवच्छिन्नत्वसम्बन्धेन साध्यतावच्छेदकत्वावृतित्वस्याविवक्षितत्वात् निरवच्छिन्नसाध्यतावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्धावप्यवच्छिन्नत्वसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नसाध्यतावच्छेदकतानिरूपितवृत्तित्वाभावस्य नाप्रसिद्धिः यत्तु प्रमेयावच्छिन्नसाध्यतावच्छेदकतायामवच्छिन्नत्वसम्बन्धेन वस्तुमात्रस्य वृत्तित्वावृत्तित्वाभावाप्रसिद्धिरिति तन्न निरूपितत्वसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नसाध्यतावच्छेदकत्वानिरूपितवृत्तित्वाभाववदवच्छेदकतावद्धर्म्मानवच्छिन्नावच्छेदकतानिरूपितत्वस्य विवक्षितत्वात् यद्यपि दण्डिमान्द्रव्यत्वादित्यत्रातिव्याप्तिः प्रतियोगितानिरूपितदण्डत्वनिष्ठावच्छेदकतायास्साध्यतावच्छेदकत्वावृत्तित्वेन तत्तद्धर्म्मानवच्छिन्नावच्छेदकतानिरूपितप्रतियोगितानवच्छेदकत्वात्साध्यतावच्छेदकस्य तथापि स्वसामानाधिकरण्यस्वसाजात्योभयसम्बन्धेन स्वविशिष्टनिरूपितत्वस्य संसर्गत्वे न दोषः नच तथापि तादृशवृत्तित्वाभाववत्सावच्छिन्नदण्डत्वनिष्ठावच्छेदकतामादाय दोषतादवस्थ्यमिति वाच्यं तादृशवृत्तित्वाभाववदवच्छेदकताविशिष्टावच्छेदकत्वानिरूपितावच्छेदकतानिरूपितत्वस्य विवक्षितत्वात् वैशिष्ट्यञ्च निरुक्तोभयसम्बन्धेन बोध्यम् यत्तु किञ्चिद्वृत्तित्वावच्छेदकतात्वगतद्वित्वे साध्यतावच्छेदकतानिरूपितवृत्तितावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितानवच्छेदकत्वं तद्रूपविशिष्टावच्छिन्नाधिकरणधर्म्मानवच्छिन्नावच्छेदकतात्वम्बा विवक्षणीयं नच किञ्चित्वनिवेशादननुगमः धर्म्मवृत्तित्वावच्छेदकतात्वगतसमुदायत्वत्वेन प्रवेशादिति तन्न निरवच्छिन्नघटत्वनिष्ठावच्छेदकत्वस्य प्रमेयसाध्यतावच्छेदकतावच्छेदकस्थले महानसीयवह्निवृत्तित्वविशिष्टजातित्वावच्छिन्नावच्छेदकत्वस्य वह्निसाध्यतावच्छेदकस्थलेऽवृत्तित्वस्य संपादनीयतया धर्म्मवृत्तित्वावच्छेदकतात्वमात्रगतत्वस्याप्रवेशनीयतया प्रतियो-

गितानिरूपितदण्डत्वनिष्ठावच्छेदकत्वेऽवृत्तित्वस्य दुर्व्वारत्वादिति ॥ एवमवच्छिन्नत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन साध्यतावच्छेदकत्ववृत्तिधर्म्मावच्छिन्नावच्छेदकत्वानिरूपितत्वम्प्रतियोगिताविशेषणमुभयस्थलसाधारणमत्राप्यवच्छेदकत्व एव निरूपितत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन वृत्तित्वम्प्रमेयावच्छिन्नावच्छेदकत्वकसाध्यतास्थलेऽव्याप्तिवारणायोपादेयं नच महानसीयवह्नित्ववतो विलक्षणप्रकारितासम्बन्धेन साध्यतायां महानसीयवह्निविषयकज्ञानमहानसीयवह्निविषयकमहानसीयवह्नित्वावच्छिन्नविषयकज्ञानान्यतरत्वेऽतिव्याप्तिः वह्नित्वत्वस्य महानसीयत्वनिष्ठावच्छेदकतायाम्महानसीयत्वत्वस्य वह्नित्वनिष्ठावच्छेदकतायाम्वृत्तित्वादिति वाच्यं साध्यतावृत्तित्वस्यैव स्वनिरूपितावच्छेदकतानिरूपितत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेनावच्छेदकत्वे विवक्षितत्वात् अत्रोभयस्थलसाधारणैकलक्षणद्वयेऽपि स्ववृत्तिभेदीयदण्डावच्छिन्नप्रतियोगितासम्बन्धेन घटसाध्यकदण्डित्वे सद्धेतौ दण्डावच्छिन्नाभावस्यैव लक्षणघटकतया प्रतिपन्नतया तदीयप्रतियोगितायामुक्तविशेषणविरहादव्याप्तिरितिकेषाञ्चित्प्रलापोऽग्राह्यः दण्डिनिष्ठतद्व्यक्तित्वनिष्ठनिरवच्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यैव लक्षणघटकत्वात् यदि कथञ्चिद्यत्र सद्धेतौ सावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यैव लक्षणघटकत्वन्नान्यस्येत्येतादृशस्थल प्रसिद्धिर्भविष्यति भवतान्तदा यत्र साध्यतावच्छेदकतावच्छेदकतादितरोभयानवच्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यैव सद्धेतौ लक्षणघटकत्वन्तादृशस्थलप्रसिद्धिःकिन्न भविष्यत्यस्माकमिति तादृशस्थलकल्पना न उभाभ्यामभ्युपगन्तव्यमेवेति चेन्मैवं प्रागेवलक्षणैक्यस्य दूषितत्वादिति ॥ एतेन स्वावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नसाध्यत्वाभाववद्रूपावृत्तित्वं प्रतियोगितायामुभयस्थलसाधारण्यायास्तु विशेषणं वृत्तिता च स्वावच्छेदकतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन अत्रोक्तसम्बन्धस्य वृत्त्यनियामकत्वेन प्रतियोगितानवच्छेदकत्वे च प्रमेयविशेष्यताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नाया उक्तसम्बन्धावच्छिन्नसाध्यत्वनिष्ठप्रकारकारतानिरूपितविशेष्यत्वनि-

ष्टप्रतियोगिता तन्निरूपकाभावो विवक्षणीय इत्युक्तिरेकत्वादेः पर्य्याप्त्य
नभ्युपगमेन निरस्तापि निरस्ता वेद्येति दिक् ॥ अत एव यत्किञ्चित्
साध्याधिकरणनिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तिताव·
च्छेदकतानवच्छेदकधर्म्मानवच्छिन्नावच्छेदकत्वानिरूपितत्वादिकमे·
कलक्षणसम्पादकविशेषणमपि प्रत्युक्तम् ॥ महानसीयवह्निवृत्तिजाती·
त्यादि वह्निपदमत्र महानसीयपरिचयार्थमेवोक्तन्नत्वभावघटकमप्रयो·
जकत्वात् तदभावप्रतियोगितायां साध्यतावच्छेदकवह्नित्वनिष्ठाव·
च्छेदकतानिरूपितत्वसाध्यतावच्छेदकताविशिष्टान्यजातित्वावच्छि·
न्नावच्छेदकताकत्वद्वयसत्त्वेन तस्य तत एव वारणसम्भवाच्च यत्त्वत्र
साध्यतावच्छेदकनिष्ठसाक्षादवच्छेदकतानिरूपितत्वमेवोभयाभावघ·
कम्बाच्यमन्यथा नित्यज्ञाटस्य विषयितया तादात्म्यविषयित्वान्य·
तरसम्बन्धेन वा साध्यतायान्नित्यज्ञानत्वे नित्यज्ञानान्यत्वविशिष्ट·
घटाभावमात्रस्य लक्षणघटकतया तत्प्रतियोगितायां साध्यतावच्छेद·
कनिष्ठावच्छेदकतानिरूपितत्वस्य परम्परया सत्त्वेन तदभावस्य ल·
क्षणाघटकतयाऽव्याप्तेः नच तदुपादानेऽपि भेदविशिष्टघटस्य विषयि·
तया साध्यतायान्नित्यज्ञानत्वे सद्धेतावव्याप्तिः साध्यतावच्छेदकभे·
दस्य साक्षात्प्रतियोगितावच्छेदकत्वादिति वाच्यं साध्यतावच्छेदकता·
व्यापकावच्छेदकतायास्साक्षान्निरूपितत्वस्योपादेयत्वात् एतस्य व्या·
प्यवृत्तिसाध्यकस्थलत्वेऽपि कालो महाकालान्यत्ववान्महाकालवान्वा·
महाकालत्वादित्यस्याव्यप्यवृत्तिसाध्यकत्वेन महाकालान्यत्वविशिष्ट·
घटाद्यभावमात्रस्य तत्र लक्षणघटकतया तत्प्रतियोगितायामुभयस्यैव
सत्त्वादव्याप्तिवारणायैव साक्षान्निरूपितत्वमुपादेयन्तथाचोक्ताभा·
वस्थले वह्नित्वस्यापरिचायकत्वेऽपि न क्षतिरिति तदेतन्नित्यज्ञानान्य·
त्वविशिष्टघटाद्यभावस्य नित्यज्ञानादावसत्त्वपक्षे न युज्यत इति परि·
चायकत्वमेवास्थेयम् ॥ जातिमद्वान् घटत्वादित्यादाविति अत्र सम·
वायेन जातिविशिष्टस्य समवायेन साध्यत्वम्बोध्यं नतु तादात्म्येन
तथा सति विशिष्टघटाद्यभावप्रतियोगितायामुभयानवच्छिन्नत्वविर·
रहाद्घटाभावस्य प्रतियोगिवैयधिकरण्यविरहाद्घटत्व एवानवच्छेदक·
त्वसत्त्वेनाव्याप्तिर्न स्यात् ॥ पटसमवेतत्वविशिष्टेति वैशिष्ट्यञ्च सा·
मानाधिकरण्यरूपन्नतुस्वरूपसम्बन्धः तथा सति रूपत्वादीनामन·
वच्छेदकत्वापातात् नच सामानाधिकरण्यरूपवैशिष्ट्योपादाने घटप·

टगतद्वित्वसंयोगाद्यन्तर्भावेण द्वित्वत्वसंयोगत्वादीनांपटसमवेतत्ववि-शिष्टतया तदवच्छिन्नस्य हेत्वधिकरणे सत्त्वेन कथनुक्ताभावस्य प्रति-योगिवैयधिकरण्यमिति वाच्यं यद्धटव्यक्तौ पटेन सह संयोगो न जातःपटगतद्वित्वादिकञ्च तद्धटव्यक्ताबुक्ताभावस्य प्रतियोगिवैयधिक-रण्यसम्भवात् पटसमवेतत्वपदस्य घटासमवेतत्वार्थकत्वाद्वा सामा-नाधिकरण्यमेवात्रापि वैशिष्ट्यमिति ॥ तत्तोपलक्षितदण्डव्यक्तिमात्र-स्यैवेति मात्रपदेन दण्डत्वस्यावच्छेदकत्वव्यवच्छेदः उपलक्षितेत्यन्ते-नतत्तयाः व्यक्तीत्युल्लेखात्तद्व्यक्तेः स्वरूपतोऽवच्छेदकत्वपक्षव्यक्तिस्ते-नोक्तग्रन्थस्य नासङ्गतिरन्यथा दण्डत्वस्यातिप्रसङ्गाद्यनापादकत्वविर-हाज्जात्यखण्डोपाध्यतिरिक्तस्य स्वरूपतोवच्छेदकत्वासंभवात्तताया अवच्छेदकत्वम्वाच्यं तथा सति तदवच्छेदकतायां साध्यतावच्छेद-कतावच्छेदकेतरानवच्छिन्नत्वविरहादसङ्गतिः स्यादिति ॥ ननु लाघ-वात्साक्षात्सम्बन्धेन दण्डत्वस्यावच्छेदकत्वम्वाच्यमित्यतआह हेतु-मतीति तथा च व्यभिचारेण लाघवमकिञ्चित्करमितिभावः॥ साध्य-तावच्छेदकताघटकसम्बन्धावच्छिन्नाया इति अथ यद्यपि विषयि-तया रूपत्ववदभावस्य साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्व-निवेशेन यथाश्रुतेनैव वारणं सम्भवति तथापि विषयित्वसमवायान्य-तरसम्बन्धेन रूपत्वविशिष्टसाध्यकात्मघटान्यतरत्वे सद्धेतौ सम-वायेन रूपत्ववदभावस्य विषयितया रूपत्ववदभावस्य च वारणाय साध्यतावच्छेदकतानिरूपितसंसर्गतावच्छेदकधर्म्मावच्छिन्नसंसर्ग-ताकत्वस्य विषायतात्वसमवायत्वान्यतरवत्संसर्गेण रूपत्ववशिष्ट-साध्यके चोक्ताभावद्वयस्य वारणाय साध्यतावच्छेदकतानिरुपित-संसर्गतानिरुपितावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेद-कत्ववद्रूपवृत्तिसंसर्गताकत्वस्य गुणवान्पृथिवीत्वादित्यत्र विषयित्वस-मवायोभयसम्बन्धेन गुणत्वविशिष्टाभावमादायाव्याप्तिवारणाय स्वा-वच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वृत्ति-त्वस्यावश्यमेव विवक्षा कार्य्या एकत्वादेःपर्य्याप्त्यनभ्युपगमपक्षे च साध्यतावच्छेदकतानिरुपितसंसर्गतावच्छेदकतात्वसमनियतसंस-र्गताकत्वम्बिवक्षणीयं सामनैयत्यघटकसंसर्गतायास्संसर्गश्च स्वनिरु-पितावच्छेदकतावत्त्वं तथा च रूपत्वप्रतियोगिकसमवायेन रूपत्ववि-शिष्टसाध्यके तादृशावच्छेदकताकप्रतियोगिताकतादृशाभावाप्रसि-

द्ध्याऽव्याप्तिरिति चेदत्र केचित् साध्यतावच्छेदकताविशिष्टावच्छेद-
कत्वानिरूपितत्वं तदर्थः वैशिष्ट्यञ्च स्वानवच्छेदकसम्बन्धावच्छिन्न-
त्वस्वसामानाधिकरण्योभयसम्बन्धेन तथाच घटत्वादिनिष्ठावच्छेद-
कतायां स्वसामानाधिकरण्यविरहेण विशिष्टत्वविरहाद्घटाभावस्यैव
लक्षणघटकत्वान्नाव्याप्तिः नच समवायेन धूमत्वविशिष्टत्वे सति
कालिकेन धूमत्वविशिष्टस्य साध्यतायां व्यभिचारिण्यतिव्याप्तिः
समवायसम्बन्धावच्छिन्नधूमत्वनिष्ठावच्छेकतायाः कालिकसम्ब-
न्धावच्छिन्नावच्छेदकताविशिष्टत्वादिति वाच्यम् साध्यतानिरूपि-
तावच्छेदकताविशिष्टान्यत्वस्यापि विशिष्टावच्छेदकताविशेषणत्वा-
त् वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्यो-
भयसम्बन्धेन समवायसम्बन्धावच्छिन्नावच्छेदकतायां विशिष्टान्य-
त्वविरहेणातिव्याप्तिविरहात् नचैवमपि प्रमेयत्वावच्छिन्नप्रतियोगि-
कसमवायेन प्रमेयविशिष्टसाध्यके तादृशावच्छेदकताकप्रतियोगि-
ताकतादृशाभावाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् सामानाधिकरण्य-
म्विहाय स्वव्यापकत्वस्य संसर्गतया विवक्षितत्वादिति वदन्ति
परेतु साध्यतावच्छेदकताघटकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व-
साध्यतावच्छेदकनिष्ठत्वोभयाभाववत्त्वं विवक्षणीयम् नच प्रमेय-
त्वावच्छिन्नप्रतियोगिकतादात्म्येन प्रमेयविशिष्टसाध्यकेऽव्याप्तिरिति
वाच्यम् साध्यतावच्छदकताव्यापकत्वस्योभयाभावघटकतया विव-
क्षितत्वात् यत्तु जातिमत्वाज्जातेरित्यत्र विषयितया निखिलजा-
तिविशिष्टाभावमादायाव्याप्तिः साध्यतावच्छेदकताव्यापकत्वविर-
हेणोभयाभावस्य तदवच्छेदकतायां सत्त्वादिति तत्तुच्छं तादृश-
स्थले दण्ड्यादिसाध्यके दण्डत्वस्येव जातित्वस्यैव साध्यताव-
च्छेदकत्वात् अन्यथा तादात्म्येन जातिमतस्तादात्म्येन साध्य-
तायां जातित्वे तादात्म्येन सत्तादिमदभावस्यापि लक्षणघटकत-
याऽव्याप्तेर्दुरुद्धरत्वात् विषयितया जातिमतस्साध्यतायान्तज्ज्ञान-
त्वेऽपि सत्तादिमदभावस्य लक्षणघटकतया अव्याप्तेरशक्यपरिहा-
रत्वादिति प्राहुः ॥ अन्येतु साध्यतावच्छेदकव्यापकनिष्ठत्वघटि-
तोभयाभावनिवेशमिच्छन्ति तन्नातिरमणीयं महाकालानुयोगिक-
कालिकेन घटत्वविशिष्टस्य तादात्म्येन साध्यतायां महाकालत्वे
धर्म्ममात्रस्यैव साध्यतावच्छेदकताघटकसम्बन्धेन साध्यतावच्छे-

दकव्यापकत्वादव्याप्तेः नच कालिकेन गगनस्यावृत्तित्वे विषयितया गगनवदभावमादायाव्याप्तिवारणमिति वाच्यं स्ववृत्तिवाच्यत्ववत्तासम्बन्धेन घटत्वविशिष्टसाध्यकसद्धेतावव्याप्तेर्दुरुद्धरत्वात् साध्यतावच्छेदकप्रतियोगिकसाध्यतावच्छेदकताघटकसम्बन्धेन व्यापकत्वाविवक्षापि स्ववृत्तिवाच्यत्ववत्तासम्बन्धेन प्रमेयविशिष्टसाध्यकस्थलाव्याप्त्या हेया ॥ यत्तु प्रतियोगितावच्छेदकताघटकसम्बन्धेन यत्किञ्चित्साध्यावृत्तिधर्म्मनिष्ठसाध्यतावच्छेदकताव्यापकावच्छेदकत्वानिरूपितत्वमेव वाच्यमेतन्निवेशश्च प्रतियोगिताविशिष्टप्रतियोगिव्यधिकरणहेतुसामानाधिकरणाभावीयप्रतियोगिता भवतीति वैशिष्ट्यञ्च स्वतादात्म्यस्वावच्छेदकताघटकसम्बन्धावच्छिन्नयत्किञ्चित्साध्यनिरूपितवृत्तित्वाभाववद्धर्म्मनिष्ठसाध्यतावच्छेदकताव्यापकावच्छेदकत्वानिरूपितत्वोभयसम्बन्धेन यत्किञ्चित्वनिवेशान्महानसीयवह्न्यनुयोगिकसमवायेन वह्नित्वविशिष्टाभावमादाय नाव्याप्तिः साध्यतावच्छेदकताव्यापकत्वनिवेशात्प्रमेयसाध्यतावच्छेदकस्थले नाव्याप्तिरिति तन्न समवायेन रूपत्वविशिष्टसाध्यकतज्ज्ञानत्वे रूपत्वप्रतियोगिकसमवायेन रूपत्वविशिष्टाभावमादायाव्याप्तेः साध्याधिकरणयत्किञ्चिन्निरूपितवृत्तितानवच्छेदकधर्म्मनिष्ठावच्छेदकत्वानिरूपितत्वविवक्षणे चावच्छेदकतायां प्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नत्वमेव विवक्षणीयन्तथाच गुणवान्द्रव्यत्वादित्यत्र विषयितया गुणत्ववदभावमादायाव्याप्तिः पृथिव्यादिरूपसाध्याधिकरणनिरूपितप्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकवृत्तित्वाप्रसिद्धेस्साध्याधिकरणयत्किञ्चिद्व्यक्तिपदेनात्मन एव ग्राह्यतया तन्निरूपिततादृशवृत्तितानवच्छेदकत्वस्य गुणत्वे विरहेण तादृशधर्म्मान्तरानवच्छिन्नत्वस्य प्रतियोगितायान्तदभावीयायां सत्त्वात् यदि च प्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नवृत्तितावच्छेदकत्वाभावो निवेश्यते तदोक्तदोषविरहेऽपि साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिवेशापेक्षया न लाघवमुक्तावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नाभावनिवेशादरे साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नाभावस्य वक्ष्यमाणस्यैवातिलाघवमालोचनीयमिति दिक् ॥ ० ॥

रूपत्वादिमतो ज्ञानस्येति ज्ञानत्वमत्र परिचायकमात्रन्तेन रूपत्ववज्ज्ञानाभावप्रतियोगितायां साध्यतावच्छेदकतदितरोभयावच्छिन्नत्वसत्त्वेऽपि रूपत्ववदभावस्य प्रतियोगितायान्तदसत्त्वान्न क्षतिः समवायान्यसम्बन्धेन भासमानस्योल्लिख्यमानस्यापि स्वरूपतो भानमङ्गीकृत्याह रूपवानिति अन्यथा रूपत्ववद्वानित्येव ब्रूयात् रूपसाध्यकस्थले तदवच्छेदकतायान्निरवच्छिन्नत्वविरहादिति भावः संयोगेन वह्निसाध्यके विषयितया वह्नित्ववदभावस्य यथाश्रुतप्रतियोगिवैयधिकरण्याविरहात् समवायेन साध्यतायामव्याप्त्यनुधावनमिति बोध्यम् ॥ अव्याप्तिप्रसङ्गादिति अत्र वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यकस्थलाव्याप्तिप्रसङ्गेन प्रतियोगिवैयधिकरण्यघटकनिरूपकतावच्छेद्यतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य यथाश्रुतस्य स्ववृत्तिवाच्यत्ववत्त्वसम्बन्धावच्छिन्नघटत्वादिनिष्ठावच्छेदकताकनिरूपकताकाधिकरणत्वस्य हेत्वधिकरणे सत्त्वेन प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या पारिभाषिकस्य च विवक्षितुमशक्यतया प्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नत्वमेव निवेशनीयमिति विषयितया रूपत्ववदभावस्य प्रतियोगिवैयधिकरण्यसम्भवादव्याप्तिप्रसङ्गादित्यर्थे तात्पर्य्यमिति ॥ ० ॥ सखण्डस्य स्वरूपतोभानासम्भवमत्युपेत्याह यदि चेति रूपत्वन्यूनवृत्तिजातीति न्यूनवृत्तित्वञ्च स्वसमानाधिकरणत्वे सति स्वसामानाधिकरणभेदप्रतियोगितावच्छेदकत्वम् सामानाधिकरण्यञ्च तादृशप्रतियोगितानवच्छेदककर्म्मत्वसंयोगत्वादेः साध्यतावच्छेदकत्ववारणायोपादेयम् सत्त्वगुणत्वयोस्साध्यतावच्छेदकत्ववारणाय विशेष्यदलम् तयोर्जातित्वानङ्गीकारपक्षे स्वभिन्नत्वमेव वाच्यम् संयोगतद्रूपान्यतरत्वादिवारणाय जातीति तादात्म्येन जातिमतस्तादात्म्येन साध्यतायां जातित्वे सत्तान्यजातिमतस्तादात्म्येन साध्यतायां सत्त्वे च लघुसाध्यकेऽव्याप्त्युपेक्षणञ्च तादात्म्येन व्याप्यव्यापकभावस्य सर्वाङ्गीकाराविषयत्वादिति चिन्त्यम् ॥ निरवच्छिन्नावच्छेदकत्वेति एतदभिधानन्तादृशप्रतियोगितानिरूपितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नावच्छेदकत्वाभावघटितलक्षणासत्त्वसम्पादनाय तल्लक्षणस्याविशिष्टसाध्यतावच्छेदकस्थलीयत्वादिति स्वन्यूनवृत्तिजात्याश्रय-

त्वसम्बन्धेनेति इदञ्च स्वसमानाधिकरणजातिमत्त्वस्वाधिकरणत्वादिलघुसम्बन्धस्याप्युपलक्षकतयाभिहितमिति बोध्यं यत्तु रूपत्वन्यूनवृत्तिजातिमत्त्वानित्याकारानुगुण्येन तदभिधानमिति तन्न तत्सम्बन्धेन रूपत्वस्य तथात्वे रूपत्ववत्त्वानित्याकारस्यैव स्वहस्तितत्वेन प्रकृतानुगुण्यस्य स्वहृदयैकमात्रवेद्यत्वात् ॥ अनुमितिविधेयतेति प्रमापरामर्षजन्यानुमितिविधेयतावच्छेदकेत्यर्थः एवञ्चानुमित्यसम्भवादित्यस्यापि प्रमापरामर्षजन्यानुमित्यसम्भवादित्यर्थः नातो दण्डांशे व्यापकतावच्छेदकत्वभ्रमाद्दण्डावच्छिन्नविधेयताकानुमितिसम्भवेऽपि क्षतिः केचित्तु सल्लिङ्गकानुमितेर्भ्रमात्मकपरामर्षमात्रजन्यत्वं सिद्धान्तविरुद्धं कथमन्यथा ज्ञेयत्वादिलिङ्गकवाच्यत्वाद्यनुमितेस्साध्याभाववदवृत्तित्वाद्यवगाहिभ्रमपरामर्षात्सम्भवेऽपि साध्याभाववदवृत्तित्वादेर्व्याप्तित्वानङ्गीकरणञ्चिन्तामणिकृतां घटत इति दण्डावच्छिन्नविधेयताकानुमितरेभावाद्यथाश्रुतमेव सम्यगित्याहुः ॥ प्रतियोगितावच्छेदकतानवच्छेदको यो धर्म्मइति इदमुपलक्षणां दण्डिसंयोगसाध्यके तत्तद्दण्डसय्योगाभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकतावच्छेदकतावच्छेदके प्रतियोगितावच्छेदकतावच्छेदकतानवच्छेदकत्वमपि विवक्षणीयम् एवम्विवक्षाधारैव केचिदित्यनेनास्वरससूचनवीजम्बोध्यम् अनुमित्यापत्तेरिति अथ तादृशानवच्छेदकं यद्दण्डत्वं तद्विशिष्टावच्छिन्नसामानाधिकरण्यज्ञानं दण्डावच्छिन्नविधेयताशाल्यनुमितौ कारणं तादृशानवच्छेदकदण्डत्वावच्छिन्नसामानाधिकरण्यज्ञानञ्च दण्डत्वावच्छिन्नविधेयताशाल्यनुमिताविति सामानाधिकरण्यांशे दण्डादेः प्रवेशाप्रवेशाभ्यां सामग्रीभेदसम्भवेन नापत्तिसम्भव इति चेन्न स्ववृत्तिवाच्यत्ववत्त्वादिसम्बन्धेन वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य धूमत्वे सत्तया तदवच्छिन्नधूमसामानाधिकरण्यग्रहात्समवायेन तद्वच्छिन्नधूमविशिष्टसामानाधिकरण्यग्रहाच्चाभ्रान्तस्य वह्निलिङ्गकधूमानुमितिवारणाय वह्निलिङ्गकधूमविशिष्टामुमितिवारणाय च येन सम्बन्धेन यस्यानवच्छेदकत्वन्तेन सम्बन्धेन तदवच्छिन्नसामाधिकरण्यस्य व्याप्तिघटकत्वन्तादृशसामानाधकरण्यज्ञानस्य च तेन सम्बन्धेन तदवच्छिन्नविधेयताकानुमितौ तादृशसम्बन्धात्मकधर्म्मावच्छिन्न-

विधेयताकानुमितौ च कारणत्वस्वाच्यन्तथा चापत्तेरवारणादिति भावः इदन्त्ववधेयं येनसम्बन्धेन यस्यानवच्छेदकत्वन्तेन तदवच्छिन्नसामानाधिकरण्यग्रहस्तेन सम्बन्धेन तदवच्छिन्नविधेयताकानुमितिप्रयोजकः तद्विशेषिततादृशसम्बन्धात्मकधर्म्मावच्छिन्नसामानाधिकरण्यग्रहस्तादृशसम्बन्धात्मकधर्म्मावच्छिन्नविधेयताकानुमितिप्रयोजक इत्यभ्युपगमेनापत्तिरिति दिधिकृतान्दण्डत्वादेस्साध्यतावच्छेदकत्वानुधावनं यदस्ति तद्विशेषरूपेण संसर्गत्वानभ्युपगमेन अन्यथा साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नसावच्छिन्नावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नतादृशप्रतियोगितावच्छेदकत्वाभावविवक्षणे दोषाभावात्तदनुधावनमफलं स्यादिति ०॥ हेतुतावच्छेदकावच्छिन्नाधिकरणात्वमिति ननुसत्तात्वावच्छिन्नाधिकरणत्वस्यापि हेतावच्छेदकावच्छिन्नाधिकरणातात्वाद्द्रव्यं विशिष्टसत्वादित्यत्राव्याप्तितादवस्थ्यं वह्निज्ञानत्वसाध्यकवह्निहेतौ महानसीयवह्नित्वावच्छिन्नाधिकरणत्वस्यापि हेतुतावच्छेदकावच्छिन्नाधिकरणत्वरूपत्वादव्याप्तिश्चेत्यतो हेतुतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपनिरूपितस्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नवृत्तितावदधिकरणत्वन्निवेश्यमेकत्वादेः पर्य्याप्त्यनभ्युपगमे च स्ववृत्तित्वस्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वोभयसम्बन्धेन हेतुताविशिष्टनिरूपकताकाधिकरणत्वम्वा विवक्षणीयं वृत्तित्वञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वसम्बन्धेन वैशिष्ट्यञ्च प्रागुक्तचतुष्टयसम्बन्धेन एवञ्च महानसीयवह्निसाध्यके समवायेन महानसीयत्वाविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टे सद्धेतौ कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतानिरूपितसमवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकानिरूपकताकाधिकरणत्वस्य तादृशरूपवृत्तिनिरूपकताकाधिकरणत्वेऽपि न क्षतिः अत्र तार्णवह्निजातिमद्वह्निहेतुकयोस्तत्तज्ज्ञानत्वसाध्यकयोस्समवायेन वह्नित्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टहेतुकतज्ज्ञानत्वसाध्यके च वह्नित्वावच्छिन्ननिरूपकत्वजात्यवच्छिन्ननिरूपकत्वघह्नित्वावच्छिन्ननिरूपकत्वसमवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकनिरूपकत्वनिरूपिताधिकरणता आदायाव्याप्तिवार-

णाय स्ववृतित्वघटकवैशिष्ट्यतया स्वसामानाधिकरण्यस्ववृत्तित्व-स्वनवच्छेदकानवच्छिन्नत्वस्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धानां प्रवेशः एवं वह्निहेतुके तज्ज्ञानत्वसाध्यके तार्णवह्नित्वावच्छिन्ननिरूपकत्वनिरूपितां जातिमद्वह्नित्वावच्छिन्ननिरूपकतानिरूपितां जातिमद्धेतुके तज्ज्ञानत्वसाध्यके जातिमद्वह्नित्वावच्छिन्ननिरूपकतानिरूपिताम्वह्निज्ञानत्वसाध्यकवह्निहेतौ कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरुपितसमवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकनिरूपकतानिरूपिताश्चाधिकरणतामादायाव्याप्तिवारणायोक्तानिरूपितत्वघटकवैशिष्ट्यतया स्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्वस्ववृत्तित्वस्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धानां प्रवेशः तथा च वह्निमान्धूमादित्यत्रोक्तनिरूपकताकाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिस्तथा हि धूमवानिति प्रात्यक्षिकप्रतीतेरनियन्त्रितविषयिण्या अधिकरणत्वावगाहित्वेऽपि न तया तादृशाधिकरणत्वसिद्धिस्तद्विषयकत्वेनानुव्यवसीयमानतायास्सन्दिग्धत्वात्तद्विना तस्या अनुपपत्तिविरहाच्च धूमवान् पर्वत इत्यनुमितेर्न्नियन्त्रितविषयिण्या अधिकरणत्वावगाहित्वस्यैव विरहात् न तयापि तत्सिद्धिसम्भवः धूमवानिति शाब्दप्रतीतिर्म्मतुवर्थाधिकरणत्वमवगाहमानाप्यधिकरणत्वे धूमत्वविशिष्टन्निरूपितत्वसंसर्गेण भासयन्ती न धूमत्वावच्छिन्ने तत्र प्रमाणम्भवितुमर्हति नच गुणो गुणकर्म्मान्यत्वविशिष्टसत्तावानित्यस्याप्रामण्याय मतुवर्थाधिकरणत्वे प्रकृत्यर्थभानेऽवच्छिन्नत्वेन प्रकृत्यर्थतावच्छेदकस्यापि तत्र भानमङ्गीकार्य्यमिति कथं धूमत्वावच्छिन्नाधिकरणतान्धूमवानित्याप्तशब्दो न साध्येदिति वाच्यं धूमत्वावच्छिन्नाधिकरणतायां हि न नो विद्वेषः किन्तु तत्पर्वते तत्पर्व्वतीयान्तरसत्त्वे धूमासत्त्वे चान्यत्र धूमसद्भावेऽपि च स्वविषयाधिकरणत्वमप्रमापयन्त्या तत्पर्वतीयधूमवानितिप्रतीत्या तन्महानसीयधूमवानित्यादिप्रतीत्या च सिद्धेभ्यस्तत्पर्व्वतीयधूमत्वाद्यवच्छिन्नाधिकरणत्वेभ्योऽतिरिक्तायां धूमत्वमात्रावच्छिन्नायां नच महानसीयधूमवानिदं ज्ञानं प्रकारितया धूमवदितिप्रतीतिरप्रमा भवन्तीनान्तरेण धूमत्वमात्रावच्छिन्नाधिकरणतां स्वधर्म्मानूतिरस्करिष्यतीति प्रमात्वे स्वप्रकारतावच्छेदकमात्रावच्छिन्नाधिकरणतैवान्त-

र्भावनीया शाब्दात्मिकायां च मतुवर्थे स्वप्रकृत्यर्थतावच्छेदका-
शेषधर्म्मावच्छिन्नत्वस्यैव तदितरानवच्छिन्नत्वस्यापि भाननियमोऽ-
ङ्गीकार्य्य इति प्रमात्वमेव संयोगेन धूमवानिति प्रतीतौ भव-
द्धूमत्वमात्रावच्छिन्नामधिकरणतां साधयिष्यति एवं धूमवानि-
त्याप्तशब्दःकथमकस्मादुक्तशब्दमर्य्यादामतिपतिष्यति तथा च
नापलपितुं शक्यं विवादाध्यासितमधिकरणत्वमिति वाच्यमति-
रिक्ताधिकरणताकल्पनागौरवप्रतिपक्षतर्कस्फूर्त्तिर्विषयितया धूमव-
त्त्वप्रतीतिविशेषप्रमात्वापत्तिभिया विषयितादिसम्बन्धस्थले वैमु-
ख्यमासादयन्त्यपि संयोगादिस्थले प्रमात्वरीतिं शब्दमर्य्यादाञ्च
स्ववश एव स्थापयिष्यतीति विषयितासम्बन्धस्थलीयप्रमात्वश-
रीरे स्वप्रकारतावच्छेदकमात्रावच्छिन्नाधिकरणत्वस्य प्रवेशोऽप्यन्य-
त्र तस्याप्रवेशाद्विषयितास्थले मतुवर्थे स्वप्रकृत्यर्थतावच्छेदक-
धर्म्ममात्रावच्छिन्नत्वभाननियमेऽप्यन्यत्र तदभावाच्चेति सामान्य-
धर्म्मावच्छिन्नाधिकरणतायाम्मानाभावः नचयेमुक्तिस्सिद्धसिद्धि-
भ्यां पराहता प्रमाणत्वावच्छेदेन स्वातिरिक्तधर्म्मानवच्छिन्नत्वसम्ब-
न्धावच्छिन्नधर्म्मनिष्ठप्रकारतानिरूपिताधिकरणत्वनिष्ठविशेष्यतानि-
रूपकज्ञानजनकतायाःप्रमाजनकताप्रतियोगिकस्वरूपसम्बन्धावच्छि-
न्नाभावे प्रागुक्तविशेष्यतायां प्रमानिरूपितत्वाभावे वा तात्पर्य्यात्
परमतप्रसक्तानुवादेन प्रतिषेधत्वाद्वेत्याशयेनाह यद्यपीति इदञ्च
प्राचाम्मते नोक्तमुक्ताधिकरणत्वाभावेऽपि वक्ष्यमाणरीत्या हेत्वधि-
करणत्वनिवेशसम्भवेन नोक्तलक्षणे कापि हानिरिति प्रौढिप्रक-
टनाशयेन वस्तुतस्तु सामान्यधर्म्मावच्छिन्नाधिकरणताङ्गीकार एव
ज्यायान् तथाहि प्रमात्वं हि प्रकारताविशिष्टप्रकारताकज्ञानत्व-
मेवानुगतं वैशिष्ट्यञ्च स्वावच्छेदकाशेषस्वावच्छेदकमात्रावच्छि-
न्नाधिकरणतावन्निष्ठविशेष्यताकत्वस्वतादात्म्योभयसम्बन्धेन तच्च
संयोगेन धूमवत्त्वज्ञाने भवद्बुभुत्सितामधिकरणतां साधयदेव भवि-
ष्यति अन्यथा विशिष्टसत्त्वसत्त्वयोरनतिरेकादेकविशिष्टसत्त्वनिरू-
पितताया अप्यपरविशिष्टसत्त्वनिरूपिततया तया च विशिष्टसत्ता-
वत्त्वबुद्धेः प्रमात्वनियमानिर्व्वाहादधिकरणतानां भेदायावच्छेदक-
भेदकल्पनेऽपि तत्तत्पर्व्वतीयधूमादेर्भिन्नमूर्त्तिकतया तत्तन्निरूपि-
तत्वमात्रेण भेदसम्भवात्पर्व्वतीयधूमत्वावच्छिन्नत्वमपि न स्या-

ज्ञात्यखण्डोपाध्यतिरिक्ततया नानवच्छिन्ननिरूपकत्वसम्भव इतीयन्नहि राज्ञामाज्ञा नच निरूपकस्य तत्र स्वरूपतोऽभानान्न तथेति वाच्यं भासमानधर्म्मस्य निरूपकविशेषणत्वेप्यवच्छेदकत्वे मानाभावात् अथ प्रतियोगिविशेषणतया भासमानतामात्रेण प्रतियोगितावच्छेदकत्ववन्निरूपकतावच्छेदकत्वमपि स्यादेव निरूपकविशेषणतया भासमानतयेति चेद्धूमोनास्तीतिप्रतीतिवद्धूमवानितिप्रतीतिरपि प्रतियोगिविशेषणतया भासमाने धूमत्वमात्रेऽवच्छेदकत्ववत्प्रतियोगिताया निरूपकताया अवच्छेदकत्वं निरूपकविशेषणतयावगाहमाने धूमत्वमात्रे किमिति कल्पयेत् यदि च धूमत्वस्यावच्छेदकत्वे धूमत्वावच्छिन्नप्रतियोगिताकमहानसीयधूमाभावस्य पर्व्वते सत्त्वेन तत्र धूमो नास्तीति प्रतीतेःप्रमात्ववारणायैव धूमत्वमात्रस्यावच्छेदकत्वकल्पनमिति चेत्तदा तादृशप्रयोजनस्याभावेन धूमत्वादिष्ववच्छेदकत्वकल्पनमपि न स्यात्तस्मादसति बाधके सामान्यतो दृष्टानुसारित्वमेव कल्पनायाम्वाच्यमिति प्रतीतौ विशिष्टसत्तावत्तावगाहिन्यामधिकरणत्वऽवच्छिन्ननिरूपकताकत्वस्य दृष्टत्वेन तत्पर्व्वतीयधूमवानित्यत्रावच्छिन्नाधिकरणत्वावगाहित्ववद्विषयितया धूमवानित्यत्र धूमत्वमात्रावच्छिन्नाधिकरणत्वावगाहित्वस्यापि दृष्टतया संयोगेन धूमवानित्यत्र धूमत्वमात्रावच्छिन्नाधिकरणत्वावगाहित्वमपि स्यादेव एवं विशिष्टसत्तावानित्ययं शब्दो विशिष्टसत्तात्वावच्छिन्नाधिकरणताम्बोधयतीतितत्पर्वतीयधूमवानित्यपि तत्पर्व्वतीयधूमत्वावच्छिन्नाधिकरणताम्बोधयेदितिवद्विषयितयाधूमवानितिशब्दो धूमत्वमात्रावच्छिन्नामधिकरताम्बोधयतीति संयोगेन धूमवानित्यपि धूमत्वमात्रावच्छिन्नाधिकरणताम्बोधयदेव एवञ्च नाकस्मात्प्रमात्वभेदकल्पनाप्रसक्तिर्न्नवा मतुपस्स्वप्रकृत्यर्थतावच्छेदकमात्रावच्छिन्नाधिकरणत्वबोधकत्वनियमिरूपशब्दमर्य्यादाभङ्गप्रसङ्गोऽपि नच प्रकृते गौरवरूपबाधकसद्भावादसति बाधके इत्यनुपपन्नं स्यादिति सामान्यनिदर्शनेन तावदेवकल्प्यं यत्र गौरवादिकं प्रसज्यत इति तादृशधूमत्वावच्छिन्नत्वेऽधिकरणतायां स्वीकृतेऽपि नातिरिक्ताधिकरणताप्रसक्तिर्धूमत्वमात्रावच्छिन्नत्वे चातिरिक्ताधिकरणत्वप्रसङ्ग इति गौरवमिति तन्न कल्प्यमिति वाच्यम् अनेकाधिकरणतासु धूमानितिप्रतीतिविषयतासम्बन्धकल्प-

नापेक्षयातिरिक्ताधिकरणताकल्पनाया एव लघुत्वात् सामान्याभावा-
तिरिक्तावयव्यादिस्वीकर्तृभिरपीदृशमेव लाघवादिकमङ्गीकृतमन्यथा
तत्तत्सिद्धिरपि तेषान्न स्याद्विशेषाभावकूटावगाहित्वस्य विलक्षण-
संयोगवद्द्वयवविषयकत्वस्य च सामान्याभावप्रतीतिघटादिप्रती-
त्योस्सम्भवात्प्रतिबध्यप्रतबन्धकभावादेस्तत्तद्धर्मातिरिक्तधर्म्मानव-
च्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारत्वादिघटितरूपादिभिरभा-
ववत्ताबोधप्रमात्वस्य तद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वावच्छि-
न्नानुयोगिताकपर्य्याप्तिकसङ्ख्यावच्छिन्नवद्विशेष्यताकप्रकारताकत्व-
रूपत्वाच्च दोषासम्भवादित्यलम्पल्लवितेन ॥ ० ॥ तथापि हेतुताव-
च्छेदकीभूतधर्म्म इत्यादि अत्राधिकरणतात्रयं हेतुतावच्छेदकसम्ब-
न्धावच्छिन्नं हेतुतावच्छेदकाश्रयत्वमवच्छेदकताद्वयञ्च हेतुतावच्छे-
दकताघटकसम्बन्धावच्छिन्नं ग्राह्यम् तेन कालिकेन धूमाश्रयह्रदनि-
ष्ठाधिकरणतानवच्छेदकत्वाधिकरणतावच्छेदकत्वोभयाभावस्य धूम-
त्वे सत्त्वेऽपि न ह्रदस्य हेत्वधिकरणत्वप्रसङ्गः नवा ज्ञानाभावविषयक-
ज्ञानत्वसाध्यकज्ञानाभावहेतुकसद्धेतौ हेतुतावच्छेदकज्ञानाभावत्वस्य
स्वाश्रयघटोभयविशयकज्ञाननिष्ठप्रतियोगित्वसम्बन्धावच्छिन्नाधिक-
रणतानवच्छेदकत्वघटितोभयाभावसत्त्वेनोक्तज्ञानस्य हेत्वधिकरण-
त्वेऽप्यव्याप्तिः नच विषयित्वसम्बन्धावच्छिन्नाधिकरणतावच्छेदक-
दकत्वस्य धूमत्वे सत्त्वेनोभयाभवस्य धूमत्वे विरहाद्धेत्वधिकरणत्वा-
प्रसिद्ध्या वह्निमान्धूमादित्यत्राव्याप्तिः एवङ्कालिकेन धूमत्वाश्रयाधि-
करणत्वस्य ह्रदे सत्त्वेऽपि न तस्य हेत्वधिकरणत्वप्रसङ्ग एवं विष-
यितया वह्निहेतुके कालिकेन वह्नित्वविशिष्टविषयकज्ञानस्य न तत्प्र-
सङ्गः समवायेन धूमहेतुकस्थले विषयित्वसम्बन्धावच्छिन्नधूमत्वनि-
ष्ठावच्छेदकताकनिरुपकत्वमादाय न हेत्वाधिकरणत्वप्रसङ्ग इति अथ
वह्निज्ञानत्वसाध्यके वह्नौ सद्धेतौ हेतुतावच्छेदकवह्नित्वस्य स्वाश्रय-
महानसीयवह्निविषयकज्ञाननिष्ठमहानसीयवह्नित्वावच्छिन्नाधिकरण-
तानवच्छेदकत्वविरहेणोभयाभाववत्त्वेन तज्ज्ञानस्य हेत्वधिकरणत्वा-
पत्या अव्याप्तिरितिचेदत्र केचित् हेतुतावच्छेदकतात्वावच्छिन्नप्रति-
योगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपे स्वावच्छिन्नाश्रयाधिकर-
णयन्निष्ठाधिकरणतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितानव-
च्छेदकत्वाधिकरणतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छे-

दकत्वोभयाभावस्य एव हेत्वधिकरणत्वेन विवक्षित इति नाव्याप्तिः नन्वत्र द्रव्यं गुणकर्म्मान्यत्वे सति सत्त्वादित्यत्राव्याप्तिर्गुणकर्म्मान्यत्ववैशिष्टयसत्तात्वगतद्वित्वे स्वावच्छिन्नाश्रयाधिकरणगुणनिष्ठाधिकरणतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितानवच्छेदकत्वसत्त्वेऽपि तादृशावच्छेदकत्वविरहेणोभयाभावसत्त्वेन गुणस्यापि हेत्वधिकरणत्वात् गुणकर्म्मान्यत्वविशिष्टसत्तावानितिप्रतीतौ घटवृत्तित्वविशिष्टविशिष्टसत्तावानित्यादिप्रतीत्यनुरोधेन क्लृप्तघटवृत्तित्वविशिष्टविशिष्टसत्तात्वाद्यवच्छिन्नाधिकरणताव्यक्तीनामेव विशिष्टसत्तात्वावच्छिन्नाधिकरणतात्वेन विषयत्वाद्विशिष्टसत्तात्वमात्रावच्छिन्नाधिकरणत्वे मानाभावादिति यदत्र घटवृत्तित्वविशिष्टविशिष्टसत्तावानितिप्रतीतौ घटवृत्तित्वविशिष्टसत्तावानितिप्रतीत्यनुरोधेन क्लृप्तघटवृत्तित्वविशिष्टसत्तात्वावच्छिन्नाधिकरणतैव विषयः तस्याश्च गुणकर्म्मान्यत्वविशिष्टसत्तात्वावच्छिन्नाधिकरणत्वावगाहिन्यान्न विषयत्वसम्भवः नचोक्तप्रतीतिर्निरूपकांशे भासमानगुणकर्म्मान्यत्ववैशिष्टयेऽप्यवच्छेदकत्वावगाहिनीति त्रितयधर्म्मावच्छिन्नाधिकरणतात्वस्योक्ताधिकरणतायाम्विरहेण न तस्यास्तत्प्रतीतिविषयत्वसंभव इति वाच्यं लाघवेनापत्त्यादिविरहेण चोक्तप्रतीतेर्गुणकर्म्मान्यत्वेऽवच्छेदकत्वावगाहित्वाकल्पनादित्युक्तविशिष्टसत्त्वहेतुके नाव्याप्तिस्सम्भवत्यपि तु द्रव्यं घटवृत्ति सत्त्वादित्यत्राव्याप्तिः गुणस्य घटवृत्तित्वसत्तात्वगतद्वित्वावच्छिन्नाश्रयाधिकरणत्वात् तद्वित्वस्याधिकरणतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितानवच्छेदकत्वाच्च घटवृत्तिसत्तावानितिप्रतीतौ तद्घटवृत्तिसत्तावानित्यादिप्रतीत्यनुरोधेन क्लृप्ततद्घटवृत्तिसत्तात्वावच्छिन्नाधिकरणत्वादेरेव घटवृत्तिसत्तात्वावच्छिन्नाधिकरणतात्वेन विषयत्वादिति प्राञ्जजातीयैरुच्यते तदग्राह्यमसत्कल्पतायास्तस्याग्रेस्फुटत्वादिति चेन्न स्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकतानिरूपकताकाधिकरणत्वस्य विवक्षितत्वात् तादृशस्य तद्घटवृत्तिसत्तात्वाद्यवच्छिन्नाधिकरणत्वस्य गुणे विरहात् नच द्रव्यमेव नतु गुणादिरित्यादिग्रन्थे गुणस्याधिकरणत्वविरहप्रयोजकतया विशिष्टसत्तात्वे तादृशावच्छेदकत्वद्वयसत्त्वप्रदर्शनमसङ्गतं गुणस्य प्रागुक्तस्वाश्रयाधिकरणत्वविरहादितिवाच्यं तद्ग्रन्थस्य यथाश्रुताभिप्रायकत्वात् यतोविशिष्टसत्तात्वं गुणनिष्ठाधि-

करणतानवच्छेदकमतो न गुणादिर्य्यतो द्रव्यनिष्ठाधिकरणतावच्छेदकमतो द्रव्यमधिकरणमित्यर्थतात्पर्य्यकत्वाद्वा यत्तु घाटान्यत्वविशिष्टप्रमेयावच्छिन्नाधिकरणत्वस्य धूमत्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकतया तदाश्रयत्वस्य ह्रदादौ सत्त्वेन वह्निमान्धूमादित्यत्राव्याप्तिरिति तन्न प्रमेयत्वावच्छिन्नावच्छेदकताकपर्य्याप्त्यनुयोगितावच्छेदकत्वस्य प्रमयत्व एव कल्पनाद्घटान्यत्वविशिष्टधूमत्वाद्यवच्छिन्नाधिकरणत्वव्यक्तीनामेव विषयत्वाच्चेति दोषासम्भवात्॥ नच महानसीयसाध्यके समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टहेतावव्याप्तिः कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताकवह्नित्वनिष्ठसमवायसम्बन्धावच्छिन्नावच्छेदकताकनिरूपकताकाधिकरणत्वस्य पर्वतेऽपि सत्त्वात् कालिकेन महानसीयत्वविशिष्टवह्निमानितिप्रतीतौ पर्वतीयत्वविशिष्टतादृशवह्नित्वावच्छिन्नाधिकरणत्वादेः क्लृप्तस्यैव विषयत्वात् समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टवानितिप्रतीतौ तत्तन्महानसीयत्वविशिष्टतादृशवह्नित्वावच्छिन्नाधिकरणतानां क्लृप्तानां विषयत्वादिति वाच्यं स्वनिरूपितावच्छेदकतावत्त्वसम्बन्धेन हेतुतावच्छेदकतात्वव्यापकत्वस्योक्ताधिकरणतायां विवक्षितत्वादवच्छेदकतावत्ता च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन बोध्या नैचवमुक्ताधिकरणतायां तादृशपर्य्याप्तिकावच्छेदकताकत्वनिवेशनं व्यर्थमिति वाच्यं गुणान्यत्वविशिष्टसत्त्वस्य हेतुतावच्छेदकत्वे द्रव्यान्यत्वं विशिष्टसत्तानिष्ठावच्छेदकताकनिरूपकताकाधिकरणत्वमादायाव्याप्तेर्वारणीयत्वात् न चैवमपि वह्नित्वविशिष्टज्ञानत्वसाधके समवायेन वह्नित्वविशिष्टहेतुके कालिकसम्बन्धावच्छिन्नसमवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकनिरूपकतामादायाव्याप्तिः वह्नित्वे द्विविधावच्छेदकत्वस्य सत्त्वेऽपि तद्गतैकत्वस्यैव तादृशनिरूपकतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकत्वादिति वाच्यमवच्छेदकताभेदे विलक्षणापेक्षाबुद्धिविषयरूपस्य वह्नित्वमात्रेऽपि तादृशनिरूपकतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकत्वेन द्वित्वस्य स्वीकारात्तार्णवह्नित्ववह्नितार्णत्वगतद्वित्वयोरिवावच्छेदकत्ववैलक्षण्येन भेदवदिति वदन्ति परेतु प्रकृतहेतुतायाः स्ववृत्तिनिरूपकताकाधिकरणतावद्य-

न्निष्ठाधिकरणतानिरूपितानिरूपकतावदन्यत्वाधिकरणतानिरूपकतावत्त्वोभयाभाववत्त्वमस्ति स एव हेत्वधिकरणपदार्थत्वेन विवक्षितः निरूपकतावत्ता च स्ववृत्तित्वसम्बन्धेन स्ववृत्तित्वञ्च सर्वं स्वनिरूपितावच्छेदकतावैशिष्ट्यान्यावच्छेदकत्वानिरूपितत्वसम्बन्धेन वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्वस्वावच्छेदकसम्बन्धावच्छिन्नत्वस्ववृत्तित्वेषु यदुपादेयं तत्सम्बन्धेन तथा च न कोपि दोषः सम्बन्धव्यावृत्तिस्तु प्रायशो विषयित्वसम्बन्धेन हेतुतास्थलेऽव्याप्तिवारणरूपानुसन्धेयेति एवञ्चैकत्वादेः पर्य्याप्त्यनभ्युपगमेऽपि न क्षतिर्न्नवा वह्नित्वमात्रगतद्वित्वाभावेऽपि चोक्तदोष इति प्राहुः॥ इदन्तु बोध्यं व्याप्तिज्ञानस्य कारणता च नोक्तोभयाभावादिविषयिताघटितरूपेण किन्तु हेतुतावच्छेदकावच्छिन्नविषयितानिरूपिताधिकरणत्वविषयतानिरूपिताधिकरणविषयतानिरूपितवृत्तित्वविषयताघटिरूपेणैव तथैव व्याप्तिज्ञानस्यानुमितिकारणस्यानुव्यवसीयमानत्वात् धूमवद्वृत्त्यभावप्रतियोगितानवच्छेदकत्वग्रहे धूमवत्त्वस्य धूमत्वावच्छिन्नाधिकरणतात्वेनावगाहनम्विषयितया धूमवद्वृत्त्यभावप्रतियोगितानवच्छेदकत्वग्रहे च धूमत्वेतरधर्म्मानवच्छिन्नाधिकरणतात्वेन धूमवत्त्वस्यावगाहनान्न प्रमात्वस्यानुपपत्तिः उक्तोभयाभावस्य शब्दानुगमानुरोधेन व्याप्तिलक्षण एव हेत्वधिकरणत्वपरिचायकतया प्रवेश इति ॥ १॥

अथानयोरेकमनुसृत्य विचारप्रसङ्गः तत्र स्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकनिरूपकताकयन्निष्ठाधिकरणत्वं तादृशावच्छेदकताकाधिकरणतावद्यन्निष्ठाधिकरणत्वापेक्षया लघुभूतङ्कुतो न निवेशितमिति पर्य्यनुयोगे प्रतिविधानमुच्यते कैश्चित् तथाहि तादृशाधिकरणत्वस्य यत्पदार्थपरिचायकतयैव प्रवेशेनाभावकोटावप्रवेशादस्मत्पक्ष एव लाघवं युष्मत्पक्षे च तादृशावच्छेदकताकनिरूपकताकत्वस्य परिचायकत्वस्यासम्भवात् पर्वतादिनिष्ठतदधिकरणताघटितोभयाभावप्रतियोगितावच्छेदकत्वस्य लाघवेन प्रतियोग्यंशे भासमाने तदधिकरणताघटितोभयत्वस्यैव कल्पनीयतया पर्वतादीनां तादृशोभयाभावप्रतियोगितानिरूपितपरम्परावच्छेदकत्वरूपहेत्वधिकरणत्वानुपपत्तेरिति तन्न महानसानुयोगिकसंयोगेन धूमहेतुके महानसनिष्ठमहासानुयोगिकसंयोगसम्बन्धाव-

च्छिन्नाधिकरणत्वघटितोभयाभावप्रतियोगितावच्छेदकत्वस्य महा-
नसवृत्तित्वाघटितोभयत्व एव कल्पनीयतया महानसस्य हेत्वधि-
करणत्वानुपपत्त्या गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वाङ्गीकारेणैवै-
तदुक्तिरित्यस्यावश्यवाच्यत्वात्तादृशाभावीयपरम्परावच्छेदकतावद-
धिकरणत्वस्यैव वा विवक्षणीयत्वादिति अत्र वदन्ति धूमवानिति-
प्रतीतौ न पर्व्वतीयधूमत्वाद्यवच्छिन्नाधिकरणत्वादेर्व्विषयत्वं किन्तु
धूमत्वाश्रयनिरूपिताधिकरणतात्वेनततोऽप्यवश्यक्लृप्तेषु तत्तद्व्यक्ति-
निरूपिताधिकरणत्वेष्वेव तथा च धूमत्वगतैकत्वावच्छिन्नानुयो-
गिताकपर्य्याप्तिकावच्छेदकताकनिरूपकताकाधिकरणत्वाप्रसिद्धेस्स्वा-
वच्छिन्नाश्रयाधिकरणत्वमेव विवक्षणीयन्नच द्रव्यं घटवृत्ति स-
त्त्वादित्यत्र प्रागुक्तरीत्याऽव्याप्तिरिति वाच्यं तद्घटवृत्तिसत्तावानि-
तिप्रतीतौ तद्वृत्तिसत्तात्वावच्छिन्नाधिकरणत्वस्य तद्वृत्तिसत्तावानि-
तिप्रतीत्यनुरोधेन क्लृप्तस्य विषयत्वात्प्रयोजनाभावेन घटत्वेऽवच्छे-
दकत्वाकल्पनात् तदधिकरणत्वस्य घटवृत्तिसत्तावानित्यत्र विषय-
त्वासम्भवान्नच तद्घटवृत्तिसत्ताहेतुक एवाव्याप्तिरिति वाच्यं हेतु-
तावृत्तियत्किञ्चिदभावप्रतियोगितावच्छदकताविशिष्टहेतुतावच्छेदक-
तात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपसामान्यस्यैव विवक्षि-
तत्वात् वृत्तित्वञ्च स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगि-
तावच्छेदकरूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकत्वस-
म्बन्धेन वैशिष्ट्यञ्च स्वसामानाधिकरण्यादिना बोध्यन्तथा च
हेतुतानिरूपितघटत्वनिष्ठावच्छेदकताया उक्तावच्छेदकतावैशिष्ट्य-
विरहेण तादृशावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदके
तद्व्यक्तिवृत्तिसत्तात्वावच्छिन्नाधिकरणतावच्छेदकतात्वावच्छिन्न-
पर्य्याप्त्यनुयोगितावच्छेदकत्वसत्त्वान्न पटादीनामधिकरणत्वप्रसङ्गः
सामान्यपदप्रवेशात्घटवृत्तिसत्त्वाभावप्रतियोगित्वमादायैतद्घटस्य
न हेत्वधिकरणत्वप्रसङ्गः एवंच स्वावच्छिन्नानुयोगिताकपर्य्याप्तिका-
वच्छेदकताकाधिकरणत्वप्रवेशेऽपि तद्घटवृत्तिसत्त्वहेतुके तादृशाधि-
करणत्वाप्रसिद्ध्या दोषतादवस्थ्येन तत्स्थलीयदोषवारणप्रयोजन-
कत्वस्य तत्रोक्तौ निगृहीत एव वक्ता स्यात् नच कम्बुग्रीवादिमद्धेतु-
केऽव्याप्तिः प्रतियोग्यंशे भासमानस्यैवातिप्रसङ्गाद्यनापादकस्याप्यव-
च्छेदकत्वाभ्युपगमात् अथ प्रतियोग्यंशेऽभासमानस्याप्यवच्छेदक-

त्वन्तदोक्ताव्याप्तीनाम्वारणाय गुरुधर्म्मस्यापि निरूपकांशे भासमानधर्म्ममात्रस्य चावच्छेदकत्वमङ्गीकार्य्यन्तत्र विशिष्टसत्त्वहेतुके घटवृत्तित्वविशिष्टविशिष्टसत्तात्वाद्यवच्छिन्नाधिकरणत्वावगाहितया विशिष्टसत्तावानितिप्रतीत्युपपादनस्य शक्यतया प्रागुक्तरीत्याऽव्याप्तिवारणाय स्वावच्छिन्नाधिकरणत्वनिवेश आवश्यक इति चेत्पर्व्वतीयत्वादिविशिष्टधूमत्वावच्छिन्नाधिकरणत्वेत्यादिग्रन्थानुरोधेनोक्ताव्याप्तीनाम्वारणाय च किमित्यनतियुक्तिकपक्ष आश्रियते द्रव्यमेव नतु गुणादिरित्यादिग्रन्थस्वारसिकार्थसिद्धये उक्तदोषाणान्निरासाय च या च प्रतीतिरधिकरणतानिरूपकांशे भासमानधर्म्मस्यावच्छेदकत्वं विना नोपपद्यते सावच्छेदकत्वन्तत्रावगाहमानातत्संसर्गतया पर्याप्तिमेवावगाहते अवच्छेदकत्वावगाह्यत्यन्ताभावप्रतीतिवद्यन्निरूपकांशे भासमानधर्मे अवच्छेदकत्वं विनाप्युपपद्यते तस्या अवच्छेदकत्वावगाहित्वस्याप्यप्रामाणिकतया पर्याप्त्यवगाहित्वन्तु स्वतरामप्रामाणिकं ध्वंसप्रतीतिवत्तथासति पर्वतीयधूमवानित्यादिप्रतीतौ पर्वतीयधूमत्वावच्छिन्नमधिकरणत्वन्तादृशधूमत्वाश्रयनिरूपितमधिकरणत्वम्वा विषय इत्यन्यदेतत् धूमवानित्यत्र तु धूमनिरूपिताधिकरतत्वस्यैव विषयत्वं विशिष्टसत्तावानित्यस्या अवच्छेदकत्वावगाहित्वम्विनानुपपन्नाया विशिष्टसत्तात्वपर्याप्तावच्छेदकत्वावगाहित्वमेव गुरुधर्मावच्छिन्नाधिकरणत्वमपिस्वीक्रियत एवोक्तग्रन्थे अवच्छिन्नपदमाश्रयपरमेवेति न तद्ग्रन्थस्यासंगतिरित्येतत्पक्ष एव ततः सयुक्तिराश्रयितव्यस्तत्र न बहुतरकुसृष्टिकल्पनावकाशोपीति गृहाण एवंच समवायेन रूपादिहेतुके रूपत्वनिरूपितसमवायावच्छिन्नाधिकरणतावच्छेदकस्याप्रसिद्ध्या अव्याप्तिः स्यादिति तादृशाधिकरणतावन्निष्ठत्वेनाधिकरणताप्रवेशस्तथाच तादृशविशिष्टसत्ताद्यवच्छिन्नाधिकरणतावच्छेदकत्वस्य प्रसिद्ध्या नाव्याप्तिः विशेषरूपेणसंसर्गता नाङ्गीक्रियत एवेत्याशयः यद्वा यत्पदार्थे स्वावच्छिन्नाश्रयनिरूपिताधिकरणत्वस्याधिकरणत्वे च तद्वृत्तित्वस्योक्त्या स्वाश्रयावच्छिन्ननिरूपितत्वमेवविवक्षितं तादृश्या चोक्तिभङ्ग्या चिन्तामणिदीधित्यादावेव भवितव्यन्नान्यत्रत्यत्र विशेषं नावकल्पयाम इति मार्मिकाः एतेन स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकप्रतियोगिताकहेतुतावच्छेदकसम्बन्धावच्छिन्नयन्निष्ठाधिकरणत्वं विवक्षणीयं ता-

वतापि वह्निमान्धूमादित्यत्र ह्रदस्य हेत्वाधिकरणत्ववारणसंभवात् यत्प-
दार्थे स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताधिकर-
णत्वञ्च वाच्यमित्यपि समाहितम् ॥ ० ॥ अथ विशिष्टाभावमुपेक्ष्योभ-
याभावनिवेशनं कथं कृतमिति न वाच्यम् महानसानुयोगिकसंयोगेन
धूमहेतुकसद्धेतौ विशिष्टाप्रसिद्ध्याऽव्याप्त्यापत्तेरिति ननु हेतुतावच्छे
दकगतरूपे तादृशयन्निष्ठाधिकरणतानिरूपकतावच्छेदकतात्वावच्छि-
न्नपर्याप्त्यनुयोगितावच्छेदकत्वाधिकरणतानिरूपकतावच्छेदकतात्वा-
वच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकत्वगतद्वित्वाश्रयाधिकरणत्वं स एव
हेत्वधिकरणपदार्थ इत्येव वाच्यं लाघवात् नच विषयितया
वह्न्यादिहेतुके विषयित्वसम्बन्धावच्छिन्नाधिकरणतावच्छेदतापर्या-
प्त्यनुयोगितानवच्छेदकत्वाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् घटत्व-
त्वादौ तत्सौलभ्यात् घटत्वनिष्ठानुयोगितावच्छेदकत्वस्य तदेकत्वे
तद्व्यक्तित्वे वा कल्पनीयत्वादन्यथोभयाभावकल्पेऽपि नित्यज्ञानानु-
योगिकविषयितासम्बन्धेन घटहेतुके नित्यज्ञाननिष्ठाधिकरणता-
वच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकत्वाप्रसिद्ध्याऽव्या-
प्तिः स्यादिति चेन्नाधिकरणतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयो-
गितावच्छेदकत्वाभावस्य गगनाभावरूपस्य वह्नित्वगतैकत्वादौ
द्वित्वेन सत्तया विषयितया वह्निहेतुकसद्धेतौ महानसीयवह्नि-
विषकज्ञानस्य हेत्वधिकरणत्वापत्तेः तादृशावच्छेदकतात्वाव-
च्छिन्नाधिकरणत्वतादृशाभावत्वावच्छिन्नाधिकरणत्वगतद्वित्वाश्रया-
धिकरणत्वविवक्षणेप्युक्तदोषतादवस्थ्यमेव तादृशाधिकरणता-
या अपि गगनाभावनिष्ठाया अधिकरणात्मकत्वेन गगनाभा-
वात्मकतया द्वित्वेन तदधिकरणताया वह्नित्वगतैकत्वे सत्त्वात् उ-
भयाभावनिवेशे च तत्कोटौ तादृशावच्छेदकत्वतादृशावच्छेदकत्वा-
भावयोस्तत्त्वेनैव प्रवेशेन तयोरधिकरणत्वरूपत्वेन दोषस्य न संभवः
उभयाभावस्य गगनाभावादिरूपत्वेप्युभयवति तादृशाभावत्वेन स-
त्त्वायोगाच्च तत्प्रणाल्या अपि न तत्संभव इति ॥ वस्तुतस्तु तादृशा-
द्वयवृत्तित्वप्रवेशो घटघटान्यगतद्वित्वस्य तादृशोभयवृत्तितया तदा-
श्रयत्वस्य रूपमात्रे सत्त्वेन विषयितया वह्न्यादिहेतुकस्थले महानसी-
यवह्निविषयकज्ञानादेरपि हेत्वधिकरणत्वप्रसङ्ग इति तादृशद्वयमा-
त्रवृत्तिद्वित्वविवक्षणे च मात्रार्थप्रवेशेनोभयाभावापेक्षया गौरवप्र-

सङ्ग इति सूक्ष्ममीक्षणीयमिति ॥ ० ॥ अथ यद्वृत्त्यभावप्रतियोगितान-वच्छेदकं हेतुतावच्छेदकं तस्यैव हेत्वधिकरणरूपत्वम्बाच्यमुक्तोभ-याभावापेक्षया लघुत्वात् यद्वृत्तिता च स्वप्रतियोगिमत्त्वग्रहविरो-धितावच्छेदकसम्बन्धेन ग्राह्या तेन कालिकेन धूमाभावस्य पर्व-तादिवृत्तित्वेऽपि न क्षतिः गगनाभावभेदादिहेतुकस्थले हेत्वभावस्य गगनानाभावरूपस्य हेत्वधिकरणवृत्तित्वेऽपि गगनाभावभेदाभावत्व-स्य तद्वृत्तितानवच्छेदकतया यद्वृत्तितावच्छेदकानुयोगिताविशिष्टप्र-तियोगितानवच्छेदकत्वविक्षायान्न दोषः वैशिष्ट्यंच स्वनिरूपितत्व स्वनिष्ठानियोगितानिरूपितत्वोभयसम्बन्धेनेति चेन्न वृत्त्यनिया-मकस्य प्रतियोगितानवच्छेदकत्वे तेन हेतुतायां हेतुतावच्छे-दकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः विवक्षणियं च हेतु-तावच्छेदकसम्बन्धावच्छिन्नमेव प्रतियोगित्वं सम्बन्धान्तराव-च्छिन्नहेत्वभावस्य हेत्वधिकरणवृत्तेः पारिभाषिकहेतुतावच्छे-दकसम्बन्धावच्छिन्नत्वं च हेतुतावच्छेदकसम्बन्धावच्छिन्न-प्रतियोगित्वाप्रसिद्धेः सम्बन्धान्तरावच्छिन्नहेत्वभावप्रतियोगित्वे च पारिभाकस्य विरहावृत्तिनियामकसम्बन्धेन सद्धेतौ सा-ध्यानधिकरणस्य हेत्वधिकरणत्वापत्त्या विवक्षितुमशक्यम् स्वा-श्रयाधिकरणत्वस्य यत्पदार्थविशेषणत्वेऽपि विषयित्वादिना वृ-त्त्यनियामकेन वह्निहेतुके महानसीयवह्निविषयकज्ञानस्य हेत्वधि-करणत्वं दुर्वारमेव अथ वृत्त्यनियामकस्य भेदप्रतियोगितावच्छेदकता-वच्छेदकतायास्सर्वानुमतत्वेन यद्वृत्तिभेदप्रतियोगितानिरूपितहेतु-तावच्छेदकसम्बन्धावच्छिन्नावच्छेदकतानवच्छेदकत्वमेव विवक्षित-मिति चेत् । हेतुप्रतियोगिकस्य हेतुतावच्छेदकसम्बन्धत्वे हेत्वधि-करणवृत्तितादृशभेदाप्रसिद्धेरव्याप्तिस्तद्वारणाय हेतुतावच्छेदक-सम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वहेतुताव्यापकत्वोभयाभावनिवेशे-न लाघवं किञ्च प्रमेयधूमादिहेतुकस्थले गुरुधर्म्मस्य प्रतियोगिता-नवच्छेदकत्वे ह्रदादीनामपि हेत्वधिकरणत्वापत्तिः पारिभाषिका-वच्छेदकत्वविवक्षणे च तत्पर्यालोचनेऽतीव गोरवम् प्रतिभाति अत एव हेतुतावच्छेदकगतरूपे स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छे-दकताकनिरूपकताकसम्बन्धितावद्वृत्तिभेदीयप्रतियोगितानिरूपित-प-रपरावच्छेदकतावत्प्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयो-

गितानवच्छेदकत्वं स एव हेत्वधिकरणपदार्थः भेदश्च हेतु तावच्छेदकसम्बन्धावच्छिन्नं-यत्प्रतियोगितावच्छेदकावच्छिन्नसम्बन्धित्वं तदवच्छिन्नप्रतियोगिताकः एवंच कपिसंयोगादिहेतुकसद्धेतौ हेत्वभावस्य तद्भेदस्य च साध्याधिकरणवृत्तित्वेऽपि न क्षतिः उक्तसम्बन्धितावद्व्यक्तिभेदकूटस्यैवात्र प्रवेशात् नच विषयितया प्रमेयवह्निहेतुके सद्धेतौ प्रमेयमहानसीयवह्निविषयकज्ञानस्य हेत्वधिकरणत्वप्रसंगः विषयित्वादीनां वृत्त्यनियामकत्वेन प्रतियोगितानवच्छेदकतया प्रमेयवह्नित्वावच्छिन्नप्रतियोगित्वाप्रसिद्धिरिति वाच्यम् यत्प्रतियोगितावच्छेदकतावच्छेदकधर्मावच्छिन्नसम्बन्धित्वस्यैव विवक्षितत्वात् प्रमेयमहानसीयवह्निविषयकज्ञाने विषयितया प्रमेयवह्निमद्भेदस्य सत्त्वेन तस्य हेत्वधिकरणत्वासंभवात् प्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नत्वं च पर्याप्तिघटितस्वाच्पमन्यथा महानसीयवह्निविषयकज्ञानस्य वह्निमदभावप्रतियोगितावच्छेदकतावच्छेदकवह्नित्वावच्छिन्नमहानसीयवह्निसम्बन्धितावत्त्वेन वह्निविषयकज्ञानस्य च महानसीयवह्निमदभावप्रतियोगितावच्छेदकतावच्छेदकवह्नित्वावच्छिन्नसम्बन्धितावत्त्वेन विषयितया वह्निहेतुके महानसीयवह्निहेतुके चाव्याप्त्यापत्तेः एवंच धूमवद्भेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नसम्बन्धित्वाप्रसिद्ध्या यत्प्रतियोगित्वेन तस्यानुपादेयतया धूमहेतुकस्थले ह्रदादीनां हेत्वधिकरणत्ववारणाय स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदककताकसम्बन्धितावत्त्वं स्वाश्रयावच्छिन्नवत्त्वं वा यत्पदार्थे विशेषणमावश्यकमिति परास्तम् धूमप्रतियोगिकसंयोगेन धूमहेतुकस्थलेऽव्याप्तेः यत्तु हेतुवच्छेदकसम्बन्धावच्छिन्नसम्बन्धित्वीयस्वरूपेण सम्बन्धित्वाभावो निवेश्य इति नोक्तदोषः नच धूमत्वावच्छिन्नविषयित्वादिसम्बन्धावच्छिन्नसम्बन्धित्वस्य प्रसिद्धतया हेतुतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धिताप्रतियोगिकस्वरूपेण तदभावस्य पर्वतादिषु सत्तया धूमवदभावप्रतियोगित्वस्य यत्पदेनोपादेयत्वाद्धूमहेतुके हेत्वधिकरणत्वानुपपत्तिरिति वाच्यं हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वस्य पर्याप्तघटितस्य सम्बन्धितायाम्विशेषणत्वादिति तत्तुच्छं सम्बधित्वात्यन्तामावनिवेशे कपिसंयोगहेतुकेऽव्याप्तेरनिवार्यत्वादुक्तसम्बन्धित्वस्याप्यव्याप्यवृत्तित्वेन तदभावस्य हेतुमति सत्त्वात् विषयितात्वकालिकत्वान्यतरसम्बन्धावच्छिन्नवह्नित्वाव-

च्छिन्नसम्बन्धित्वमादाय विषयितया वह्निहेतुके महानसीयवह्निविषयकज्ञानादेरधिकरणत्वप्रसंगात् महाकालानुयोगिककालिकेन घटादिहेतुकस्थले महाकाले तादृशसम्बन्धित्वाभावस्यासत्त्वेन महाकालस्य हेत्वधिकरणत्वानुपपत्तेः तद्वारणायायासश्च गुरुत्वाद्विफलायासंकरिष्यतीत्यलन्तेनेति ध्येयम् ननु व्यापकतावच्छेदकत्वरूपाभावप्रतियोगियावच्छेदकत्वेन हेतुरेवोपादेयो नतु हेत्वधिकरणत्वं तथाच हेत्वाधिकरणत्वस्य लक्षणाघटकतया तद्विचारोऽर्थान्तरग्रस्त इति चेद्यदि विशिष्टसत्तावानितिप्रतीतेर्विशिष्टसत्त्वस्य गुणे सत्तया तत्राप्रामाण्याय विशिष्टसत्तात्वावच्छिन्नाधिकरणत्वावगाहित्वे विशिष्टसतावान्नेतिप्रतीतेरपि विशिष्टसत्तात्वावच्छिन्नाधिकरणत्वावच्छिन्नभेदावगाहित्वन्तदा विशिष्टसत्तावद्वृत्त्यभावप्रतियोगितानवच्छेदकमिति प्रतीतरेपि विशिष्टसत्ताधिकरणत्वावगाहित्वमेवेति नोक्तप्रतीतिसिद्धाभावस्य हेतुतावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावत्वमिति विशिष्टसत्त्वे हेतावव्याप्तेर्न्न तस्य लक्षणगटकता यद्यपि विशिष्टसत्ता नास्तीतिप्रतीतौ विशिष्टसत्ताभावस्य भासमानत्वेऽपि तस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणतया विरोधित्वकल्पनाद्गुणे प्रमात्वस्योक्तप्रतीतेरिव विशिष्टसत्तावान्नेतिप्रतीतेरपि विशिष्टसत्तात्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदावगाहित्वेऽपि तस्य प्रतियोगितावच्छेदकतावच्छेदकीभूतधर्मावच्छिन्नाधिकरणतया विरोधित्वस्वीकारात्प्रमात्वं गुणेऽप्युपपद्यत इति विषमोदृष्टान्तस्तथापि विशिष्टसत्तावद्वृत्त्यभावप्रतियोगितावच्छेदकभेदस्य तादृशावच्छेदकतात्वावच्छिन्नाधिकरणतयैव विरोधित्वेनतत्कोटौ विशिष्टसत्तात्वावच्छिन्नाधिकरणत्वस्याप्रविष्टत्वात्प्रविष्टस्य विशिष्टसत्त्वस्य गुणसाधारणत्वादुक्ताधिकरणत्वस्य द्रव्यत्वत्वे सत्तयाऽव्याप्तिर्दुरुद्धरैव यत्र विशिष्टसत्त्वं साक्षादवच्छेदकं तत्रैव हि विरोधानिरूपकतया तदधिकरणत्वं व्यवस्थितं प्रकृते च तादृशावच्छेदकत्वस्यैव प्रतियोगितावच्छेदकत्वेन तदवच्छेदकावच्छिन्नाधिकरणताया एव विरोधनिरूपकत्वं तत्र च विशिष्टसत्तात्वावच्छिन्नाधिकरणता कथञ्चिन्नान्तर्भवतीति सूक्ष्ममीक्षणीयम् केचित्त्वभावबुद्धेर्वैशिष्टवैशिष्ट्यावगाहित्वेन धूममवद्वृत्त्यभावप्रतियोगितावच्छेदकत्वन्नास्तीतिबुद्धेर्धूमत्वविशिष्टवैशिष्ट्यावगाहितया भ्रमत्वापत्त्या

न ततोऽर्थसिद्धिः तद्विशिष्टवैशिष्ट्यावगाहित्वं हि तद्गतरूपवृत्तिनिरूपकताकाधिकरणत्वावगाहित्वमेव महानसीयवह्निविषयकज्ञानम्वह्निमद्वह्निविषयकज्ञानम्महानसीयवह्निमदित्यनयोर्विशिष्टवैशिष्ट्यावगाहिनोरन्यथाऽप्रामाण्यानुपपत्तेः धूमवानितिप्रमाया न धूमत्वविशिष्टवैशिष्ट्यावगाहित्वं येन धूमत्वगतैकत्ववृत्यधिकरणत्वासिद्धिस्स्यात्तत्रैव हि विशिष्टवैशिष्ट्यावगाहित्वं यत्र विशिष्टवैशिष्ट्यावगाह्युपलक्षितवैशिष्ट्यावगाहिनोः प्रमात्वाप्रमात्वयोर्विशेषोपलब्धिरिति वदन्ति भवन्ति ते विशिष्टवैशिष्ट्यावगाहिमर्यादान्नातिशेत इति नियमतात्पर्यानभिज्ञाः व्यक्तीभविष्यति हि तदर्थः पृथिवीसमवेतत्वस्योपलक्षणतया प्रतियोगितावच्छेदकत्वोपपादनावसरे भवतु वा धूमत्वावच्छिन्नाधिकरणतावगाहित्वेनोक्तप्रतीतर्भ्रमत्वन्तावतापि तया धूमत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावसिद्धौ किम्बाधकमाकलयन्तीति न विद्मो वयं धूमासत्त्वनिबन्धनभ्रमत्वस्यैव हि तादृशार्थबाधकतायां न्याय्यत्वात् तत्रैव हि विशिष्टवैशिष्ट्यावगाहित्वमित्यादि यदुक्तन्तेन जानीमहे न दृष्टन्तैर्लोहितोष्णीषाधिकरणन्तत्रहि विशिष्टवैशिष्ट्यावगाहित्वस्यौत्सर्गिकत्वं व्यवस्थापितमनुभूयतेऽपि च तदानीमरक्तस्य दण्डस्य सत्त्वेऽत्र रक्तदण्डोऽस्तीतिवादिनं प्रति तद्दण्डालोचनवतामुपहासाद्युपलब्धेरिति ॥ ० ॥ अथ महानसीयवह्न्यभावत्वसाध्यके महानसीयवह्नित्वावच्छिन्नप्रतियोगिताकत्वेन सम्बन्धेन वह्निहेतुके विरुद्धेऽतिव्याप्तिः वह्नित्वगतैकत्वे हेतुतावच्छेदकसम्बन्धावच्छिन्नस्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकमहानसीयवह्नित्वावच्छिन्ननिरूपकताताकाधिकरणतावन्महानसीयवह्न्यभावनिष्ठाधिकरणत्वघटितोभयाभावसत्त्वेन महानसीयवह्न्यभावस्यैव हेत्वधिकरणत्वादतः प्रमीयहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रकारतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वं हेतुतावच्छेदकगतरूपे विवक्षणीयं तथाच लाघवेनोभयाभावमनिवेश्य हेतुतावच्छेदकगतरूपवृत्तिहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रकारतानिरूपितप्रमीयविशेष्यतावत्त्वमेव हेत्वधिकरणपदार्थो वाच्यस्तावतैव सर्वदोषवारणसंभवात्, नचोपलक्षणीभूतस्य निरूपकतानवच्छेदकत्वेऽपि प्रकारतावच्छेदकत्वस्य स्वीकृततयोपलक्षणतया गुणकर्मान्यत्वावगाहिगुणकर्मान्यत्वविशिष्टसत्त्ववान्गुणइतिप्रमीयविशेष्यतावत्त्वस्य

गुणेऽपि सत्त्वाद्द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिरिति वाच्यं हेतुतावच्छेदकगतरूपे स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताकाधिकरणतावद्यन्निष्ठविशेष्यतानिरूपितप्रमीयहेतुतावच्छेदकताकनिरूपकताकाधिकरणतावद्यन्निष्ठविशेष्यतानिरूपितप्रमीयहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रकारतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वस्य विवक्षितत्वात् उपलक्षकधर्म्मस्य प्रकारतानवच्छेदकत्वाच्च नच गुणकर्मान्यत्वसत्वयोः समूहालम्बनबोधस्य गुणकर्मान्यत्वोपलक्षितसत्त्वावगाहिबोधस्य च किम्वैलक्षण्यमिति वाच्यं गुणकर्म्मान्यत्वप्रकारतानिरूपितविशेष्यत्वाभिन्नसत्त्वप्रकारताकत्वतदभावयोरेव वैलक्षण्यप्रयोजकत्वात् एतेन धूमत्वस्य संयोगसम्बन्धावच्छिन्नाधिकरणतामात्रानवच्छेदकत्वस्य व्यवस्थापितत्वेन स्वाश्रयाश्रयाधिकरणत्वस्यैव निवेशनीयतया द्रव्यं विशिष्टसत्त्वादित्यत्रानुपदोक्ताव्याप्तेर्न्न निस्तार इति निरस्तम् विशेष्यतानिरूपितत्वञ्च विशेष्यतानिष्ठनिरूप्यतानिरूपितप्रकारतात्वावच्छिन्ननिरूपकतावत्त्वन्नातः प्रमेयत्ववन्महानसीयवह्निविषकज्ञानवद्वह्निमानितिविषयितया वह्न्यवगाहिवह्न्यंशे तादृशज्ञानमुपलक्षणतयावगाहमानज्ञान मादाय महानसीयवह्निविवयकज्ञानस्य हेत्वधिकरणत्वप्रसङ्गइति चेन्न महानसीयवह्निविषयकवह्निविषयकज्ञानान्यतरद्वह्निमदितिज्ञानमादाय महानसीयवह्निविषयकज्ञानस्य हेत्वधिकरणत्वापत्तेः नच विशेष्यतायामुभयावृत्तिधर्मावच्छिन्नत्वं प्रकारतायाम्वा विशेष्यतावच्छेदकव्यापकविधेयप्रतियोगिकसंसर्गावच्छिन्नत्वम्वा विशेषणं तथा च न दोषइति वाच्यं यादृशसाध्यहेतुकस्थले हेतुमत्ताज्ञानन्नोभयावृत्तिधर्मावच्छेदेन नवाऽवच्छेदकावच्छेदेन चोत्पन्नन्तत्राव्याप्त्यापत्तेरिति यत्तु वह्निज्ञानत्वसाध्यकविषयितास्वरूपान्यतरसम्बन्धेन वह्निहेतुकस्थले महानसीयवह्निविषयकज्ञानं विषयितास्वरूपान्यतरसम्बन्धेन प्रमेयाविशिष्टवदितिज्ञानीयप्रमेयावच्छिन्नप्रकारतामादायाव्याप्तिः तदवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्य तत्तद्व्यक्तित्वैकत्वादिष्वेव सत्त्वादधिकरणतापक्षे च प्रमेयावच्छिन्नाधिकरणत्वाप्रसिद्ध्या न दोषइति तन्न प्रमेयावच्छिन्नप्रकारतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वस्य प्रमेयत्व एव कल्पनात् तादृशप्रकारता-

वच्छेदकताविशिष्टहेतुतावच्छेदकत्वस्य विवक्षया वा दोषासम्भवात् वैशिष्ट्यं च स्वानवच्छेदकानवच्छिन्नत्वस्ववृत्तित्वोभयसम्बन्धेनेति वस्तुतस्तु प्रमीयप्रकारतावच्छेदकत्वन्नविशेषणं प्रकृतहेतुप्रमात्वस्य प्रकृतहेत्वधिकरणत्वघटितत्वेन तस्य चोभयाभावघटितरूपत्वेऽव्याप्तितादवस्थ्याद्धेतुतावच्छेदकावच्छिन्नाधिकरणतारूपस्य धूमहेतुकस्थलानुरोधेन त्यक्तत्वाच्च भ्रमभिन्नज्ञानीयत्वस्यापि स्वप्रकारताविशिष्टप्रकारत्वरूपस्य न निवेशसम्भवः वैशिष्ट्यस्य स्वतादात्म्यस्वावच्छेदकसम्बन्धावच्छिन्नस्वावच्छेदकावच्छिन्नप्रतियोगिताकाभाववन्निष्ठविशेष्यतानिरूपितप्रकारताभिन्नत्वोभयसम्बन्धेन वाच्यतया वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वे वृत्त्यनियामकसम्बन्धेन हेतुतास्थले कथञ्चिदपि तत्सम्भवाभावात् स्वावच्छेदकसम्बन्धावच्छिन्नस्वावच्छेदकीभूतधर्मावच्छिन्नसम्बन्धित्वाभावघटितसम्बन्धोपादाने च धूमहेतावव्याप्तेः यत्तु प्रकारतावच्छेदकतायां हेतुतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य निवेशनीयतया विषयितया वह्निहेतुके स्वरूपेण प्रमेयत्व विशिष्टवह्निविषयकज्ञानमादायाव्याप्तिरिति तन्न प्रकारतयां हेतुतावच्छेदकताघटकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नावच्छेदकत्वानिरूपितत्वस्यैव विशेषणत्वात् नचैवं महानसीयवह्नित्वावच्छिन्नप्रतियोगित्वसम्बन्धेन वह्निहेतुके व्यभिचारिणि कागतिरिति वाच्यम् उभयाभावघटकसामान्यतोधिकरणतावच्छेदकत्वकोटौ हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रकृतहेतुतावच्छेदकसंसर्गघटकतावच्छेदकधर्मावच्छिन्नसंसर्गताकत्वरूपस्य वाच्यत्वात्तथाच महानसीयवह्नित्वावच्छिन्नप्रतियोगित्वघटकतावच्छेदकप्रतियोगितात्वावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगितात्वावच्छिन्नसंसर्गताकाधिकरणतावच्छेदकत्वस्य महानसीयवह्न्यभावनिष्ठाधिकरणतानवच्छेदकत्वस्य च द्वयोर्व्यतिरकाभावस्यैव वह्नित्वे सत्त्वेन हेत्वधिकरणाप्रसिद्धेर्नातिव्याप्तिः तद्धर्मावच्छिन्नघटकतावच्छेदकत्वं च तदवच्छिन्नविषयत्वाभिन्नविशेष्यतावच्छेदकत्वं तेन विषयित्वकालीनसंयोगादिहेतुतावच्छेदकसम्बन्धस्थले न दोषः तादृशप्रतियोगित्वादीनां तद्व्यक्तित्वादिना संसर्गत्वस्यानुभवातीततया तद्व्यक्तिसंसर्गकस्थलस्यासंभवादेव नातिव्याप्तिरिति वयं ब्रूमः ॥ ० ॥ अथ हेतुतावच्छेदकस-

म्बन्धावच्छिन्नस्वाश्रयाश्रयनिष्ठनिरूपकताकाधिकरणतावद्यन्निष्ठहेतु-
तावच्छेदकविषयित्वान्यतरसम्बन्धावच्छिन्नाधिकरणतावच्छेदकता
त्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वं हेतुताच्छेदकगतरूपे वि-
वक्षणीयमुभायाभावो न निवेश्यः विषयित्वसंयोगान्यतरसम्बन्धेन
धूमवानितिप्रतीतेः पर्वतीयधूमादिज्ञाने प्रमात्वेन पर्वतीयधूमत्वाद्य
वच्छिन्नाधिकरणत्वविषयकत्वासंभवाद्वह्निमान्धूमादित्यादावव्याप्त्य-
भावादिति चेन्न विषयितया घटसाध्यके घटज्ञानवृत्तित्वविशिष्ट-
ज्ञानत्वेऽव्याप्त्यापत्तेः समवायेन तादृशज्ञानत्वाभिन्नज्ञानत्वाधिक-
रणीभूतविशिष्टज्ञानत्वविषयकज्ञाने प्रकृतहेतोर्विषयितया सत्त्वेन
तस्य हेत्वधिकरणत्वस्य दुर्वारत्वात् स्वावच्छिन्नानुयोगिताकप-
र्याप्तिकावच्छेदकताकनिरूकताकाधिकरणत्वघटितकल्पे च घटज्ञा
नत्वसाध्यके प्रतियोगितया घटज्ञानाभावहेतुकेऽव्याप्तिः घटज्ञा-
नाभावत्वगतसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकता-
कघटज्ञानाभावविषयकज्ञानाभावत्वावच्छिन्ननिरूपकताकाधिकरणता-
वद्यत्पदार्थीभूतघटज्ञानाभावाविषयकज्ञाननिष्ठान्यतरसम्बन्धाव-
च्छिन्नाधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगिता
वच्छेदकत्वस्य घटज्ञानाभावत्वगतसमुदायत्वे सत्त्वेन घटज्ञानाभाव-
विषयकज्ञानस्य हेत्वधिकरणत्वापत्तेरिति ॥ वस्तुतोऽन्यतरत्वन्न सं-
सर्गतायामधिकरणतानिरूपितायामवच्छेदकं विषयित्वसंयोगान्य-
तरसंम्बन्धेन धूमवान्पर्वत इति ज्ञाने संयोगसम्बन्धावच्छिन्नत-
त्तद्धूमत्वावच्छिन्नाधिकरणत्वव्यक्तीनामेवविषयत्वात् तज्ज्ञानं ता-
दृशान्यतरसम्बन्धेन धूमवदिति ज्ञाने च विषयित्वस-
म्बधावच्छिन्नाधिकरणत्वस्यैव विषयत्वादिति वह्निमान्धूमादि-
त्राव्याप्तिर्दुरुद्धरैवेति बोध्यम् एवं प्रतियोगित्वहेतुतावच्छे-
दकान्यतरसम्बन्धावच्छिन्नाधिकरणत्वनिवेशोऽपि हेय इति ॥
अतएव स्वावच्छिन्नप्रतियोगितानिरूपितानुयोगितात्वहेतुतावच्छे-
दकान्यतरसम्बन्धावच्छिन्नाधिकरणत्वनिवेशोऽपि निरस्तः । नन्वे
वंसंयोगस्वरूपान्यतरसम्बन्धेन धूमहेतुकस्थलेऽव्याप्तिः हेतुताव-
च्छेदकसम्बन्धावच्छिन्नाधिकरणत्वाप्रसिद्धेरम्मैवं हेतुतानिरूपितसंस-
र्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदक-
रूपवृत्तिसंसर्गताया निवेश्यत्वात् रूपवृत्तित्वञ्च स्वावच्छेदकता-

त्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वतद्दशानुयोगितावच्छेदकरूप-
वृत्तिप्रतियोगिताकभेदावच्छिन्नप्रतियोगिताकभेदवृत्तित्वान्यतरसम्ब-
न्धेन एवंचान्यतरसम्बन्धेन हेतुतास्थले प्रत्येकधर्मावच्छिन्नसंसर्गतैव
रूपवृत्तिर्भविष्यति ॥ ० ॥ अथ द्रव्यत्वसाध्यकद्रव्यानुयोगिकसमवा-
यविशिष्टसत्तात्वावच्छिन्ननिरूपितविषयितान्यतरसम्बन्धेन सत्ताहे-
तुकेऽव्याप्तिः यत्पदेन विशिष्टसत्ताविषयकज्ञानस्यापि धारणसंभवा-
त्तन्निष्ठाधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगि-
तानवच्छेदकत्वस्य सत्तात्वगतैकत्वे सत्त्वेऽपि हेतुतावच्छेदकसंस-
र्गघटकप्रत्येकसम्बन्धावच्छिन्नाधिकरणतावच्छेदकतात्वावच्छिन्नप-
र्याप्त्यनुयोगितावच्छेदकत्वविरहणोभयाभावसत्त्वात् । यत्तु य
न्निष्ठानुयोगितानिरूपितहेतुतावच्छेदकसंसर्गप्रतियोगितावच्छेदक-
तात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छदकत्वं विवक्षणीयं तथा च
द्रव्यस्यैव पदार्थतेति नाव्याप्तिस्तत्र धूमत्वस्य संसर्गीयप्रतियोगिता-
यामप्यनवच्छेदकत्वादन्यथा तावन्मात्रविवक्षायामेव सामंजस्ये त-
दुभयाभावनिवेशस्यानौचित्यापत्तेः नच प्रमेयावच्छिन्नप्रतियोगि-
तामादाय ह्रदादीनां धूमहेतुकस्थले हेत्वधिकरणत्वापत्तिरिति वाच्यं
हेतुतानिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वस्य प्र-
तियोगिताविशेषणत्वात् एवं वह्न्यभावत्वसाध्यके संयोगप्रतियोगि-
तान्यतरसम्बन्धेन वह्निहेतुके व्यभिचारिण्यतिव्याप्तिस्तथापि दुर-
द्धरा यत्पदेन पर्वतस्य धारणासंभवात्तन्निष्ठाधिकरणतानवच्छेदक-
त्वस्य सामान्यतोधिकरणतावच्छेदकत्वस्य च द्वयोर्वह्नित्वे सत्त्वा-
दिति चेदत्रोच्यते हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्या-
प्त्यनुयोगितावच्छेदकरूपे स्वाश्रयाश्रयनिष्ठा या हेतुतानिरूपितसं-
सर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपनिरूपि-
तप्रागुक्तान्यतरसम्बन्धावच्छिन्नवृत्तितावत्संसर्गतानिरूपितनिरूपक-
ता तद्विशिष्टान्यत्वाभिविवक्षणीयम् वैशिष्ट्यंच स्वस्यविशिष्टनिरूपकता-
वच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकत्वस्वविशिष्टनिरू-
दकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वोभयसम्ब-
न्धेन प्रथमवैशिष्ट्यञ्च स्वनिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नप-
र्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसंसर्गताकत्वस्वनिरूपिताधिकरण-
तावच्छिन्निष्ठाधिकरणतानिरूपितत्वोभयसम्बन्धेन द्वितीयवैशिष्ट्यञ्च

स्वनिरूपितसंसर्गतावच्छेदकावच्छिन्नघटकतावच्छेदकधर्मावच्छिन्नसंसर्गताकत्वसम्बन्धेन एवंच द्रव्यत्वसाध्यके द्रव्यानुयोगिकसमवायविशिष्टसत्तात्वावच्छिन्ननिरूपितविषयितान्यतरसम्बन्धेन सत्ताहेतुके नाव्याप्तिः सत्तात्वगतैकत्वे स्वाशयाश्रयनिष्ठविशिष्टसत्तात्वावच्छिन्ननिरूपितविषयित्वसम्बन्धावच्छिन्नविशिष्टसत्तात्वावच्छिन्ननिरूपकताविशिष्टत्वस्यैव सत्त्वेन तन्निरूपिताधिकरणतावतो यत्पदार्थत्वाभावात् उक्तव्यभिचारिणि तु वह्नित्वगतैकत्वे संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्ननिरूपकताविशिष्टान्यत्वसत्त्वेन तन्निरूपकतानिरूपिताधिकरणतावतः पर्वतस्य यत्पदार्थत्वसंभवेन नातिव्याप्तिरपीति नच यत्त्वघटितत्वादननुगमइति वाच्यं हेतुतावच्छेदकगतरूपवृत्तिभेदप्रतियोगितानिरूपिता या तादृशनिरूपकतात्वावच्छिन्नावच्छेदकता तन्निरूपितादृशावच्छेदकतात्वनिष्ठावच्छेदकतानिरूपितोभयत्वावच्छिन्नसंसर्गतानिरूपितावच्छेदकतावदभावीयप्रतियोगितानिरूपितपरंपरीयस्वनिष्ठावच्छेदकतानिरूपिता या तादृशसंसर्गताकत्वत्वनिष्ठावच्छेदकतानिरूपितोभयत्वावच्छिन्नसंसर्गता तन्निरूपितत्वसम्बन्धावच्छिन्नाधिकरणत्वनिष्ठावच्छेदकतानिरूपिताया स्वनिरूपिताधिकरणत्वनिष्ठावच्छेदकतानिरूपिताधेयत्वसम्बन्धावच्छिन्नावच्छेदकता तद्वत्त्वेन यत्पदार्थानुगमादिति प्रमीयप्रकरतानिरूपितावच्छेदकत्वस्य हेतुतावच्छेदकविशेषणत्वपक्षे च हेतुतावच्छेदकगतरूपे हेतुताविशिष्टप्रमीयप्रकारतानिरूपितयान्निष्ठाधिकरणताविशिष्टान्यत्वं स एव हेत्वाधिकरणपदार्थः वैशिष्ट्यंच प्राथमिकं स्वावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वस्वानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपनिरूपितप्रागुक्तान्यतरसम्बन्धावच्छिन्नवृत्तितावत्संसर्गताकत्वोभयसम्बन्धेन द्वितीयं च स्वावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकत्वस्वानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसंसर्गताकत्वोभयसम्बन्धेन तृतीयं च स्वनिरूपितनिरूपकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकत्वस्वनिरूपितनिरूपकतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसंसर्गताकनिरूपकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वोभय-

सम्बन्धेनेति बोध्यम् ॥

व्याप्तेरैक्यव्यवहार इति तथाचैकाव्याप्तिरित्यत्रैकपदमेकधर्मावच्छिन्ननिरूपकताकैकधर्मावच्छिन्नानुयोगिताकपरमितिभावः ॥ नन्वेवमिति एवं पक्षधर्मांशे विशेषणतयाऽनुमितिजनकतावच्छेदकत्वरूपव्याप्तित्वस्य सामानाधिकरण्यमात्रे स्वीकारेऽप्यैक्यव्यवहारोपपादने, इत्याशंकायामित्यादि, तथाच सामानाधिकरण्यावच्छिन्नप्रकारकज्ञानस्यैवकारणत्वेन तस्य पक्षधर्मे दृष्टान्तसाधारणे महावाक्यादावुपनीतसामानाधिकरण्यविषयकत्वेन संभवितया पक्षधर्मधूमादिविषयकपरामर्षस्यासम्भवेऽपि क्षत्यभावेन परामर्षासम्भवशङ्कायाएवानुत्थानात्सिद्धान्ताभिधानमनुचितमिति अत्र यथा तत्सङ्गतिस्तथा तामादायैवेत्याद्यग्रिमग्रन्थे व्यक्तीभविष्यतीतिभावः ।

केचित्तु नन्वेवमिति, एवम् एकपदस्य भाक्तैक्यपरत्वे, इत्याशङ्कायातित्यादि, तथाच व्याप्तौ भाक्तमेवैक्यंव्यवह्रीयेतचेत्कथं सामान्यप्रत्यासत्यनंगीकारपक्षे व्याप्तिज्ञानासम्भवमाशंक्य व्याप्त्यैक्यमुच्येत तादृशैक्यसद्भावेपि व्याप्तिज्ञानासम्भवस्यानुद्धारादिति भावः । अथैवं वस्तुतस्त्वित्यादिग्रन्थेऽनेकस्वरूपसामानाधिकरण्यात्मकव्याप्त्यभिधानं सन्दर्भविरुद्धं स्यादिति चेत्सत्यं यद्रूपविशिष्टसमानाधिकरणेत्यादिना प्रथमं सामानाधिकरण्यमात्रस्य व्याप्तित्वमभिधायैक्यव्यवहारं च तत्रकथञ्चिदुपपाद्य तत्रदूषणपूर्वकं सामान्यलक्षणप्रत्यासत्त्यंगीकारानङ्गीकारमतभेदेन सिद्धान्तभूतं भाक्तमुख्यैक्यव्यवहारविषयं व्याप्तिद्वयं बोधयतो वस्तुतस्त्वित्यादिग्रन्थस्य नहि सन्दर्भविरोधः एवञ्च सामानाधिकरण्यमात्रव्याप्तिपक्षविशिष्टव्याप्तिपक्षयोः प्रथमे सदोषत्वस्य द्वितीयपक्षाभिधायकग्रन्थ एव व्यक्तत्वात्परमर्षीयसिद्धान्तग्रन्थसङ्गतिरूपतद्ग्रन्थाप्रकाशितद्वितीयपक्षानुगुण्यप्रकाशनमात्रतात्पर्यकस्य नन्वेवमित्यादिग्रन्थस्यापि द्वितीयेऽपिपक्षे द्वितीय एवोक्तानुगुण्यं सर्वथा निर्दोषत्वञ्चेति प्रकटयितुं ननुहेतुनिष्ठेत्याद्यपि वक्ष्यतीति वदन्ति । अनुमितिः स्यादित्यापत्तिरिति, तथाचोक्तसामानाधिकरण्यावच्छिन्नप्रकारकज्ञानत्वरूपकारणतावच्छेदकावच्छिन्नस्य रासभपरामर्षस्थलेऽपि सत्वेन तत्रानुमित्यनुत्पत्त्यान्वयव्यभिचार इति भावः ॥ सामानाधिकरण्यावच्छिन्नप्रकारकज्ञानत्वेन परामर्षस्य न सामानाधिकरण्यमात्रे व्याप्तित्वस्वीकारेऽपि कारणता स्वरूपासिद्धे स्तादृशनि-

खिलज्ञानाविरोधितया हेत्वाभासतानुपपत्तेः किन्तु तादृशसामानाधिकरण्यात्मकव्याप्तिप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नविशेष्यत्वघटितधर्म्मेणैव तथाच रासभपरामर्षाज्ञानुमित्यापत्तिः नचैवमपि रासभे व्याप्यत्वव्यवहारो न वारित इति वच्यं तद्धर्म्मावच्छिन्ने व्याप्यत्वव्यवहारे तद्धर्मावच्छिन्नव्यापकसामानाधिकरण्यस्यैव प्रयोजकत्वादित्याशयेनाह नचेत्यादि॥ "धूमत्वादेस्तत्रप्रवेशे तद्घटितस्यैवेति" एवकारेण सामानाधिकरण्यमात्रस्य व्यवच्छेदः तथाच सामानाधिरण्यमात्रस्य व्याप्तित्ववादिभिस्तदुपपत्तये हेतुव्यापकसाध्यसामानाधिकरण्यमात्रप्रकारकज्ञानस्य कारणत्वम्वाच्यम् एवञ्च पक्षे धूमदर्शनेऽसति सतित्ररासभदर्शने उपनीतधूमव्यापकवह्निसामानाधिकरण्यप्रकारेण रासभस्य वह्निधूमविरहिणि पक्षे प्रमापरामर्षाद्धूमलिङ्गकानुमित्यापत्तिः नचैवं रासभवानितिज्ञानाकारलेखनमसङ्गतमितिवाच्यम् यथाश्रुताभिप्रायेणतल्लेखनात् सामानाधिकरण्यमात्रप्रकारकेत्यनेन तदरिक्तहेतुतावच्छेदकप्रकारत्वस्य कारणतावच्छेदकघटकत्वस्यैव व्यवच्छेदात्तावतैव सामानाधिकरण्यमात्रस्य व्याप्तित्वसिद्धेः नहि ज्ञानेऽतिरिक्तप्रकारकत्वस्य वैफल्यादित्यत्र वा तात्पर्यात् नचासिद्धेराभासत्वानुपपत्तिः अनुभवसिद्धप्रतिबन्धकत्वान्तरस्यतैरप्यङ्गीकरणादितिभावः। कश्चिदेतद्ग्रन्थस्य धूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वत इतिज्ञानस्यकारणत्वे पक्षधर्मांशे सामानाधिकरण्यधूमत्वोभयोः प्रकारतया व्याप्तित्वेन मदिष्टसिद्धिरित्येतदर्थकतया धूमत्वादिमतितादृशसामानाधिकरण्यमिति दीधितेर्धूमत्वविशिष्टविशेषणतापन्नसामानाधिकरण्यरूपैकधर्म्मिविशेषणतापन्नसामानाधिकरण्यहेतुतावच्छेदकोभयार्थकतया च व्याख्यानं कुरुते तन्न सर्वथा चारु तदुभयोर्व्याप्तित्वे हेतुव्यापकसाध्यसमानाधिकरणप्रकृतहेतुतावच्छेदकावच्छिन्नवत्ताज्ञानस्यैव कारणत्वप्रसंगेन सत्वस्य गुणेऽपीत्यादिग्रन्थोऽसङ्गतःस्यादिति, अथ धूमत्वादिमतीत्यादिना लब्धस्य धूमत्वसामानाधिकरण्यापन्नस्य सामानाधिकरण्यसम्बन्धेन धूमत्वविशिष्टस्य वा सामानाधिकरण्यस्य धूमत्वत्वप्रवेशप्रयुक्तगौरवेण विषयितया कारणतानवच्छेदकत्वेप्याधेयतया धूमविशिष्टतादृशसामानाधिकरण्यस्य तत्वन्तातपर्येणवाच्य न्तदप्यनुपपन्नमवच्छिन्नत्वसम्बन्धेन धूमत्वविशिष्टस्यैव तस्य तथात्वौचित्याद्धूमस्याप्रवेशेन-

लाघवादिति चेन्न सम्बन्धसामान्येन प्रकारत्वाद्यतिरिक्तेन स्वातन्त्र्येणोल्लिखिततया भासमानस्य स्वरूपतोभानानङ्गीकारे विपरीतगौरवात् धूमत्वावच्छिन्नत्वस्य रासभादिवृत्तित्वसाधारण्यवारणाय समवायसम्बन्धावच्छिन्नधूमत्वनिष्ठावच्छेदकताकत्वरूपस्य वाच्यतया गौरवादितिकेचित् तन्न आधेयत्वस्यापि स्वरूसम्बन्धावच्छिन्नस्यैव संसर्गताया वाच्यतया तत्प्रयुक्तगौरवस्याभावादिति ॥

धूमनिष्ठताद्दृशसामानाधिकरण्यस्य व्याप्तिरूपत्वे मूललभ्यतान्दर्शयति तस्येतीत्यादि, तथाच तेनसमं तस्य व्याप्ति स्तेनसमंतस्य सामानाधिकरण्यमिति मूलयोजनयैव धूमनिष्ठसामानाधिकरण्यस्य व्याप्तित्वं लभ्यत इति भावः अत्र तेन समं तस्य व्याप्तिरितीतरभेदानुमित्युद्देश्यरूपलक्ष्यपदार्थप्रतिपादकमूलभागव्याख्यानरूपतद्रूपविशिष्टस्येत्यादि दीधितिव्याख्यानावसरएव द्रव्यत्वादिरूपेणेत्यादिग्रन्थेन लक्ष्ये तत्पदार्थप्रवेशफलमभिहितं लक्षणे तत्प्रवेशफलं रासभादिसाधारण्यवारणन्दीधितावेवोक्तं तेन च रासभसामानाधिकरण्यस्यानुमितिजनकतानवच्छेदकत्वेन तत्रोक्तसामानाधिकरण्यरूपहेतोस्सत्वेन व्यभिचारप्रदर्शनं कृत मित्य वधेयम्। ग्रन्थानुपपत्तीति यद्यपि द्वितीयव्याप्तिज्ञानस्यसामान्यलक्षणासत्वासत्वयोरेवसंभवात्सामान्यप्रत्यासत्यभावेप्रथमव्याप्तिज्ञानसंभवानुपपत्तिरेवदोषत्वेनोद्भावयितुमुचिता तथापि सामान्यप्रत्यासत्यभावेपि विशिष्टवैशिष्ट्यावगाहिबुद्धौविशेषणतावच्छेदकप्रकारकज्ञानस्यैव कारणत्वमंगीकार्यन्नतुविशिष्टबुद्धौविशेषणज्ञानस्येतिव्यवस्थाप्योक्तव्याप्तिज्ञानस्योपपाद्यत्वाद्विशेषणज्ञानकारणत्वावलम्ब्युक्तग्रन्थानुपपत्तिरेवोद्भाविततेतिबोध्यम्। पक्षे साध्यसन्देहे साध्यसामानाधिकरण्यविशिष्टस्यतत्रपरामर्षासंभवात्सामानाधिकरण्यांशस्योपलक्षणतयैव विषयत्वांगीकारेण विशिष्टसत्ववृत्तिताद्दृशसामानाधिकरण्यावच्छिन्न प्रकारकगुणविशेष्यकप्रमयानुमित्यापत्तिरित्याह किंचेति, किम्वेत्यर्थः वाकारोनास्थायां तथा च धूमत्वादिमति सामानाधिकण्यमित्यस्योभयव्याप्त्यर्थकतांस्वीकृत्य तादृशसामानाधिकरण्यहेतुतावच्छेदकोभयधर्मावच्छिन्नप्रकारताशालिज्ञानत्वेनकारणत्वोक्तावुक्तदोषासंभवेपि न क्षतिरिति केचित्। परेतु धूमत्वादिमतीत्यस्ययथाश्रुतार्थलभ्याधूमादिविशिष्टसामानाधिकरण्यरूपव्याप्तिरेवदूषिताकिंचेत्यादिनातात्पर्योपवर्णितोभयात्मकव्याप्तौविशिष्टव्या-

मौचग्रन्थानुपपत्तिरेवदोषोबोध्य इत्याहुः । अन्येतु भयत्वस्यैकविशिष्टापरत्वरूपतयोभयस्यव्याप्तित्वं सामानाधिकरण्यविशिष्टधूमत्वेधूमत्वविशिष्टसामानाधिकरण्येवापर्यवस्यतीति तत्रैकत्रदूषणमुक्तं संगच्छत एवेतिवदन्ति तत्रोभयव्याप्तिज्ञानकारणतानन्तर्भूततादृशसामानाधिकरण्यत्वावच्छिन्नप्रकारतानिरूपितधूमत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्नकारणताया नचेत्यादिपूर्वग्रन्थोक्ताया अनिराकृतत्वप्रसंगेन सन्दर्भविरोधोनातिदोषतामासादयतीत्यलम् ॥

गुणेपिद्रव्यत्वानुमितिःप्रमास्यादिति, अथात्रतादृशानुमितौप्रमात्वम्वापाद्यत आहोस्वित्प्रमात्वविशिष्टानुमितिर्वा ?नाद्यः, विशिष्टसत्वव्यापकद्रव्यत्वसमानाधिकरणविशिष्टसत्तावान्गुणइतिपरामर्षोत्तरे तत्रापादकाभावात् तादृशसामानाधिकरण्यवत्सत्तावानगुणइतिज्ञानोत्तरे ऽनुमितित्वस्यैवविरहेणापादकासत्वादनुमितेरुद्देश्यत्वासंभवाच्च । नद्वितीयः, प्रमात्वविशिष्टतादृशानुमितिरूपापाद्याप्रसिद्धेः । एवंप्रथमेचयत्रयत्रप्रमापरामर्षजन्यत्वं तत्रप्रमात्वमितिव्याप्तिसिद्धापादकत्वकप्रमापरामर्षजन्यानुमित्वमापादकमभिमत न्तदपिप्रमापरामर्षजन्यत्वस्य समूहालम्बनानुमितावांशिकभ्रमरूपायां व्यभिचारित्वेनासंभवि । नचतद्वतितत्प्रकारकत्वमेवव्यापकमिष्टापत्तेः । नचप्रमापरामर्षमात्रजन्यत्वं व्याप्यं, प्रमापरामर्षमात्रजन्यायां लाघवज्ञानादिजन्यभ्रमानुमितौ व्यभिचारात् प्रकारतावच्छेदकएवतत्रविधेयतावच्छेदकत्वपक्षस्य युक्तत्वात् अतएवविधेयताविशिष्टोद्देश्यताकत्वमेवव्यापकं वैशिष्ट्यञ्च स्वनिरुपितत्व स्वविशिष्टनिरुपकताकाधिकरणतावद्वृतित्वोभयसम्बन्धेन स्ववैशिष्ट्यञ्च प्रसिद्धचतुष्टयसम्बन्धेनेतिनिरस्तं वह्नित्वेनघटावगाहिवह्निमान्पर्वतइतिभ्रमानुमितेः प्रमासमानाकारत्वे उक्तस्य व्यापकत्वसंभवेपि तस्यातथात्वे तत्रैवव्यभिचाराच्च नचप्रमासजातीयत्वं व्यापकं तत्वंचोक्तोद्देश्यताविशिष्टोद्देश्यताकत्वं वैशिष्ट्यञ्चस्वावच्छेदकधर्मावच्छिन्नत्व स्वनिरुपितविधेयताविशिष्टविधेयकत्वोभयसम्बन्धेनेतिवाच्यं सामानाधिकरण्यघटित प्रसिद्धचतुष्टयस्य संसर्गत्व उक्तदोषतादवस्थ्यं तद्विकलस्य त्रितयस्यतथात्वे सन्गुणइति प्रमीयसत्वनिष्ठनिरवच्छिन्नविधेयताविशिष्टत्वस्य गुणोद्रव्यमित्यनुमितीयनिरवच्छिन्नद्रव्यत्वनिष्ठविधेयत्वेसत्वेनेष्टापत्तेः स्वावच्छेदकावच्छिन्नत्वघटितस्य संसर्गत्वे च सनगुणइतिप्रमायां व्यभि-

चारः उक्तदोषैरेवबह्नितीयकल्याभिमतं यत्र यत्र प्रमामर्षाव्यवहितो-त्तरत्वं तत्र प्रमानुमित्यधिकरणत्वमिति व्याप्तिसिद्धापादकताक मप्यापादक न्निरस्त मितिचे दुच्यते ? उक्तपरामर्षो यदि भ्रमत्वनि-रूपितद्रव्यत्वविधेयताप्रयोजकस्वातिरिक्तदोषघटितसामग्रीविरहवि-शिष्टत्वेसति द्रव्यत्वविधेयताकानुमितिपूर्वत्वविशिष्टप्रमापरामर्षत्व-वान्स्यात् प्रमात्वनिरूपितद्रव्यत्वविधेयताकानुमित्यव्यवहितपूर्व-त्ववान्स्यादित्यत्रापत्तौ तात्पर्यान्नकश्चिद्दोषः भ्रमत्वप्रयोजकलाघव-ज्ञानघटितसामग्रीसमवहितप्रमापरामर्ष आपाद्यव्यभिचारवारणाय-सत्यन्तं पक्षआपादकप्रसिद्ध्यर्थमतिरिक्तान्तं समूहालम्बनस्थले व्य-भिचारवारणाय विधेयत्वविशेषप्रवेश अतएव प्रमापरामर्षादेवो-त्पत्तिकालावच्छिन्नोघटोगन्धवानित्यनुमितेः स्वीकारेपिन क्षतिः प्र-तियोगिव्यधिकरणाभाववदवृत्तित्वादिघटितप्रमात्वस्या पि निर्वा-च्यत्वा च्चे त्यभिसन्धि रिति ० ॥

"तत्प्रकारिकैवेति "एवकारेण धूमत्वावच्छिन्ने तादृशसामाना-धिकरण्यप्रकारकत्वव्यवच्छेदः नन्वेवं तादृशसामानाधिकरण्यविशि-ष्टधूमत्ववद्धूमवान्पर्वत इति ज्ञानस्य कारणत्वं यर्थवसितं तन्न यु-ज्यते लाघवेन तादृशसामानाधिकरण्यविशिष्ट वद्धूमवान्पर्वत इति ज्ञानस्यैवकरणत्वौचित्यात् सामाधिकण्यविशिष्टधूमत्ववद्वानिति ज्ञानस्यकरणत्वन्तु धूमत्वनिष्ठनिरवच्छिन्नावच्छेदकताकप्रतियो-गिताकाभाववद्ध्रदादिरूपस्वरूपासिद्धिज्ञानस्य प्रतिबन्धकत्वानुप-पत्या ऽसंभवि हेतुतावच्छेदकावच्छिन्नविशेष्यत्वस्य कारणातावच्छे-छकगर्भेनिवेशादेवनगुणेद्रव्यत्वानुमितेः प्रमात्वप्रसंगः सामान्यप्र-त्यासत्यभावेपि तद्दृशसामानाधिकरण्योपलक्षितधूमत्वस्य स्मृतस्य पर्वतीयधूमे विषेशणत्वसंभवेन तादृशसामानाधिकरण्यवद्धूमवान्प-र्वत इति ज्ञानापेक्षया गुरुधर्मावच्छिन्नकारणाताकस्य तज्ज्ञानस्य कारणत्वसंभवः नचैवं विरोधस्य हेत्वाभासातानुपपत्तिः अनुमिता-वेव तस्यविरोधित्वात् अनुभवसिद्धप्रतिबन्धकत्वस्य व्याप्तिबुद्धावेव ग्राह्याभावानवगाहिनोपितज्ज्ञानस्य वा कल्पनादि त्याशंका मिष्टापत्या परिहरति तत्रचनीलघटत्वेत्यादिना, सामानाधिकरण्यसम्बन्धेन नैल्प प्रकारेण घटत्वज्ञान उल्लिख्यमानस्यापिघटत्वस्य घटत्वत्वेनानुल्लेखा द्यथा न तेन भानम् तथा तादृशसामानाधिकरण्यप्रकारेण भासमान-

स्यापि धूमत्वस्य न धूमत्वत्वेनभान न्तथाच तादृशसामाना धिकरण्यविशिष्टवद्धूमवान्पर्वतइतिज्ञानस्यैव तादृशसामानाधिकरण्यविशिष्टधूमत्वस्य व्याप्तित्वपक्षे कारणत्व मभिमतं नतु तादृशसामानाधिकरण्यविशिष्टधूमत्ववद्धूमवानितिज्ञानस्य यतो गौरव मिति भावः स्वरूपतएवे त्यत्रैवकारेण धूमत्वांशेस्वान्त्येण सामानाधिकरण्यस्य प्रकारत्वव्यवच्छेदभ्रान्तिंप्रसक्ता स्वारयितु माह नतुधूमत्वत्वेनेति, दृश्यतेचेदृशी व्याख्या दीधितावप्य नौपाधिकत्वमात्रव्यवच्छेदायय द्रक्ष्यतीत्यदो। केचित्तु तादृश वह्नित्वावच्छिन्नसमानाधिकरणधूमवान्पर्वत इति ज्ञानकारणत्वाभिप्रायक मुक्तग्रन्थ मिच्छन्ति तथाच ननुतादृशसामानाधिकरण्यविशिष्टवद्धूमवानितिपरामर्षस्य विरोधज्ञानाविरोधित्वेन न कारणत्व न्तादृशधूमत्ववद्धूमवानितिज्ञानस्य च धूमत्वत्वविषयकत्वेन गौरवेणैव नतथात्वं तादृशसामानाधिकरण्यवद्धूमवानितिबुद्धेश्च तादृशसामानाधिकरण्यविशिष्टधूमत्वाप्रकारकत्वादेव न तत्त्व मित्याशंकाया माह तत्रचेत्यादि, यथा नीलोघटइतिबुद्धौ घटत्वविशिष्टे नैल्यभानेसामानाधिकरण्येन घटत्वेपि तस्यभासमानतया सामानाधिकरण्येन नैल्यप्रकारतानिरूपितविशेष्यत्वाभिन्नघटत्वनिष्ठप्रकारताकत्वरूपं नीलघटत्वप्रकारकत्वंतस्यास्तथा तादृशसामानाधिकरण्यवद्धूमवानितिज्ञानेपि धूमत्वविशिष्टेतादृशसामानाधिकरण्यभाने सामानाधिकरण्येन तत्रापि तस्य भासमानतया सामानाधिकरण्येन तादृशसामानाधिकरण्यप्रकारतानिरूपितधूमत्वनिष्ठविशेष्यत्वाभिन्नधूमत्वनिष्ठप्रकारतानिरूपकत्वरूपतादृशसामानाधिकरण्यविशिष्टधूमत्वप्रकारकत्वमव्याहतम् अनन्तराभासमानैकज्ञानीयपारतन्त्रीयस्वातन्त्रीयविषयत्वयोरप्यभेदस्वीकारात् यथाच नीलोघटइतिबुद्धौ तादृशप्रकारता न घटत्वत्वावच्छिन्ना तथो क्तधूमत्वज्ञानेपिधूमत्वप्रकारतानधूमत्वत्वावच्छिन्नेतिन गौरवम् एवंच कारणता च सामाधिकरण्यनिष्ठस्वरूपसम्बन्धावच्छिन्नप्रकारतानिरूपित विशेष्यतानिरूपितावच्छेदकत्वाभिन्न निरवच्छिन्न तादृशधूमत्वविशेष्यत्वाभिन्नप्रकारतानिरुपितविशेष्यत्वाभिन्नप्रकारतानिरूपित पर्वतत्वावच्छिन्नविशेष्यताकनिश्चयत्वेन प्रथमभिन्नत्वोपादानं तादृशसामानाधिकरण्यमात्रप्रकारेण धूमत्वप्रकारकज्ञानस्य कारणतावारणाय वस्तुतस्त्व वच्छेदकत्वाभिन्नेत्यन्तं नोपादेयं तादृ-

शधूमत्वविशेष्यत्वाभिन्नप्रकारतायां निरवच्छिन्नत्वोपादानादेव तद्वार णात् उक्तज्ञानीयप्रकारतायाः सामानाधिकरण्यावच्छिन्नत्वात् तादृशसामानाधिकरण्यवद्धूमवान्पर्वतइतिज्ञाने च तादृशविशेष्यत्वाभिन्नायाः धर्मितावच्छेदकतात्मकधूमत्वप्रकारताया एव निरवच्छिन्नत्वात् अतएव तादृशसामानाधिकरण्यप्रकारतानिरूपित धूमत्वावच्छिन्नविशेष्यत्वाभिन्न प्रकारताकज्ञानत्वेन कारणत्वा न्नचेत्यादिनोक्ताद्भेदस्यगौरवाभावस्य चो क्तकारणत्वेसिद्धिः तस्य सामानाधिकरण्यसम्बन्धावच्छिन्नसामानाधिकरण्यत्वावच्छिन्नप्रकरतानिरूपित निरवच्छिन्नधूमत्वनिष्ठप्रकारतानिरूपितधूमनिष्ठप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतशालिनिश्चयत्वेनकारणत्वएवपर्यवसानात् एवंच परामर्शीयजनकतानिरूपित पक्षविशेष्यत्वनिष्ठावच्छेदकतानिरूपित प्रकारत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्प्रकारताश्रयत्वरूपव्याप्तित्वस्य धूमांशे सामानाधिकरण्यस्य प्रकारत्वेपि धूमत्व एव सत्वेन नव्याप्तेरैक्यहानिः नचसामानाधिकरण्यस्य धूमेभासमानस्यैव धूमत्वेभासमानतया सामान्यप्रत्यासत्यभावे पक्षीयधूमे तद्भानानुपपत्तिः धूमत्वस्य व्याप्तित्वं च तत्पक्षएवेतिवाच्यं सामान्यप्रत्यासत्ति म्विनापि व्याप्ते लौकिकसन्निकर्षादिग्राह्यत्वसंभवे लाघवएवचतात्पर्यान्मूलस्य नन्वेवंस्मृतस्येत्यादिग्रन्थस्य सामान्यप्रत्यासत्यनङ्गीकर्तृमीमांसकमतावलम्बित्वा दितिव्याख्यां च कुर्वन्ति तदपरेनमन्यन्ते तथाच तामुपादायैवेत्याद्यग्रिमग्रन्थपर्यालोचनया पूर्वापरमूलपर्यालोचनया चैकैवहीत्यादिमूलस्य सामान्यप्रत्यासत्यभावपक्षीयत्वावधारणात् सामान्यलक्षणाग्रन्थे तद्व्यवस्थापनस्य सामानाधिरण्यव्याप्तिपक्षीयत्वप्रतिपादनाच्च सन्दर्भविरोधापत्तेरिति।

"मन्तव्यमिति" चिन्तनीयमित्यर्थः अत्र हेतुतावच्छेदकस्य तादृशस्यव्याप्तित्वस्वीकारस्य सामान्यप्रत्यासत्यभावपक्षीयतया दण्डहेतुकस्थले साध्यसमानाधिकरणवृत्तित्वेनसपक्षवृत्तिधर्मदण्डादीनामेव प्राग्गृहीततया स्मृतस्य तस्य पक्षधर्म्मविशेषणत्वानुपपत्त्या व्याप्तिज्ञानानुपपत्तिःस्यादिति दण्डत्वस्यैवहेतुतावच्छेदकत्वं व्याप्तित्वं च स्वीकार्यं तथासति रूपत्वव्याप्यजातिमदादिहेतुकस्थलेपि तादृशजातित्वस्यैव स्वीकरणीयतयाद्वितीयाया नकुत्रापि नानात्वप्रसंगइति चिन्तावीजम्। ननु भवेदेतदेवं भिन्नत्वमभिन्नत्वं

च यदि नानात्वैकत्वरूपेस्यातां किन्तु भेदतदभावरूपे भेद श्चानुमितिजनकतावच्छेदकप्रतियोगिकः सचानुमितिजनकतावच्छेदकादितिपूरणाल्लभ्यइति नासङ्गतिरित्याह केचिदित्यन्तेन अपिना स्वरसाभिव्यक्तिः सच सामान्यप्रत्यासत्यभावे दुर्ज्ञेयतया स्थलविशेष उभयोरपितुल्यत्वेनैकस्य जनकतावच्छेदकत्वमन्यस्यातथात्व मित्यभ्युपगमइति। ननु प्रथमोपात्तत्वात् प्रतियोग्यसमानाधिकरणत्वविशेषणस्य हेतुसामानाधिकरण्यघटक यद्रूपविशिष्टत्वव्यावृत्त्यभिधानानन्तर्भावाभिधान मनुचित मिति चे न्न सूचीकटाहन्यायात् यद्रूपविशिष्टसामानाधिकरण्यस्य स्वोक्ततया तद्व्यावृत्तिजिज्ञासाया एव प्रथम मुदितत्वाच्चेति "भ्रमखण्डनार्थमयमितीति" ननु भ्रमनिरासार्थतायाः पक्षनिर्देशस्यात्र प्राङ्निराकृततयेदमसङ्गत मिति चे न्नवेदेतदेवं यदि कथामात्रेण तन्निराकृतंस्या त्किन्तु तत्र पक्षनिर्देशेपि भ्रमस्या निवार्यतया तात्पर्याद्यवधारणादेव तन्निवृत्तिःस्वीकरणीयेति पक्षनिर्देशम्विनापि तस्मात्तन्निवृत्तिर्भवत्येवातो न तदर्थता प्रकृतेचायंपदोपादाने ऽयंकपिसंयोग्ये तदि त्युद्देश्यविधेयभावो नसंभवति उद्देश्यतावच्छेदकविधेययोरैक्यात् एतदयंकपिसंयोग्येत तदपिविधेयांशेऽधिकावहित्वानं नसंभवति विधेयवाचकपदपूर्ववर्तिताया उद्देश्यवाचकपदे नियमात् तात्पर्यनिर्णयंविना पौर्वापर्यभेदकल्पनाया अन्याय्यत्वा दय मेत दिति सामानाधिकरण्यासंभवा च्चेति भ्रमनिरासार्थता युज्यतएवेति।

"अग्रेसमाधास्यमानत्वादिति" लक्षणान्तरतयेतिशेषः इदंचा भावाभावस्यातिरिक्ततामभ्युपत्य तेन विशिष्टसत्ताभाववान् गुणत्वा दित्यत्र साध्याभावस्य विशिष्टसत्तारूपस्य सत्तात्मकतया गुणवृत्तित्वेपि नाव्याप्तिः नवास्वरूपेण वृत्तित्वस्य घटत्वादौविरहेण घटत्वाभावसाध्याके व्यभिचारिण्य तिव्याप्ते विवक्षितु मशक्यतया स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसम्बन्धेन वृत्तित्वस्य विवक्षणीयतया प्रतियोगिवैयधिकरण्यघटित कल्पापेक्षया गौरवं यद्यपि विशिष्टसत्ताभावाभावस्य स्वरूपत्वेपि द्रव्यत्वस्यैवेति तत्राव्याप्तिविरहेपि पूर्वक्षणविशिष्टधूमाभाववा न्वह्ने रित्यत्र धूमस्वरूप साध्याभावस्य हेत्वधिकरणवृत्तित्वा दव्याप्तिः गगनाभावस्य कालिकेन यो ऽभाव स्तस्य साध्यतायां मात्मत्वादौ साध्याभावस्य गौरवेण जन्यत्वरूपताविरहेण गगनाभावा-

त्मकस्य हेत्वधिकरणवृत्तित्वसत्त्वा दव्याप्ति श्चेति तयो र्वारणं हेत्वधिकरणनिरूपितवृत्तितावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकनिरूपकतानिरूपितनिरूप्यतावत्प्रतियोगितानवच्छेदकत्वविवक्षया यत्प्रतियोगिताकाभावत्वावच्छिन्नाधिकरणत्वं हेतुमति तत्प्रतियोगितानवच्छेदकत्वविवक्षया वा कार्यं । यत्तु हेत्वधिकरणनिरूपित वृत्तितावच्छेदकानुयोगितानिरूपितप्रतियोगित्वस्य धूमाभावत्वाभावसाध्यकवह्न्यादिसद्धेता वयोगोलकनिरूपितवृत्तितावच्छेदकधूमाभावत्वस्य साध्याभावात्मकत्वेना व्याप्त्या धूमाभावत्वधूमाभावोभयाभावसाध्यकवह्न्यादिसद्धेतावव्याप्त्या स्वनिरूपितत्वस्वाश्रयनिरूपितत्वोभयसम्बन्धेन, तादृशानुयोगिताविशिष्टत्वस्य च द्वयत्वेपि स्वनिरूपितत्वस्वनिष्ठानुयोगित्वानिरूपितत्वोभयसम्बन्धेन तादृशानुयोगिताविशिष्टप्रतियोगित्वनिवेशे न दोषइति तन्न समवायेनप्रमेयाभावसाध्यकसत्वेऽव्यभिचारिण्यतिव्याप्तेः साध्याभावप्रतियोगितायां स्वनिष्ठानुयोगितात्मकसाध्याभावनिरूपितत्वस्यैवसत्वेन प्रतियोगितान्तरस्यैव लक्षणघटकत्वात् भावभेदत्वाभावसाध्यके साध्याभावप्रतियोगित्वे साध्यप्रतियोगिकत्वविशिष्टाभावत्वस्य भावभेदात्मकतया तन्निष्ठभावभेदत्वरूपसाध्याभावस्वरूपानुयोगितानिरूपितत्वस्यैवसत्वेन च व्यभिचारिण्यतिव्याप्तेः वस्तुतो नुयोगित्वस्य तत्तत्प्रतियोगिकत्व विशिष्टाभावत्वरूपतया विशिष्टस्य निरूपकत्वे विशेष्यस्यापितत्वेन प्रतियोगितामात्रे स्वनिष्ठानुयोगितानिरूपितत्वस्यैव सत्वेना सम्भवएव तद्वारणप्रयासाश्च दुरूहएव तथापि प्रतियोगिवैयधिकरण्यापेक्षया गौरवमेवस्यादिति निरवच्छिन्नस्वरूपेणकपिसंयोगाभावसाध्यकवृक्षत्वे साध्याभावस्य कपिसंयोगात्मनो निरवच्छिन्नहेत्वधिकरणवृत्तित्वविरहादतिव्याप्ति स्तद्वारणाय साध्यवन्निरूपितत्व सावच्छिन्नत्वोभयाभावनिवेशनं च न युज्यते सर्वावयवावच्छेदेन तादृशाभावप्रतीतेरनुभवसिद्धत्वेन कपिसंयोगरूपताया एवासत्वादिति ।

"गगनादिसंयोगस्येति" यत्र च द्रव्येयदवयवावच्छेदेन च नसंयोगान्तरस्यसम्भव स्तत्रापि तदवच्छेदेनापि च गगनादिसंयोगस्यैवसम्भवइतिसूचयितुम् संयोगस्येत्यत्र एकत्वमविवक्षितं तत्तदवच्छेदेनतत्तत्संयोगानां सत्वस्यैवाविवक्षितत्वात् ॥

वृक्षत्वावच्छेदेनेति" नच वृक्षत्वावच्छेदेनतत्तत्संयोगत्वावच्छिन्न-स्या सत्वेन तदभावावच्छेदकत्व मस्तु वृक्षत्वस्य संयोगत्वावच्छिन्न स्यवृक्षछत्वावच्छिन्न एव सत्वेन तदवच्छिन्नाभावावच्छेदत्वं कथं वृक्षत्वेस्यादिति वाच्यम् । विशेषातिरिक्तस्य सामान्यस्या भावेन यत्किंचित्तदवच्छेद कत्वस्यैव सामान्यावछेदकत्वेन तदभाववतो वृक्ष त्वस्य सामान्याभावावच्छेदकत्वं युज्यत एवेती दानीमभिप्रायात् ।

"कुतोनाध्यक्षमिति" ननु चक्षुः संयुक्तसमवेतरूपादिविशेषण-तया परिमाणरसादिषु अभावप्रत्यक्षस्या नुदयेन रूपपरिमाणादि-चक्षुर्ग्राह्यविशेष्यकसंयोगाद्यभावचाक्षुषे-चक्षुः संयुक्तसमवेतरूपा-दिविशेषणत्वादीनां विशिष्यैव कारणत्वस्य वाच्यतया द्रव्येसंयोग-सामान्याभावप्रत्यक्षस्यालीकतया संयोगसमान्याभावप्रत्यक्षे द्रव्य-विशेषणतायाः कारणत्वाकल्पना त्कथमापत्ति रापादकाभावा द्य-दि च लाघवेन प्रकारतासम्बन्धेन संयोगसामान्याभावचाक्षुषे च-क्षुः संयुक्तसमवेतविशेषणत्वस्यकारणत्वं विशेष्यविधयारूपपरिमा-णादे र्भाने तत्तल्लौकिकप्रत्यक्षप्रयोजकसामग्रा अपेक्षितत्वेन यत्र स-न्निकर्षोनास्ति न तस्य विशेष्यत्व मुभयोस्सन्निकृष्टत्वेचोभयोरेवै क-स्य सन्निकृष्टत्वे एकत्रैवविशेष्यत्वमित्युक्तापत्तेरयोगात् एवञ्च च-क्षुस्संयुक्तशाखादिसमवेतवृक्षविशेषणत्वरूपसंयोगाभावप्रकारकत्व-प्रयोजक सामग्रया श्चक्षुः संयोगस्यच द्रव्यभासकस्य सत्वेनापत्ति संभव इत्युच्यते तदपि न उपनीतभानात्मके ऽधिकरणग्रहे परमाणु परिमाणरूपाधिकरणान्तर्भावेण रूपत्वाभावादौ सन्निकर्षे घटपरि-माणान्तर्भावेण महत्त्वादिसम्बन्धे रूपत्वाभावप्रत्यक्षवारणाय चक्षुः संयुक्ते योग्यत्वप्रवेशस्य कारणतावच्छेदकशरीर आवश्यकत्वे द्र-व्यान्यनिष्ठविशेष्यतानिरूपितप्रकारत्वस्यैव त्रसरेणुवृत्त्यभावप्रत्य-क्षस्थलीयव्यभिचारवारणाय लाघवेनाभावविशेषविषयकत्वमनन्तर्भा-व्य कार्यतावच्छेदकसम्बन्धत्वस्य वाच्यत्वात् रूपत्वाभावस्यपरि-माणविशेषणत्वरूपसन्निकर्षेचक्षुःसंयुक्तसमवेतरूपेसन्निकर्षरूपगुणा-द्दोषविगमदशायामपिप्रत्यक्षापत्ते स्तत्तद्विशेष्यकाभावप्रत्यक्षेचक्षुः संयुक्तसमवेततत्तद्विशेषणत्वस्यैवसन्निकर्षतयाप्रकृतेपितदनुसारेणैव-वर्त्तनीयत्वादिति नापत्तिसम्भव इति चेन्न संयोभावनिष्ठप्रकारतानि-रूपितविशेष्यतासम्बन्धेनचाक्षुषप्रत्यक्षत्वावच्छिन्नंप्रति संयोगा-

भावनिष्ठविशेषणत्वानिरूपकत्वेसति चक्षुःसंयुक्तसमवायस्य कारणत्वकल्पना तत्सामान्यतोऽभावविषयकत्वस्यासन्निकृष्टाभावप्रत्यक्षापत्तिभयेनवक्तुमशक्यत्वात् त्रसरेणौसंयोगसामान्याभावप्रत्यक्षस्यानुत्पन्नतयाऽव्यभिचारप्रसक्तिविरहेणद्रव्यान्यत्वस्यानुपादेयत्वादापत्तिसम्भवात्। यद्वा द्रव्यनिष्ठविशेष्यतानिरूपिताभावीयप्रकारतासम्बंधेनघटाद्यभावचाक्षुषोपपत्तये चाक्षुषत्वावच्छिन्नंप्रत्येव लाघवेनचक्षुस्संयुक्तविशेषणतायाः कारणत्वस्यवाच्यतया संयोगाभावउक्तसम्बन्धेन प्रत्यक्षापत्तेर्दुवारत्वादिति भावः एतदभिप्रायेणैवच कथञ्चिदापत्तिसम्भवेपीत्युक्तंभट्टाचार्येण।

ननुयोग्यमात्रप्रतियोगित्वस्यकारणत्वपक्षेपि योग्यमात्रवृत्तिसंयोगसामान्याभावप्रत्यक्षापत्तिवारणाय परितइत्यादिग्रन्थावतारणम् यद्यपिसम्भवति तथापि द्रव्येसंयोगसामान्याभावस्यप्राचीनैरेवस्थितिकालेपिस्वीकृततया तन्मतेगुणेसंयोगसामान्याभावस्यप्रत्यक्षत्वेनतदनुरोधेनयोग्यमात्रप्रतियोगिकत्वस्यपरित्याज्यतया संयोगसामान्याभावप्रत्यक्षस्यैवापत्यातादृशग्रन्थावतारणंकर्त्तुमुचितमित्याशयेनाह "ननु प्रतियोगितावच्छेदकविशिष्टेत्यादि" अथगुरुत्वरूपोभयाभावस्यतेजसिकथन्नप्रत्यक्षत्वम् प्रतियोगितावच्छेदकविशिष्टयत्किञ्चिद्रूपात्मकप्रतियोगिनोयोग्यत्वात् कथम्वागुरुत्वविशिष्टरूपाभावस्य न तथात्वमिति चेन्न प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मयोग्यत्वस्यैवहेतुतयाविवक्षितत्वादिति भावः तन्वेतत्पक्षेयोग्यानुपलब्धेः कारणत्वविरहेप्यनुपलब्धेः कारणत्वस्यस्वीकृततया गुणेप्रतियोग्युपलब्धिविरहात्तस्यप्रत्यक्षत्वेद्रव्येप्रतियोग्युपलब्धिसद्भावान्नप्रत्यक्षतासम्भव इति कथं प्रतियोग्युपलब्धेर्दोषविधयाप्रकृतेप्रतिबन्धकतान्तरकल्पनमितिचेन्न एकशाखावच्छेदेनकपिसंयोगोपलब्धावपि शाखान्तरावच्छेदेनकपिसंयोगाभावप्रत्यक्षदर्शनात्तदवच्छेदेनाभावप्रत्यक्षेतदवच्छेदेनप्रतियोग्युपलम्भविरहस्यैवहेतुत्वस्य स्वीकरणीतया वृक्षत्वावच्छेदेनसंयोगसामान्याभावकारणस्य वृक्षत्वावच्छेदेनसंयोगोपलब्ध्यभावस्यसत्वाच्छाखामूलादिसर्वावयवावच्छेदेनप्रतियोग्युपलब्धेर्दोषविधयैवप्रतिबन्धकत्वस्ययुक्तत्वादित्यभिप्रेत्याह "प्रतियोगिग्रहात्मकदोषाद्वेति"। अथान्धकारवायुपरमाण्वादौघटाद्यभावचाक्षुषस्यजलादौगंधा

भावचाक्षुषस्यचवारणाय अन्धकारेतेजोभावप्रत्यक्षस्यवायावुद्भूतरूपाभावप्रत्यक्षस्यपरमाणौमहत्त्वाभावप्रत्यक्षस्यचोपपत्तयेच तत्सत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्वलक्षणयोग्यत्वविशिष्टानुपलब्धेः कारणत्वस्यवाच्यतया कथंगुणेसंयोगसामान्याभावस्यप्रत्यक्षत्व मत्रयदिसंयोगः स्यात्तदोपलभ्येतेत्यापादानस्यासंभवा त्संयागस्यातीन्द्रियस्यसत्वेपि तदुपलम्भकाभावादितिचे न्नैवम् गुणेसंयोगसत्वेयोग्यसंयोगस्यापिसत्वावश्यकत्वेन कदाचिदपिकुत्रापिगुणेकस्याप्युपलब्धिस्स्यादित्येवंयोग्यत्वस्यसंपादनीयत्वात् । यद्वालोकसंवन्धस्यसर्वैवतेजोभावान्यचाक्षुषे महत्वाभावान्यचाक्षुषमात्रेमहत्त्वस्य रूपाभावान्यचाक्षुषमात्रेचोद्भूतरूपस्य विशिष्यैवहेतुत्वादुक्तदोषाणामसंभवेनयोग्यत्वस्यानुपलब्धिविशेषणत्वानावश्यकत्वा दतएवप्रतियोगियोग्यत्वाद्यपेक्षापिघटतइतिभावः। एषाचकुसृष्टिकल्पनानभट्टाचार्यव्याख्यायां तेनगुणेसंयोगसामान्यभावस्यप्रत्यक्षतामभ्युपेत्यग्रन्थावतारणस्याकृतत्वादितिवोध्यम्।

"प्रतियोगिग्रहोत्पत्तीति" यथाकथंचिद्वृक्षरूपाधिकरणज्ञानइत्यादिः यद्यपिवृक्षेसंयोगोपलब्धिदशायांगुणेसंयोगाभावप्रत्यक्षस्योत्पन्नतयाद्रव्यत्वावच्छिन्नविशेष्यकसंयोगसामान्याभावप्रकारकप्रत्यक्षस्यालीकत्वेनतत्तद्धर्मावच्छिन्नप्रत्यक्षेप्रतिवन्धकत्वस्यवक्तुमशक्यतयाच लौकिकसन्निकर्षप्रयोज्यविशेष्यतासम्बन्धेनविशेष्यत्वमात्रेणवासंयोगाभावप्रत्यक्षे लौकिकविशेष्यतासम्बन्धेनसयोगोपलब्धेःप्रतिवन्धकत्वम्वाच्य न्तथासतितादृशोपलब्धित्वस्येश्वरप्रत्यक्षसाधारणतयातस्यविशेष्यतासम्बन्धेनसर्वदैवसर्वत्रैवचद्रव्येसत्वेनकथंप्रत्यक्षापत्तिंर्दुर्वारेतेतिवक्तुंशक्यते तथापिलौकिकसन्निकर्षप्रयोज्यविशेष्यत्वातिरिक्तस्य विलक्षणजन्यप्रत्यक्षनित्यज्ञानसाधारणानुगतरूपविशेषावच्छिन्नविषयित्वनिरूपकत्वस्यमानाभावेनसंसर्गत्वासंभवादुक्तविशेष्यत्वस्यचेश्वरज्ञाननिरूपकत्वासंभवान्नेश्वरज्ञानसंसर्गत्वसंभवइतिभवत्येवोक्तापत्तिः। यद्वा द्रव्यनिष्ठविशेष्यतानिरूपित प्रकारतासम्बन्धेनप्रत्यक्षे चक्षुःसंयुक्तविशेषणत्वरूपकारणवलादेवसंयोगाभावेतादृशप्रत्यक्षस्यापादिततयातद्वारणायतदन्तर्भावेणैव प्रतिवन्धकत्वंकल्पनीयं तथाह्युक्तविशेष्यतानिरूपितप्रकारतासम्वन्धेनप्रत्यक्षेद्रव्यनिष्ठविशेष्यतानिरूपित प्रकारतावच्छेदकावच्छिन्नप्रतियो-

गिताकत्वसंसर्गेणप्रत्यक्षस्य प्रतिबन्धकत्व न्तत्रैकस्यदोषविशेषात्प्र-
तियोगिविशेषग्रहेऽन्यस्यतदभावप्रत्यक्षोपपत्तयेतत्पुरुषीयत्वनिवेश-
स्यावश्यकतयापरमेश्वरप्रत्यक्षजन्यप्रत्यक्षदोषाविशेषजन्यज्ञानानांसा-
क्षात्कारित्वव्यञ्जकविषयितानिरूपितत्वघटितस्यस्वविषयसंयोगव-
त्वस्यवासंसर्गत्वसंभवेपिनपरमात्मप्रत्यक्षादुक्तापत्तिवारणसम्भवः
लौकिकप्रत्यक्षवदेवचदोषविशेषजन्यस्याप्यनुभवोनुरोधादभावबुद्धि-
विरोधित्वमास्थेयमेवेति ॥ भट्टाचार्यस्येश्वरप्रत्यक्षसाधारण्ये-
न प्रतिबन्धकत्वकल्पनाच ज्ञानाकरणकज्ञानत्वरूपंप्रत्यक्षत्वम-
भ्युपेत्य प्रत्यक्षेचसर्वत्रदोषाविशेषजन्येचानुभवबलात्साक्षात्कारि-
त्वव्यञ्जकविषयितांस्वीकृत्य अतएवसत्प्रतिपक्षग्रन्थेदोषाविशे-
षाद्यजन्यत्वस्योक्तविषयिताशून्यत्वरुपतामभिधायेश्वरप्रत्यक्षस्यतत
एवाप्रतिबध्यत्वमुपपादितं तदुक्तप्रतिबध्यप्रतिबन्धकभावेचत-
त्पुरुषीयत्वं नोपादेयं द्रव्येचसंयोगाभावस्ययोग्यसंयोगाभा-
वस्यचकदाचिदपिप्रत्यक्षत्वासम्भवा द्गुणे तस्यप्रत्यक्षत्वेपि दो-
षविशेषजन्यसंयोगज्ञानस्यतत्रानभ्युपगमा दभ्युपगमेपितत्पुरुषस्य-
तत्सत्वेदोषप्रतिबन्धकतावच्छेदकस्यप्रमीयलौकिकविशेष्यत्वस्य-
स्वविषयसंयोगवत्वस्यवासम्बन्धस्यतत्रासत्वेनदोषविधयाप्रतिबन्ध-
कत्वासम्भवेप्युपलब्धिरूपप्रतियोगिसत्वेनतदभावरूपकारणाविरहा-
दापत्तिविरहात् अन्यपुरुषस्यतत्सत्वेचयोग्यानुपलब्धिरप्यस्त्येवेत्य-
नुपपत्यसम्भवात् कथंचिदापत्तिसम्भवेपीत्यादितद्ग्रन्थ आपत्ति-
श्चविशेष्यनिष्ठप्रत्यासत्यासन्निकर्षकार्यकारणभावाभिप्रायेणेति ।

ननुतादात्म्येनद्रव्यत्वेन प्रतिबन्धकत्वंयद्यपिलघुभूतं तथापि त-
स्याननुभविकतयाप्रकारान्तर्भावेणप्रतिबन्धकत्वेद्रव्येऽभावमात्रस्या-
प्रत्यक्षत्वापत्त्याऽसम्भवितयाच स्वप्रयोज्यविषयतावच्छेदकावच्छि-
न्नप्रतियोगिताकत्वसम्बन्धेन सामग्र्याः प्रतिबन्धकत्वमाह "प्रति-
योग्युपलम्भकेति" सामग्रीचदोषविशेषासंपृक्तचक्षुःसंयुक्तसमवाया-
दिसन्निकर्षः दोषविशेषसमवहितसन्निकर्षस्यप्रतियोगिग्रहणयोग्य-
त्वाद्दोषासंपृक्तेति "प्रस्तुत्वादिति, उक्तत्वादित्यर्थस्तेनतत्सम्बन्धकथा-
प्रबन्धरूपप्रस्तावविरहेपिनक्षतिः एतेनप्रतियोग्युपलम्भकसामग्र्याः
प्रतिबन्धकत्वपक्षस्यनिर्दोषत्वेपिशिरोमण्युक्तोपलब्धिप्रतिबन्धकता-
यांनदोषोद्धारइतिशङ्कानिराकृता । व्यधिकरणबहुव्रीहेरसार्वत्रिकत्व-

माशङ्क्याह "प्रतियोग्युपलम्भेति"। अथकार्यसहभावेनेतिशब्दात्कार्याधिकरणवृत्तितयेत्येवलभ्यते तच्चप्राक्कालवृत्तितयाहेतावप्यस्तीति तत्रापितद्व्यवहारापत्तिः यदिकार्यकालमात्रवृत्तितयेत्यर्थः तदाकार्यसहभावेनहेतौ पूर्ववर्त्तिन्यनुपपत्तिरितिचेन्न कार्यसहभावेनहेतुत्वेत्यतः कार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकत्तद्धर्मवत्वन्तेनतेनरूपेणहेतुत्वमितितात्पर्याल्लभ्यते कारणत्वंचोभयसाधारणं स्वाधिकरणस्वपूर्वत्वाधिकरणक्षणद्वयावच्छिन्नस्वसामानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमितिदोषाभावादिति।

दीधितौ "इतिव्याप्तेर्यावत्संयोगाभावएवमानमिति" इतीतिलुप्तपञ्चमीकं योयदीययावद्विशेषाभाववान्सतत्सामान्याभाववानित्युदाहरणस्वरूपज्ञानजन्यज्ञानविषयत्वरूपंव्याप्त्यन्वयिनमर्थम्बोधयति व्याप्तेरित्यत्रपञ्चमीचमितिकरणत्वान्वितंप्रयोज्यत्वं ज्ञायमानलिङ्गस्यमानत्वपक्षे संयोगयावद्विशेषाभावपदंप्रथमान्तं ज्ञानस्यकरणत्वेविषयत्वार्थकसप्तम्यन्तंमानपदंवामानविषयलाक्षणिकंबोध्यम्॥ अत्रयत्पदंयद्धर्माश्रयपरं विशेषशब्दार्थश्चोभयावृत्तिधर्मवान् तदेकदेशधर्मान्वयिवृत्तित्वन्तद्धितार्थः प्रतियोगितासम्बन्धेनतस्याभावेन्वयः विशेषशब्दस्यचोभयावृत्तिधर्मावच्छिन्नप्रतियोगितानिरूपकेलक्षणा यावत्पदस्यतात्पर्यादभावपदेनसहासत्तिःकल्प्या तथाचयद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावकूटस्यहेतुत्वं पर्यवसितं तत्पदस्यतद्धर्मावच्छिन्नपरतयासाध्यत्वमपितद्धर्मावच्छिन्नाभावस्यैवेत्यभिप्रायेणाह "योयज्जातिसमानाधिकरणेत्यादि"।

अथलाघवेनयद्धर्मसामानाधिकरण्यमुभयावृत्तित्वं च प्रतियोगिताविशेषणमस्त्व लब्धधर्मविशेषणतया सत्त्वगुणत्वावच्छिन्नप्रतियोगित्वादीनामुभयावृत्तित्वविरहेणस्वरूपासिद्ध्यनवकाशात् अत्यन्ताभावस्यत्रितयप्रतियोगिकत्वेपिप्रतियोगितायाभेदात्तत्संयोगाभावस्योभयावृत्तिप्रतियोगिताकत्वमव्याहतमिति चेन्न प्रतियोगिभेदेनप्रतियोगिताभेदेसंयोगाद्यभावस्याप्युभयावृत्तिप्रतियोगिताकत्वेना—सिद्धिप्रसंगात् स्वनिरूपितप्रतियोगितावत्त्वसम्बन्धेनोभयावृत्तित्वस्याभावविशेषणत्वे संयोगाद्यभाववारणेपितत्संयोगाभावस्यतल्लक्षणविशिष्टतत्संयोगाभावाभावाभावरूपतयात्रितयप्रतियोगिकतयावा

स्वनिरूपितप्रतियोगितावत्त्वसम्बन्धेन तस्याप्युभयवृत्तित्वस्यैवापत्तेः
कूटत्वानुयोगितावच्छेदकानुयोगित्वेच स्वावच्छिन्ननिरूपकतानि-
रूपितनिरूप्यतावत्प्रतियोगित्वसम्बन्धेनोभयावृत्तित्वविशेषणंच य-
द्धर्मसमानाधिकरणप्रतियोगिताकत्वस्यातिरिक्तस्यप्रवेशेनगौरवा दु-
भयावृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वापेक्षयोक्तसम्बन्धेनोभयावृ-
त्तित्वस्यापिगुरुत्वात् त्रितयप्रतियोगिकत्वमतेदोषतादवस्थ्या-
च्चहेयम् एवमुभयावृत्तिधर्मावच्छिन्नाभावकूटत्वापेक्षयातादृशाभा-
वत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वस्यगुरुत्वमप्यालोच-
नीय न्तादृशाभावत्वस्यानन्ततत्तत्क्षणविशिष्टतद्व्यक्त्यभावसाधारण-
त्वात् नचोभयावृत्तिधर्मावच्छिन्नाभावत्वस्यापितत्साधारण्यन्तद्व्य-
क्तित्वसत्वान्यतरावच्छिन्नाभाववारणायोभयावृत्तिधर्मातिरिक्तधर्मा-
नवच्छिन्न प्रतियोगिताकत्वस्यैवाविवक्षणीयत्वात् अथापिसंयोगत्व-
समानाधिकरणोभयावृत्तिधर्मवान्नास्तीतिप्रतीतिसिद्धाभावस्यनवा-
रणामितिचेदुभयावृत्तिधर्म्मविशिष्टप्रतियोगिताकत्वमेवनिवेशनी-
यं वैशिष्ट्यंच स्वनिष्ठावच्छेदकताकत्व स्वभिन्ननिष्ठावच्छेद-
कत्वानिरूपितत्वसम्बन्धेन यदिचोभयावृत्तिधर्मानिष्ठनिरवच्छिन्ना-
वच्छेदकताकत्वमेवप्रागुक्तदोषद्वयवारणायानिवेश्य न्तथाचात्रापि
तादृशाभावत्वस्यतत्क्षणादिविशिष्टतद्व्यक्त्यभावसाधारण्यंदुर्वार-
मित्युच्यते तदापितद्व्यक्त्यभावे तद्व्यक्त्यनुयोगिक समवायादि-
नासयोगत्वादिविशिष्टाभावेषुचतादृशाभावत्वस्यसत्वेनतत्कल्पएव-
गौरवम् लाघवानुरोधेनैववतरवारकपर्याप्तिरादरणीया उक्तलाघव-
गौरवस्याकिञ्चित्करत्वे न्यूनवारकमात्रमादरणीयमितिबोध्यम् ।

उभयावृत्तित्वञ्च स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयस-
म्बन्धेन भेदविशिष्टान्यत्वंग्राह्यं तद्घटगगनोभयभेदविशिष्टत्वस्यत-
द्घटनिष्ठतद्व्यक्तित्वेसत्वेपिभेदस्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रति-
योगिताकस्यप्रतियोग्यवृत्तेर्वाविवक्षितत्वान्नदोषः उभयभेदस्यातादृ-
शत्वा त्तद्रूपवद्भेदश्चतद्रूपनाशकालावच्छेदेनतद्घटेविद्यमानोपिनानि-
रवच्छिन्नस्वरूपेण नवाप्रतियोग्यवृत्तिः स्वनिरूपितप्रतियोगितावः-
च्छेदकावच्छिन्नवृत्तित्वमेववासम्बन्धः नचतद्व्यक्तित्वमुभयत्वावच्छि-
न्नवृत्ति तद्घटभेदाभावाभावस्यतद्घटभेदस्वरूपत्वेन तद्व्यक्ति-
त्वाश्रयतद्घटभेदाभावस्यतद्घटभेदप्रतियोगित्वानुयोगित्ववत्वेपि

स्वनिरूपितप्रतियोगितावच्छेदकावच्छिन्नवृत्तित्व स्वावच्छिन्नाधि-
करणतावृत्तित्वोभयसम्बन्धेन भेदत्वविशिष्टान्यत्वस्यविवक्षया
तत्तद्व्यक्तित्वेप्युभयावृत्तित्वमुपपाद्यम् तद्घटभेदाभावाभावस्यत-
द्घटभेदत्वस्वरूपत्वेन तद्घटभेदत्वाभावेतद्घटभेदत्वनिरूपितप्रति-
योगित्वाश्रयत्वतदवच्छिन्नाधिकरणत्वयोः सत्वेपि स्वनिरू-
पितत्वस्वनिष्ठानुयोगित्वानिरूपितत्वोभयसम्बन्धेन स्वविशिष्टप्रति-
योगितावत्वंतुनतत्रवर्त्तत इति प्रकृतेतादृशप्रतियोगितावद्वृत्तित्व-
मेवसम्बन्धतयाविवक्षणीयः । अथात्रवृत्तित्वं नस्वरूपेणसत्त्वस्यो-
भयावृत्तित्वप्रसङ्गात् नापिसंयोगेनसमवायेनवा वाच्यत्वादीनान्त-
थात्वप्रसङ्गात् नापि तेषामन्यतमसम्बन्धेनस्वरूपेणोभयवृत्तेर्द्रव्य-
त्वस्यातथात्वापत्तेः नापियेनसम्बन्धेनोभयावृत्तित्वंविवक्षितं तेन-
सम्बन्धेनत त्तथासति तत्पर्वतानुयोगिकसम्बन्धेनवह्नेरुभयावृत्ति-
त्वाप्रसङ्गात् तत्सम्बन्धावच्छिन्नवृत्तिताद्वयस्याप्रसिद्धेः एवम्वाच्य-
त्वतद्व्यक्तित्वान्यतरत्वादिनातद्व्यक्तित्वस्याप्युभयवृत्तित्वेनतत्राव्याप्तिः
घटत्वेनसंयोगेनोभयावृत्तेर्वह्नेर्वह्नित्वेनोभयवृत्तितयातत्राप्यव्याप्ति-
श्चेतिचे द्भेदत्वविशिष्टवृत्तित्वाभाववत्वमुभयावृत्तित्वमितिगृहाण
वैशिष्ट्यञ्च स्वावच्छिन्नाधिकरणतावन्निरूपितत्व स्वविशिष्टप्रति-
योगितावच्छेदकावच्छिन्ननिरूपितवृत्तितावत्वोभयसम्बन्धेन वृत्ति-
तावत्ताच स्वावच्छेदकसम्बन्धावच्छिन्नत्व स्वावच्छेदकावच्छिन्न-
त्वोभयसम्बन्धेन वृत्तिताचयेनरूपेणोभयावृत्तित्वं विवक्षितं तद्रू-
पावच्छिन्ना अभावश्चयेनसम्बन्धेनोभयावृत्तित्वंविवक्षितंतत्सम्ब-
न्धावच्छिन्नवृत्तित्वीय-स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकः एव-
ञ्चभेदत्वविशिष्टावृत्तितातद्व्यक्तित्वनिष्ठाकालिकसम्बन्धावच्छिन्नैव
संयोगादिसम्बन्धावच्छिन्नैवचनवह्निनिष्ठातद्व्यक्तित्वनिष्ठान्यतरत्वा-
वच्छिन्नवृत्तिताचनतद्व्यक्तित्वत्वावच्छिन्ना घटत्वावच्छिन्नवृत्ति-
ताचनवह्निनिष्ठेति नैकस्यापिदोषस्यावकाशः कालिकेनापि-
गगनादीनामवृत्तित्वेगगनत्वेनोभयावृत्तित्वसम्पत्तयेवृत्तितास्थाने स-
म्बन्धितानिवेशनीया वाच्यत्वावच्छिन्नवृत्तिताविशिष्टत्वं स्वरूप-
सम्बन्धावच्छिन्नतद्व्यक्तित्वनिष्ठवृत्तितायावर्त्तत इत्युभयावृत्तित्वसं-
पत्तये स्वावच्छेदकावच्छिन्नत्वस्य कालिकसम्बन्धावच्छिन्नतद्व्य-
क्तित्वनिष्ठवृत्तितावत्वस्यस्वरूपसम्बन्धावच्छिन्नवृत्तितायांसत्वोनाभ-

थावृत्तित्वानुपपत्तिवारणाय स्वावच्छेदकसन्बन्धावच्छिन्नत्वस्यचानि-
वेशः। यद्वावस्तुमदन्यत्वमुभयावृत्तित्वं वस्तुमत्ताचस्ववृत्तित्व स्व-
निष्ठप्रतियोगिताकभेदवद्वृत्तित्वोभयसम्बन्धेन अत्रापिपूर्ववद्दोष-
वारणायभेदःप्रतियोग्यवृत्तित्वेनविशेषणीयः स्वनिरूपितत्व स्वनिरू-
पकवृत्तित्वोभयसम्बन्धेन स्वनिष्ठप्रतियोगिताविशिष्टानुयोगित्वा-
वच्छिन्नाधिकरणत्वं स्वनिष्ठप्रतियोगितात्वावच्छिन्ननिरूप्यतानिरूपि-
तनिरूपकतावच्छेदकधर्मावच्छिन्नाधिकरणत्वंवानिवेशनीयम् अस्या-
पिचयेनरूपेणोभयावृत्तित्वमिववक्षितंवस्तुविशिष्टतद्धर्मावच्छिन्नसंबं-
धित्वाभावएवतात्पर्यम् वैशिष्ट्यंच स्वनिरूपितत्व स्वनिष्ठप्रतियोगि-
तात्वावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावच्छेदकावच्छिन्नाधिक-
रणतावन्निरूपितसम्बन्धिताविशिष्टत्वोभयसम्बन्धेन वैशिष्ट्यमभा-
वप्रतियोगित्वंच पूर्वोक्तसम्बन्धैरेवग्राह्यमिति। अथवाद्वित्वावच्छिन्न-
निरूपितवृत्तित्वसामान्ये यन्निष्ठत्व यत्सम्बन्धावच्छिन्नत्व यद्धर्मा-
वच्छिन्नत्वैतत्त्रितयाभाव स्तत्त्वंतेनसम्बन्धेनतेनरूपेणचोभयावृत्ति-
त्वम्बोध्यम् सर्वंचेदंशब्दानुगमानुरोधेनोक्तम् प्रकृतेच स्वप्रतियोगि-
निरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्व स्वानुयोगिनिरूपितस्वरूप-
सम्बन्धावच्छिन्नवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वेसति स्वरू-
पसम्बन्धेनवृत्तित्वादिकमेवतद्वाच्यमित्यलम्।

"तेनेति" उभयावृत्तिधर्मवदर्थकविशेषपदोपादानेनसम्बन्धस्यय-
त्वतत्वेनसामान्योक्तव्याप्तौप्रवेशनचेत्यर्थः। "सिद्धसाधनमिति" सि-
द्धस्यसंयोगसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नाभावस्य साधनमित्य-
र्थः सामान्यव्याप्तिबलाद्विशेषहेतौपक्षधर्मत्वग्रहाद्विशेषसाध्यसिद्धा-
वपि सामान्यव्याप्तेःसम्बन्धविशेषावच्छिन्नत्वाविशेषितप्रतियोगिता-
काभावत्वेनैव हेतुसाध्यघटिततयातज्ज्ञानात्संयोगीययावद्विशेषाभा-
वेपक्षधर्मत्वग्रहदशायामपिसंयोगत्वावच्छिन्नाभावत्वेनैवाभावेनुमि-
तिविधेयत्वस्यसंभावितयातादृशानुमितौविशेषसाध्यसिद्धत्वेनसंयोग-
सम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नप्रतियोगिताकाभावग्रहस्यप्रतिबं-
धकत्वेनसिद्धसाधनमितिभावः। "व्यभिचारइति" तद्धर्मावच्छिन्ना-
भावरूपसाध्याप्रसिद्धिवारणाय स्वावच्छिन्नप्रतियोगिताकाभाववत्व-
सम्बन्धेनतद्धर्मस्यसाध्यत्वेबोध्यम्।

अथसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वस्यै-

व्यभिचारतया प्रकृतसाध्यतावच्छेदकसम्बन्धस्यवृत्त्यनियामकत्वेनतत्सम्बन्धावच्छिन्न साध्याभावाप्रसिद्ध्यानतत्सम्भवः वृत्त्यनियामकसम्बन्धस्यप्रतियोगितावच्छेदकत्वाङ्गीकारेच जात्युपादानेपिविषयितयातत्तद्व्यक्त्यभाववति वह्नित्वेनवह्निविषयकज्ञाने विषयितयावह्नित्वावच्छिन्नाभावासत्त्वेनव्यभिचारोदुरुद्धरस्स्यादितिचेन्न वृत्त्यनियामकसम्बन्धस्यभेदप्रतियोगितावच्छेदकतायाःसर्वानुमततया साध्यतावच्छेदकसम्बन्धप्रतियोगित्वविशिष्टहेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वाभावाभावस्यैवव्यधिकरणसम्बन्धेनव्यापकत्ववारणाय व्यभिचारस्यसाध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व साध्यताव्यापकत्व साध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकावच्छिन्नत्वै तत्रितयाभाववत्तादृशभेदप्रतियोगितावच्छेदकत्वस्यवा तत्वस्यवाच्यतया प्रकृतेपितत्संगतेः। यद्वाव्याप्तिशरीरे यत्सम्बन्धेवृत्त्यनियामकसम्बन्धान्यत्वं विशेषणीकृत्य वृत्त्यनियामकस्यप्रतियोगितावच्छेदकत्वाभ्युपगमेन व्यभिचारस्यसंगमनीयत्वम्बोध्यमिति।

ननुजात्युपादानेपिकपालद्वसंयोगगतकम्बुग्रीवात्वरूपजातेः स्वाश्रयाश्रयाधिकरणत्वरूपपरंपरासम्बन्धेन समानाधिकरणीभूतोभयावृत्तिधर्मावच्छिन्नाभावकूटवति तत्सम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वसम्बन्धेन कम्बुग्रीवात्वस्य विरहेणव्यभिचारः।गुणविभाजकजातित्वेनप्रवेशेपि स्वव्याप्यकम्बुग्रीवात्वाश्रयाधिकरणत्वसम्बन्धेन संयोगत्वाधिकरणत्वघटितहेतुमति संयोगत्वस्यविरहेणव्यभिचारोदुर्वारएवेतिचेन्न समवायेनैवयज्जात्यधिकरणत्वस्यप्रवेशाददोषात् नचजात्युपादानमफलं गुणत्वविशिष्टस्यापियत्तदादिपदबोध्यतयायत्वतत्त्वेनोपादानसम्भवेन गुणसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावकूटस्य गुणवत्वव्यभिचारित्वात् यादृशस्यचव्याप्तिघटकत्वंतादृशावच्छिन्नत्वघटितएवसाध्यत्वस्य साध्यसंसगत्वस्यैववा व्याप्त्यनुभवगृहीततया संयोगेनगुणवदभावप्रतियोगितावच्छेदकत्वस्य द्रव्यत्वकल्पनेनोक्तसम्बन्धस्य गुणव्यधिकरणत्वादेवंजातित्वेनजातेरपियत्वतत्त्वेनग्राह्यतया जात्यवच्छिन्नाभावप्रतियोगितावच्छेदकत्वस्य नित्यत्वाविशेषितजातेरेवकल्पनीयतया व्यभिचाराच्च नचयेनरूपेणोपादेयतातदवच्छिन्नावच्छेदकत्वस्यैवसाध्य व-

टकत्वे संयोगत्वादेरपिस्वरूपतोयत्पदानुपादेयतया संयोगत्वत्वेनयत्पदोपादेयसंयोगत्वस्य तेनप्रतियोगितानवच्छेदत्वेनव्यभिचारइतितत्पदोपस्थाप्यनिष्ठावच्छेदकताकत्वस्यैव साध्यस्यतत्संसर्गस्यवाघटकतायावाच्यतया गुणत्वेनजातित्वेनगुणजात्यादेरुपादेयत्वेपिनदोषइतिवाच्यम् गुणावच्छिन्नाभावजात्यवच्छिन्नाभावाद्यनुभवे आनुभविकानांगुणत्वजातित्वाद्यवच्छिन्नावच्छेदकत्वावगाहितायाएवानुभवारूढत्वेन तस्यतत्पदोपादेयत्वे जातित्वावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यैवसाध्यत्वापत्त्याव्यभिचारस्स्यादेव संयोगत्वाद्यवच्छिन्नाभावानुभवेच संयोगत्वनिष्ठावच्छेदकत्वावगाहितायाएवानुभविकत्वेन तस्यतत्पदोपादेयत्वे तन्निष्ठाद्यवच्छेदकत्वघटितस्यसाध्यताया संसर्गतायावा प्राप्तत्वेननदोषइत्येतदर्थस्यानुभववासनावासितान्तःकरणवेद्यस्यसत्वात्। एतदभिप्रायेणैवजात्यवच्छिन्नाभावाप्रसिद्ध्याव्यभिचारस्यभट्टाचार्योक्तासंगच्छते नचजात्युदपादानेपिजातित्वेनजातेर्यत्पदोपादेयतयाव्यभिचारतादवस्थ्यमितिवाच्यम् जातिपदसमभिव्याहृतयत्पदस्यजातित्वेनजातिबोधकत्वासम्भवा ज्जातिविशेषाणाम्बोधस्यैवतथानुभविकत्वात् स्वविशेषान्वितजात्याद्यवच्छिन्नाभावानुभवेपि तादृशजातिनिष्ठावच्छेदकताकत्वावगाहित्वस्यैवचानुभाविकत्वाच्च अथैवंसिद्धसाधनप्रसंगः सामानाधिकरण्यसम्बन्धेनशाखादिदेशकालविशेषावच्छिन्नत्वावच्छिन्नसंयोगत्वनिष्ठावच्छेदकत्वनिरूपकप्रतियोगिताकाभावस्यवृक्षेसत्वादितिचेन्न यन्निष्ठयत्सम्बन्धावच्छिन्ननिरवच्छिन्ननिरूपकताकसम्बन्धित्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावकूटवान्यः सतन्निष्ठतत्सम्बन्धावच्छिन्ननिरवच्छिन्नावच्छेदकताकप्रतियोगिताकाभाववानिति व्याप्तावेवजात्युपादानकर्त्तुस्तात्पर्यात् यत्सम्बन्धावच्छिन्नाभावस्यहेतुघटकत्वंतत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वस्ययद्धर्मविशेषणत्वमङ्गीकुर्वतामप्यत्रैवतात्पर्यम्बोध्यमिति।

उभयावृत्तिपदवैयर्थ्यमिति, वैयर्थ्यमत्रननिष्प्रयोजनकत्वं स्वरूपासिद्धिवारकस्यतदसम्भवात किंतुविशिष्टान्तरतादृशघटितत्वमेवेतिबोध्यम्। अथघटसामान्याभावविरहिणिकतिपयघटाभाववादिसत्वेनव्यभिचारवारणाय यावदित्युक्तन्दीधितिकृता यावत्वंचात्रव्यापकत्वार्थकं कूटत्वावच्छिन्नार्थकम्बावाच्यं तत्राद्ये यद्धर्मसमानाधि-

करणोभयावृत्ति धर्मावच्छिन्नप्रतियोगिताकाभावत्वव्यापकत्वंहेतुः पर्यवसितः व्यापकत्वंच स्वरूपसम्बन्धावच्छिन्नाधेयतासम्बन्धेन तत्रकम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्ति धर्मावच्छिन्नप्रतियोगिताकाभाववृत्तिभेदप्रतियोगितावच्छेदकत्वाभावप्रतियोगितावच्छेदकत्वस्य लाघवेनघटत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाववृत्तिभेदप्रतियोगितावच्छेदकतात्वएवकल्पनीयतया तादृशाभावस्याप्रसिद्ध्या यत्पदेनकम्बुग्रीवादिमत्त्वस्योपादानासम्भवा ज्जातिपादोपादानग्रन्थासङ्गतिः वैयर्थ्यपरोक्तग्रन्थासङ्गतिश्च उभयावृत्तित्वघटिततदघटिताभावयोर्भेदेनविशिष्टान्तरघटितत्वासंभवात् द्वितीयेच तादृशाभावत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वावच्छिन्नस्यहेतुत्वमायात न्तत्रापिवैयर्थ्यासम्भवः उभयावृत्तित्वाघटिततद्घटितधर्मावच्छिन्नानुयोगित्वयोर्भेदेनबिशिष्टान्तरघटितत्वासम्भवात् नचस्वव्याप्यत्वसम्बन्धेनतादृशाभावत्ववृत्तित्वंहेतुः विशिष्टाभावत्वस्याभावत्वानतिरिक्ततयाव्याप्यत्वासम्भवात् तादृशाभावत्वावच्छिन्नानुयोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमपिनहेतु वैयर्थ्यासम्भवाद्धेतौविशिष्टान्तरस्यचविभिन्नानुयोगिताघटितत्वात् नचयद्धर्मसानाधिकरण्यनिष्ठावच्छेदकताभिन्नोभयावृत्तित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिततत्तदवच्छेदकतानिरूपितधर्मनिष्ठावच्छेदकतानिरूपिततद्भिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिततदवच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताभावत्वनिष्ठावच्छेदकतानिरूपितानुयोगितानिरूपकपर्याप्तिप्रतियोगिकूटत्वत्वेनैवतादृशकूटत्वस्यहेतुतावच्छेदकत्वंवाच्यं तथाचतादृशकूटत्वावच्छिन्नाविषयकोभयावृत्तित्वनिष्ठावच्छेदकत्वनिरूपितत्वाविषयकतादृशकूटत्वविषयकप्रतीतिविषयतावच्छेदकावच्छिन्नघटितत्वेनवैयर्थ्यसम्भवइतिवाच्यम् तथासत्युभयावृत्त्यनुपादानेपि स्वरूपासिद्ध्यसम्भवात् उभयावृत्तित्वनिष्ठावच्छेदकत्वानुपादानस्यैवतदनुपादानपर्यवसायित्वेन तादृशानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वत्वस्य सत्ताद्यवच्छिन्नाभावसाधारणकूटत्वोभयावृत्तिधर्मावच्छिन्नाभावमात्रवृत्तिकूटत्वद्वयसाधारणतया तदेकस्यपक्षेसत्त्वादितिचे दुच्यते ? यज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्न-

प्रतियोगिताकाभावत्वकूटत्वोभयरूपेणैवपरामर्शीयपक्षविशेष्यतानिरू-
पितप्रकारत्वरूपहेतुत्वं यावद्विशेषाभावस्यविवक्षितं नत्रतादृशाभाव-
कूटत्वस्य स्वोद्देश्यतावच्छेदकव्यापकपर्याप्तेरेवसंसर्गः संसर्गताच-
नतादृशपर्याप्तित्वेन किन्तुपर्याप्तित्वेनैववह्नित्वाद्यवच्छिन्नप्रतियोगित्व-
स्यप्रतियोगितात्वेनसंसर्गतावत् एवञ्चतादृशपर्याप्तित्वविशिष्टसंसर्गे-
णविशिष्टान्तरतावच्छेदककूटत्वस्यव्याप्यतानवच्छेदकत्वेपिनक्षतिः
तादृशस्यहेतुतावच्छेदकताघटकसम्बन्धत्वविरहात् यथाचशुद्धप्रति-
योगितात्वेनप्रतियोगित्वस्यतादृशसंसर्गत्वेपिवह्निविशिष्टोऽभावोनम-
हानसीयवह्न्यभाव स्तथोक्तपर्याप्तेःपर्याप्तित्वेनसंसर्गत्वेपितादृशाभा-
वकूटवत्वंनकतिपयाभाववतीतिनव्यभिचारः तथाचोभयावृत्तित्वानु-
पादानेयद्धर्मसमानाधिकरणधर्मावच्छिन्नाभावकूटस्यहेतुतया तत्रकू-
टत्वस्यतादृशाभावत्वव्यापकपर्याप्तेरेवसंसर्गत्वेनस्वरूपासिद्धिसंगतिः
यद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावकू-
टत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्धर्मसमानाधिक-
रणधर्मावच्छिन्नप्रतियोगिताकाभावकूटत्वावच्छिन्नविषयकत्वस्यहे-
तुविषयकप्रतीतौसत्वेन वैयर्थ्यसंगतिश्च उक्तकूटत्वयोर्विलक्षणपर्या-
प्तिरूपहेतुतावच्छेदकताघटकसम्बन्धेनहेतौवर्त्तमानत्वावर्त्तमानत्वा-
भ्यांवैलक्षण्येपि कूटत्वत्वेननिखिलकूटत्वस्यैवहेतुतावच्छेदकत्वात्
समवायेनावृत्तेरपिप्रमेयस्यसमवायेनप्रमेयाभावप्रतियोगित्व प्रमेयव-
दभावप्रतियोगितावच्छेदकत्ववत् । ननुहेतुतावच्छेदकतात्वावच्छि-
न्नपर्याप्त्यनुयोगितावच्छेदकरूपेस्वावच्छिन्नानुयोगिताकपर्याप्तिकाव-
च्छेदकताकविषयताकत्वशून्यप्रतीतिविषयतावच्छेदकतात्वावच्छिन्न-
पर्याप्त्यनुयोगितावच्छेदकप्रकृतसाध्यव्याप्यतावच्छेदकतात्वावच्छि-
न्नप्रतियोगिताकपर्याप्त्यवच्छेदक हेतुतावच्छेदकसमानाधिकरणवृ-
त्तिरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकविषयताशून्यज्ञा-
नविषयतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानव-
च्छेदकत्वस्यैवव्यर्थविशेषणघटितत्वरूपत्वस्वाच्य मन्यथानीलधूम-
त्वस्यधूमत्वानतिरेकणधूमत्वावच्छिन्नविषयतायानीलधूमत्वावच्छि-
न्नत्वातत्रवैयर्थ्यासम्भवात् द्रव्यंघटवृत्तिसत्वादित्यादौपदवृत्तिस-
त्तात्वावच्छिन्नविषयकतादृशविषयताशून्यप्रतीतिविषयतावच्छेदके-
नव्याप्यतावच्छेदकविशिष्टसत्तात्वानतिरिक्तेनसत्तात्वेनावच्छिन्नवि-

षयताकत्वस्यैवहेतुप्रतीतौसत्वेनवैयर्थ्यप्रसङ्गाच्च तथाचयद्धर्मसमाना-
धिकरणधर्मावच्छिन्नाभावकूटवानितिप्रतीतिविषयतावच्छेदकतात्वा-
वच्छिन्नपर्याप्त्यनुयोगितावच्छेदकसत्तावदभावादिप्रतियोगित्वसा-
धारणसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकविष-
यताशून्यत्वस्यहेतुमत्वप्रतीतौसत्वेननवैयर्थ्यसम्भवइति । यत्तुयद्ध-
र्मसमानाधिकरणत्वमात्रेणवास्तवोभयावृत्तिधर्ममात्रावगाहि यद्धर्म-
समानाधिकरणधर्मावच्छिन्नाभावकूटवानितिप्रतीतिमादायवैयर्थ्यसं-
भवः तत्रसत्तावदभावादेरविषयत्वेनतत्प्रतियोगित्वसाधारणसमुदा-
यत्वस्यधारणासम्भवादिति तन्न तादृशप्रतीतिविषयतावच्छेदकता-
त्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकस्य व्याप्यताव-
च्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्ववि-
रहा त्तस्यसत्वावच्छिन्नप्रतियोगित्वादिसाधारणसमुदायत्वउभयावृ-
त्तित्वसाधारणसमुदायत्वेवासत्वात् । अन्येतुनिरवच्छिन्नावच्छेदक-
त्वस्यैवव्यर्थविशेषणघटितत्वघटकत्वमित्यभ्युपगमेन प्रकृतेउभयावृ-
त्तित्वविशेषणस्यव्यर्थतामुपपादयन्ति तथाहि हेतुतावच्छेदकघटका-
नामवश्यंकुत्राप्यनवस्थाभयेनस्वरूपतोभानमभ्युपेयं तथाचोभयावृत्ति-
त्वघटकस्वरूपतोभासमाननिष्ठावच्छेदकत्वस्यापि निरवच्छिन्नतया
तद्घटितवृत्तिसमुदायत्वस्यैवहेतुतानिरूपितनिरवच्छिन्नावच्छेदकता-
त्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकतया तदवच्छि-
न्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकताकविषयताशून्यं विशिष्टा-
न्तरघटकस्वरूपतोभानयोग्याखिलप्रकारकसमूहालम्बन ज्ञानमादाय
विषयतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकस्य व्याप्य-
तानिरूपित निरवच्छिन्नावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगिताव-
च्छेदकत्ववत्तया तदवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकता-
कविषयताशून्यत्वस्यहेतुमत्वज्ञानेविरहेण वैयर्थ्यसम्भवइतिवदन्तित
दसत् निरवच्छिन्नावच्छेदकत्वस्यव्यर्थविशेषणघटितत्वघटतकत्वाव-
श्य कत्वएवाहितत्संभवति नचतस्यावश्यकत्वन्तथाहि धूमवतोहेतुत्वे
धूमधूमत्वगतसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकता-
कविषयताशून्यधूमत्वेनतद्धूमावगाहिधूमवद्वानितिज्ञानविषयतावच्छे-
दकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकतद्धूमधूमत्वगताद्वित्व-
मादायवैयर्थ्यवारणाय हेतुतावच्छेदकताया॥निरवच्छिन्नत्वमभिमतं

श्रोकद्वित्वस्यव्याप्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकत्वविरहेण दोषस्यैवाभावाद्धूमवतोऽव्याप्यत्वेधूमत्वनिखिलधूमगतसमुदायत्वे तद्धूमवतोऽव्याप्यत्वंतत्तासहितसमुदायत्वेवातस्यभावान्नतदुपादेयम् एवंहेतुमत्वविषयकज्ञाने धूमत्वतद्धूमगतद्वित्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकत्वकविषयत्वस्यापिनसम्भवः तथाहिताहशपर्याप्तीयाप्रतियोगितानतज्ज्ञानीयविषयतावच्छेदकतात्वावच्छिन्ना तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वस्यसमुदायत्वएवसत्वा न्नापितद्धूमातिरिक्तधूमावृत्यवच्छेदकतात्वावच्छिन्ना वच्छेदकभेदेनावच्छेदकताभेदस्याप्रामाणिकत्वात् नापितद्धूमधूमत्वान्यतरवृत्तित्वविशिष्टावच्छेदकतात्वावच्छिन्ना किञ्चिन्निष्ठानिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नभेदनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वस्यप्रतियोगित्वविशेषणतया विवक्षणीयत्वात् अतएवजातिमद्धेतुकस्थलेधूमत्वगतैकत्वंविशिष्टान्तरविषयतावच्छेदकतापर्याप्त्यनुयोगितयच्छेदकमादाय वैयर्थ्यवारणायताहशरूपावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकतायान्निरवच्छिन्नत्वोपादानमप्यपास्तम् धूमत्वगैतकत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकताकविषयताकत्वाविरहा त्ताहशविषयताशून्यहेतुविषयकज्ञानाविषयतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वस्यहेतुतानिरूपितनिरवच्छिन्नावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकेसत्वाच्च एवन्नीलधूमवद्धेतुकेविशिष्टान्तरविषयतावच्छेदकगतधूमधूमत्वगतसमुदायत्वस्यस्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिनिरवच्छिन्नावच्छेदकत्वप्रसिद्धे धूमत्वगतैकत्वस्यव्याप्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वविरहेणधारणासम्भवेपि वैयर्थ्यासम्भववारणाय व्याप्यतावच्छेदकतायान्निरवच्छिन्नत्वोपानमपिनकार्यमिचेदुच्यते ? स्वावच्छिन्नाधिकरणतावृत्तित्वसम्बन्धेनधूमत्वविशिष्टद्रव्यहेतुके स्वाश्रयप्रतियोगिकत्वसम्बन्धनधूमत्वविशिष्टप्रागभावहेतुकस्थलेच विशिष्टान्तरतावच्छेदकधूमत्वस्यहेतुतावच्छेदकसमानाधिकरणतया तद्गतैकत्वमादायवैयर्थ्यवारणाय हेतुविशेषणवैयर्थ्यस्थलेऽयर्थविशेणघटितत्वशरीरेसमानाधिकरणवृत्तित्वस्थानेहेतुत्वावच्छेद्यविशेष्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वंविशेषणंदेय मेवञ्चहेतुतावच्छे-

दकविशेषणस्यनैल्यादेर्न्नीलधूमवतोहेतुतायांवैयर्थ्यसम्पादनायावच्छेदकतावच्छेदकत्वघटितत्वं व्यर्थविशेषणघटितत्वम्बाच्य न्तत्रधूमत्वाविशिष्टद्रव्यवतोहेतुतास्थले व्यर्थविशेषणत्वस्यधूमत्वेवारणाय विशिष्टान्तराविषयतावच्छेदकतावच्छेदकतायांहेतुतावच्छेदकत्वावच्छेद्यविशेष्यता वच्छेदकतासामानाधिकरण्यं विशेषणतयाविवक्षणीय न्तथासतिप्रकृतेपिवैयर्थ्यसम्भवः सत्वाद्यवच्छिन्नप्रतियोगित्वादीनामुक्तविशेष्यतानवच्छेदकत्वात् व्याप्यतावच्छेदकतावच्छेदकत्वेपि तादृशाविशेष्यतावच्छेदकतासामानाधिकरण्यम्बिशेषण मन्यथा नीलधूमविशिष्टवद्धेतुकस्थलेधूमत्वगतैकत्वस्यधारणंनस्यादितितुनवाच्यं विशिष्टसत्तावतोहेतुत्वेपिवैयर्थ्यस्या द्वैशिष्ट्यनिष्ठावच्छेदकत्वेव्याप्यतावच्छेदकतानिरूपितउक्तसामानाधिकरण्यविरहा त्किन्तु व्याप्यतावच्छेदकतायामुक्तविशेष्यताविशिष्टत्वम्बाच्यं वैशिष्ट्यञ्चस्वावच्छेदकधर्मावच्छिन्नत्व स्वनिरूपितप्रकारतासमानाधिकरणावच्छेदकत्वानिरूपितत्वोभयसम्बन्धेनेत्यलम् ॥ * ॥

केचित्तुयज्जातिसमानाधिकरणोभयावृत्ति धर्मावच्छिन्नप्रतियोगिताकाभावएवहेतुः हेतुताच विलक्षणविषयितासम्बन्धेनस्वविशिष्टज्ञानवृत्तिकूटत्वावच्छिन्नवत्वसम्बन्धेन वृत्तिताचस्वाभाववदवृत्तित्वसम्बन्धेन अवृत्तित्वघटकवृत्तित्वञ्च स्वविषयतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्वसम्बन्धेन तथाच नव्यभिचारोनवाजात्युपादानासङ्गतिः नापिवैयर्थ्यासङ्गतिश्चेतिप्राहुः । परेतुविलक्षणप्रतियोगितासम्बन्धेन स्वविशिष्टाभाववृत्तिकूटत्वावच्छिन्नवत्वसम्बन्धेनतादृशाभावस्यहेतुत्वं वृत्तित्वञ्चस्वाभाववदवृत्तित्वसम्बन्धेन अवृत्तित्वघटकवृत्तिताच स्वप्रतियोगितावच्छेदकधर्मवत्वसम्बन्धेनेति नव्यभिचारोनवैयर्थ्यासङ्गतिरितिवदन्ति तन्नातिसमञ्जसं जात्युपादानवैयर्थ्यात् कम्बुग्रीवादिमत्वघटिताभावविशिष्टाभावाप्रसिद्धेर्घटत्वघटिताभावत्वस्यैव तदवच्छेदकत्वौचित्यादितिदिक् ॥ ० ॥

व्यभिचारवारकस्यैवेति, अत्र साध्यगमकत्वरूपं हेतुत्वं हि किंचिद्धर्मिण्येवसाध्यगमकत्वं निर्धर्मिकानुमित्यभावात् तथा च गमकतायां साध्यव्याप्तेरिवपक्षधर्मत्वस्यापि प्रयोजकतया वैयर्थ्यशरीरेप्रकृतसाध्यव्याप्यतावच्छेदकत्वस्यैव प्रकृतपक्षधर्मतावच्छेदकत्वस्यापि विशेषणत्वम्बाच्यमिति स्वरूपासिद्धिवारकस्यनवैयर्थ्य-

मितिमिश्राणामाशयः । अन्येषान्तुगमकतायां व्याप्तिमात्रमुपयुक्तं ह्रदेधूमस्यवह्निगमकत्वविरहेपिगमकतानदृश्यते पर्वतेवह्निगमकत्वाक्षतेरिति पक्षधर्मतावच्छेदकत्वन्नैवैयर्थ्यघटकमिति व्यभिचारावारकस्यवैयर्थ्यम्त्वदतामाशयो बोध्यः ।

अत एवशब्देनित्यत्वसाध्यकेत्यादि, एकमात्रगुणेतद्घटीयरूपे व्यभिचारवारणाय विशेषगुणान्तरासमानाधिकरणेति । स्वात्मकविशेषगुणसमानाधिकरणेशब्देऽसिद्धिवारणायान्तरेति । आकाशमनः संयोगेव्यभिचारवारणायैकमात्रवृत्तीति । एकमात्रवृत्तित्वं चोभयावृत्तित्वं वृत्तिताच तत्र समवायावच्छिन्नान्तर्भवतीतिगगनमनस्संयोगध्वंसेव्यभिचारवारणायगुणेति मनः कर्म्मणिव्यभिचारवारणायवा गुणेति । नचमनोवेगेव्यभिचार इति वाच्यम् तस्यमीमांसकमतेगतिसन्तानएवान्तर्भावादिति तु ग्रन्थानुरोधिनः विशेषगुणान्तरासामानाधिकरण्योक्तिस्वारस्यादेवविशेषगुणसामानाधिकरण्यस्यापिहेतुघटकत्वलाभाद्गगतौनव्यभिचारसम्भवः उक्तध्वंसेव्यभिचारवारणायैवगुणत्वोपादानं दृष्टान्तताचनगगनपरिमाणस्यैवेति समयपरिमाणवदिति मूलग्रन्थाननुरोधिनः । ननुशब्देतराविशेषगुणासमानाधिकरणत्वविशेषगुणासमानाधिकरणत्वरूपाभावयोर्भेदननवैयर्थ्यसम्भव इति चेन्न ? विलक्षणप्रतियोगितासम्बन्धेन स्वविशिष्टाभाववत्वसम्बन्धेन शब्देतरविशेषगुणसामानाधिकरण्यस्यैवविशेषणत्वेतात्पर्यादुपस्थितौलाघवादिति भावः । क्वचित्पुस्तकेशब्दोऽनित्यः सामान्यवत्वेसतिविशेषगुणान्तरासमानाधिकरणत्वेसतिवहिरिन्द्रियग्राह्यत्वादित्यनुमानमुपलभ्यते तदप्रामाणिकं निःप्रयोजनगुणान्तरासमानाधिकरणत्वविशेषणशून्यस्यैतादृशानुमानहेतोर्मूलग्रन्थेऽदर्शनादिति ।

असिद्धिवारकविशेषणशून्यं कल्पान्तरमाहयद्वेत्यादि, अथकालिकस्ववृत्तिवाच्यत्ववत्वादिसम्बन्धावच्छिन्नसंयोगत्वनिष्ठावच्छेदकताकप्रतियोगित्वादिकमादायस्वरूपासिद्धिवारणाय समवायसम्बन्धावच्छिन्नावच्छेदकत्वसंयोगत्वसत्तात्वान्यतरावच्छिन्नप्रतियोगित्वसंयोगद्रव्यत्वाद्युभयाभावप्रतियोगित्वादिकमादायस्वरूपासिद्धिवारणाय यद्धर्मातिरिक्तधर्मानवच्छिन्नत्वस्य यद्धर्मावच्छिन्नयावत्प्रतियोगित्वावच्छिन्नाभावस्य संयोगसामान्या·

भावप्रतियोगित्वावच्छिन्नाभावरूपस्य वृक्षे ऽसत्तयास्वरूपासिद्धिवारणाय प्रत्येकावच्छिन्नत्वस्यचनिवेशनीयतया ऽसिद्धिवारकाणामत्रापिसत्वमेवेति चेन्न? यद्रूपविशिष्टप्रतियोगिताकूटवत्त्वंयत्र तत्रतद्रूपवृत्तिप्रतियोगिताकाभाववत्वमितिसामान्यव्याप्तेरभ्युपगमात् वैशिष्ट्यञ्च स्वावच्छिन्नानुयोगिताकपर्याप्तीयायाकिञ्चिन्निष्ठनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिता तद्वत्समवायसम्बन्धावच्छिन्नावच्छेदकताकत्वसम्बन्धेन कूटवत्ताचस्वावच्छिन्नप्रतियोगिताकाभाववत्वसम्बन्धेन रूपवृत्तित्वञ्च स्वनिरूपितसमवायसम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनबोध्यम् एवञ्चनासिद्धिवारकस्य व्यर्थविशेषणस्यात्रावकाशइति। केचित्तूभयावृत्तित्वाद्यप्रवेशेनलघुभूतं व्याख्यान्तरमाह यद्वेति, तेननासिद्धिरित्यादि, असिद्धिवारकतत्तद्विशेषणोपादानेननासिद्धिः असिद्धिवारकत्वादेवतत्तद्विशेषणानान्नव्यर्थतेत्यर्थ इति प्राहुः। परेतुयद्धर्मावच्छिन्नप्रतियोगितात्वव्यापकत्वमेव हेतु र्व्यापकताच स्वनिष्ठाभावप्रतियोगितावच्छेदकत्वसम्बन्धेन तथाचव्यापकतारूपाभाववैलक्षण्याद्वैयर्थ्यासम्भव इति वदन्ति। अन्येतूभयावृत्तिधर्मावच्छिन्नत्वस्योभयावृत्तिधर्मसत्तात्वान्यतरावच्छिन्नप्रतियोगिताकाभावं स्ववृत्तिवाच्यत्ववत्तासम्बन्धावच्छिन्नतद्व्यक्तित्वनिष्ठावच्छेदकताक-प्रतियोगिताकाभावञ्चादाय स्वरूपासिद्धिवारणाय स्वरूपसम्बन्धावच्छिन्नतद्व्यक्तित्वनिष्ठावच्छेदकत्वान्यावच्छेदकत्वानिरूपितत्वार्थकत्वमिव यद्धर्मावच्छिन्नत्वस्यापिस्वरूपासिद्धिवाराणाय समवायसम्बन्धावच्छिन्नयद्धर्मनिष्ठावच्छेदकत्वान्यावच्छेदकत्वानिरूपितत्वार्थकत्वमस्तू भयावृत्तित्वस्याप्रवेशेनतदनुपादाननिबन्धनासिद्धिर्न तस्याप्रवेशादेवचनव्यर्थविशेषणतेत्यालपन्ति। अवच्छिन्नत्वस्यातिरिक्तानवच्छिन्नत्वरूपस्य भेदघटितत्वेनावच्छिन्नत्वसापेक्षतया दुर्निरूपत्वेनविलक्षणस्यैववाच्यतया समवायसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगितानिष्ठमितरानवच्छिन्नप्रतियोगितानिष्ठमिवविलक्षणमेवाङ्गीकार्यमित्यसिद्धिवारकविशेषणस्याप्रवेशेन तदनुपादानप्रयुक्तासिद्धिर्न यतोनासिद्धिरतोनव्यर्थविशेषणत्वमि-

त्यर्थः नचप्रत्येकपदस्यासिद्धिवारकस्यप्रवेश इति वाच्यम् स्वावच्छिन्नप्रतियोगिताकाभाववत्वसम्बन्धेनतादृशप्रतियोगिताकूटएवहेतुरित्यस्यैववक्तव्यत्वा दन्यादृशस्यप्रत्येकावच्छिन्नाभावस्यदुर्वचत्वादिति । अतएवयावत्वस्यव्यापकत्वार्थकत्वोपगमेनसंसर्गकोटावुभयावृत्तित्वादेर्निवेशनचपूर्वकाविलेपपिवैयर्थ्यपरीहारसम्भवा द्व्यर्थाविशेषणत्वसम्पत्यैकल्पान्तरस्यानुसृतस्य यावत्वादेर्व्यापकत्वार्थकत्वोपगमादिनातत्फलकत्वसंपादनं सन्दर्भाविरुद्धामित्यापानिरस्तमितितुवयं ब्रूमः ॥

अथयोयदीययावद्विशेषाभाववानित्यस्य—योयदीयानां यदभावप्रतियोगित्वानां यावतां विशेषाभाववान्प्रत्येकधर्मावच्छिन्नाभाववानिति सतत्सामान्याभाववानित्यस्य च सतदात्मकसामान्याभाववानित्यर्थएव कुतोनाङ्गीकृतः असिद्धिवारकविशेषणस्यासम्भवाल्लाघवाच्चेतित्वत्रचिन्त्यं । ध्येयमिति, सामान्याभावप्रतियोगित्वस्यप्रतियोगितावच्छेदकरूपताया अतिरिक्तताया वा सिद्धान्तसिद्धतयासान्दिग्धासिद्धेर्दुर्वारत्वप्रसङ्गरूपास्वरसंसूचयितुमुक्तम् ।

विशेषपदस्यन्यूनवृत्तिधर्मवदर्थकतामभ्युपेत्यव्याख्यानन्दूषयितुमाहयोयद्धर्मन्यूनवृत्तीत्यादि, न्यूनवृत्तित्वंच स्वसमानाधिकरणत्वेसतिस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं सत्तात्वस्यन्यूनवृत्तित्ववारणाय—स्वसमानाधिकरणेति ननुन्यूनवृत्तिधर्मेपक्षतावच्छेदकाविशिष्टान्यत्वम्वाच्यम् वैशिष्ट्यं च स्वाश्रयवृत्तित्वस्वानाश्रयवृत्तिवृत्तित्वोभयसम्बन्धेन तथाचघटावृत्तिसंयोगत्वस्यवृक्षपटादिसंयोगद्वयवृत्तित्वा द्वृक्षसमवेतत्वस्यचवृक्षतदितरोभयवृत्तिसत्तावृत्तित्वान्नपक्षतावच्छेदकविशिष्टान्यत्वमित्यत आह वृक्षान्यासमवेतत्वेति, नचवृक्षान्यासमवेतत्वस्यवृक्षत्ववृक्षरूपादावेवसत्वेननसंयोगत्वसामानाधिकरण्यमितिवाच्यम् वृक्षद्वयसंयोगान्तर्भावेणतत्सत्वा त्तस्यवृक्षान्यासमवेतत्वात् । अथपक्षतावच्छेदकविशिष्टान्यत्वस्यवृक्षसंयोगनिष्ठतत्तद्व्यक्तित्वेपिनसम्भवः तस्यवृक्षान्यकप्यादिवृत्तिवृत्तित्वा न्नचवृक्षद्वयसंयोगनिष्ठतद्व्यक्तित्वएवतत्सम्भव इति वाच्यम् तद्वृक्षत्वस्यपक्षतावच्छेदकत्वउक्ततद्व्यक्तित्वेपिपक्षतावच्छेदकविशिष्टान्यत्वासम्भवादितिचे द्वैशिष्ट्यस्यस्वविशिष्टवृत्तिवृत्तित्वघटितेनाविवक्षितत्वात् वैशिष्ट्यञ्चस्वानाश्रयत्वस्वानाश्रयवृत्ति·

गुणानाश्रयत्वोभयसम्बन्धेन तथाचकव्यादेः स्वानाश्रयत्वेपि स्वाश्रयवृत्तिसंयोगरूपगुणानाश्रयत्वविरहेणवृक्षसंयोगानिष्ठतद्व्यक्तित्वेविशिष्टान्यत्वसम्भवादिति। यद्वापक्षसमवेतविशिष्टान्यत्वमेवविशेषणं वैशिष्ट्यञ्चस्वावृत्तित्वस्वानाश्रयवृत्तिवृत्तित्वोभयसम्बन्धेन तथाचनकोपिदोषः। वस्तुतस्तुन्यूनवृत्तित्वस्यैवयद्धर्मसमानाधिकरणत्वेसतियद्धर्माश्रयविशिष्टान्यत्वार्थकत्वं स्वीकृत्य योयद्धर्मन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकयावदभाववान् सतद्धर्मावच्छिन्नाभाववानित्येवं व्याप्तिरेववाच्या वैशिष्ट्यञ्चानुपदोक्तोभयसम्बन्धेन एवञ्चसामान्यव्याप्तिग्रहाद्व्याप्यसामान्याघटकपक्षतावच्छेदकविशिष्टान्यत्वादिघटित विशेषहेतुकानुमित्यसम्भवेपि नक्षतिरिति एवं वृक्षपदस्य तत्संयोगवदर्थकतयातत्संयोगवदन्यासमवेतत्वेपक्षसमवेतरूपादिविशिष्टत्वसत्वेपि संयोगत्वाश्रयविशिष्टान्यत्वसत्वेनतत्सङ्ग्रहः तत्तद्वृक्षत्वं पक्षतावच्छेदकीकृत्योक्तहेतुनासंयोगसामान्याभावसाधनेप्रागुक्तेववक्ष्यमाणेपिचवृक्षान्यासमवेतत्वमादायदोषासम्भवात् वृक्षपदस्य तत्तत्संयोगवदर्थकतायाअभ्युपेयत्वादिति त्वभिनवपन्थाः। केचित्तुवृक्षसंयोगानिष्ठतद्व्यक्तित्वेपक्षतावच्छेदकाविशिष्टान्यत्वसंपत्यर्थं स्वाश्रयावृत्तिवृत्तित्वस्यवैशिष्ट्यघटकत्वं वृक्षसमवेतत्वस्यन्यूनवृत्तित्ववारणायन्यूनवृत्तौपदार्थविभाजकावृत्तित्वस्यविशेषणत्वं वृक्षान्यासमवेतस्याभावादेःसमवायेनस्वाश्रयावृत्तिवारणायस्वाश्रयावृत्तौवृत्तिमत्वस्यसमवायावच्छिन्नस्यचविशेषणतांचवदन्ति तन्नातिचारु तथासतिद्रव्यत्वान्यवृक्षसमवेतन्ववृक्षवृत्तिगुणात्वाद्यवच्छिन्नाभावमादायदोषसम्भवे वृक्षान्यासमवेतत्वावच्छिन्नाभावपर्यन्तानुधावनस्यवैफल्यापत्तेः। यत्तुवृक्षवृत्तिसंयोगत्वावच्छिन्नाभावमादायदोषसम्भवेतत्परित्यागोनोचितइति ,तदस त्तदादायसन्दिग्धासिद्धेरेवसम्भवेननिश्चितासिद्ध्यनुरोधेनापितावद्दूरानुधावन सार्थक्यसम्भवात् अस्मत्कल्पेचवृक्षसंयोगत्वमादायदोषस्यनसंभवोपि तादृशसंयोगत्वेवृक्षसमवेतकपिसंयोगत्वविशिष्टत्वस्यसत्वात् स्वानाश्रयपिपीलिकावृत्तिवृक्षसंयोगवृत्तित्वा न्नचयद्धर्मसमानाधिकरणधर्मन्यूनवृत्तित्वघटकस्वसानाधिकरणभेदप्रतियोगितावच्छेदकत्वमिविहाय सामान्यव्याप्तौयत्समवेतत्वविशिष्टान्यत्वंविशेषणन्देय न्तावतैववृक्षान्यासमवेतत्वावच्छिन्नाभावस्यापिवारणादिति

वाच्यं तत्संयोगतद्भिन्नत्वान्यतरत्वावच्छिन्नाभावमादायासिद्धेः पूर्वकल्पापेक्षयागुरुत्वाच्चेति।

वृक्षादौगगनादेरेकएवसंयोगोलाघवादिति, अथात्रवृक्षएवतत्तदवयवावच्छिन्नगगनसंयोगस्यभेदाभावोभिमतः किम्वावृक्षगगनसंयोगाद्घटादिगगनसंयोगस्यापिभेदाभावइतिविमर्षे लाघवात्सर्वेषामैक्यंप्राप्नोति तत्रकैश्चिदेकक्रिययैकत्रसंयोगनाशेनिःक्रियेऽप्यपरत्रसंयोगनाशापत्तिः वृक्षविनाशात्तत्संयोगनाशेविद्यमानघटादिष्वपिसंयोगनाशापत्तिश्च क्रियाश्रयनाशाभ्यामपिलाघवानुरोधेनसंयोगविनाशकल्पने पाकाश्रयनाशादितोरूपादिनाशस्याप्यप्रामाणिकत्वापत्त्यैकरूपादिवादापत्तिस्यादिति वृक्षएवतत्तदवयवावच्छिन्नसंयोगभेदाभावोङ्गीकार्यः शाखादौक्रियायांवृक्षेपिसंयोगप्रतिद्वन्द्विविभागजविभागोत्पत्त्यानिःक्रियदेशावच्छिन्नोपिसंयोगोनश्यत्येव निःक्रियदेशएवचसंयोगःपरमवतिष्ठते खण्डवृक्षोत्पत्त्यादिस्थलेऽवस्थितावयवसंयोगसत्वेपितदवच्छिन्नसंयोगनाशवदिति समानोत्पत्तिध्वंसादिमतां समानक्रियाणाञ्चावयविनामेकगगनसंयोगाभ्युपगमेपिनक्षतिरित्युच्यतइति तदेवचतत्वं।अथसमवायेनतत्तत्संयोगंप्रतितत्तद्द्रव्यत्वेनकारणत्वकल्पना तत्तत्संयोगप्रतिनियतदेशनियमेपि अवच्छेदकदेशनियमायावच्छेदकतासम्बन्धेनसंयोगंप्रतितादात्म्येनावच्छेदकदेशकारणत्वमपिविशिष्यैववाच्यं तत्रावच्छेदकतासम्बन्धेनतत्तत्संयोगंप्रतितत्तद्देशत्वेनकारणत्वंयदिस्या त्तदागगनसंयोगस्य निखिलवृक्षावयवावच्छिन्नतया तंप्रतिकारणत्वकल्पनायानिष्प्रयोजनत्वा द्व्यभिचाराभावेनतदैक्यमप्रत्यूहंस्या त्तदेवनमूलाद्यवयवावच्छिन्नसंयोगंप्रतिमूलत्वादिनाकारणत्वस्यैवलाघवेनवाच्यत्वा त्तथाचमूलावच्छिन्नगगनसंयोगस्यशाखावच्छिन्नत्वेशाखायांमूलस्यासत्वेनव्यभिचारस्यात् व्यभिचारवारणायकार्यतावच्छेदककोटौविभुसंयोगान्यत्वादिविशेषणन्तु तदैक्यावधारणम्विनागौरवेणापादातुमशक्य मभ्यर्हितञ्चपदार्थलाघवगौरवापेक्षयाकार्यकारणभावलाघवगौरवमेव तेनैकसंयोगकल्पनालाघवमकिञ्चित्करमिति गगनवृक्षसंयोगस्यावच्छेदकभेदाद्भेदसिद्धिरित्यनुशयेनाह अतिप्रसंगभङ्गायेत्यादि। ननुगगनसंयोगस्यैकत्वेव्याप्यवृत्तितयाऽवच्छेदकविरहेणमूलाद्यनवच्छिन्नत्वान्नव्यभिचारप्रसक्तिः एवंप्राच्यांशाखायांशरीरवृक्षसंयोगइत्यादिप्रतीतेरकस्यै

वशरीरवृक्षसंयोगस्यप्राच्यादिदिगवच्छिन्नत्वशाखावाच्छिन्नत्वयोः स-त्वाद्व्यभिचारः नचोक्तप्रतीतौसंयोगद्वयावगाहित्वसम्भवः यत्रप्रा-च्यांमूलएकशरीरसंयोगः प्रतीच्यां शाखायामपरशरीरसंयोगस्त-त्र प्रतीच्यां मूलेशरीरसंयोगइतिप्रतीत्यापत्तेः एवं सं-योगजसंयोगस्थलएकसंयोगएवावयवद्वयावच्छिन्नत्वेनव्यभिचार-श्चेति मूलनिरूपितावच्छेदकत्वसम्बन्धावच्छिन्नवृत्तित्वविशिष्ट-संयोगंप्रतिमूलादेःकारणत्वम्वाच्य न्तथाचविशिष्टाधिकरणतया वैलक्षण्यान्मूलवृत्तित्वविशिष्टसंयोगाधिकरणत्वस्यमूलातिरिक्ताव-यवेऽसत्वा द्यथानोक्तस्थलयोर्व्यभिचारस्तथामूलशाखाद्यवच्छिन्नसं-योगव्यक्तीनांगगननिरूपितानामैक्येपिनव्यभिचारः नचोक्तव्यभिचा-रयोर्वारणाय स्वावच्छिन्नत्वस्वावच्छिन्नानुयोगिकत्वोभयसम्बन्धेन-शाखावत्संयोगंप्रति शाखात्वेनकारणत्वं कार्यतावच्छेदकसम्बन्ध-श्चस्वानुयोगितावच्छेदकत्व मेवंस्वावच्छिन्नत्वस्वावच्छिन्नप्रतियो-गिताकत्वोभयसम्बन्धेनशाखावत्संयोगंप्रतिशाखात्वादिनाकारणत्वं कार्यतावच्छेदकसम्बन्धश्चस्वप्रतियोगितावच्छेदकत्वमितिवाच्यं गौ-रवेणैवतस्यत्याज्यत्वा न्मेषद्वयादिसंयोगस्थलेचोभयोरेवावयवस्यप्र-तियोगितानुयोगितावच्छेदकत्वेनव्यभिचारतादवस्थ्याच्चेतिचेन्न स्वा-वच्छेदकत्वस्वावच्छेदकशाखादिसमवेतसमवायित्वोभयसम्बन्धेन-संयोगंप्रतितादात्म्येनशाखात्वादिनाकारणत्वएवतात्पर्यादुक्तव्यभि-चारयोरप्रसक्तेः दिक्कालदेशपुविलक्षणावच्छेदकत्वस्यस्वीकृततया-विजातीयावच्छेदकतासम्बन्धेनप्राच्याद्यवच्छिन्नसंयोगंप्रतिप्राच्या-दिदिक्त्वेनकारणत्वकल्पनादिग्विशेषावच्छेदकत्वनियमोप्युपपद्यत-एव नचमूलशाखानिष्ठावच्छेदकतासम्बन्धेनसंयोगंप्रति मूलशाखा-त्वादिनाकारणत्वमेवलाघवाद्व्यभिचारवारणायचवाच्य न्तथासतिग-गनसंयोगस्यैकत्वेपिनव्यभिचारइतिवाच्यं विशेषरूपेणसंसर्गत्वान-भ्युपगमात् यच्चोक्तंव्याप्यवृत्तेरवच्छेदकत्वाभावान्नव्यभिचारइति त-दपिन शाखायांवृक्षेगगनसंयोगइत्यादिप्रतीतेर्व्याप्यवृत्तेरप्यवच्छे-दकत्वाङ्गीकारादिति । अत्रब्रूमः अधोमूलेवृक्षेगगन संयोगः उपरिशाखायांवृक्षेगगनसंयोगः प्राच्यामेतच्छाखायांवृक्षेगगनसंयोग-इत्यादिप्रतीतेर्मूलावच्छिन्नस्याधोदेशावच्छिन्नतया शाखाद्यवच्छि-न्नस्यचोपरिदेशाद्यवच्छिन्नतया मूलशाखाद्यवच्छिन्नगगनसंयोग-

स्यभेद एव स्वीकरणीयः अभेदे चोपरिमूले वृक्षे गगनसंयोग इति प्रतीत्यापत्तेः नचोक्तप्रतीत्यसिद्धि र्येन च प्रमाणेन संयोगसिद्धिस्तेनैवोक्तप्रतीतेरपि संपाद्यत्वादिति। अत्रेदम्बोध्यम् उक्तप्रतीतौ वृक्षवृत्तिगगनसंयोगतत्तद्दिग्देशावच्छिन्नत्वभानस्यानुभविकत्वे वृक्षवृत्तितायास्वानुभविकत्वे भवेदेव संयोगभेदः देशनिष्ठावच्छेदकतायामेव दिगवच्छिन्नत्वभानस्य प्रामाणिकत्वं च नाङ्गीकार्यः। उक्तप्रतीत्यापत्तेरयोगा न्मूलनिष्ठावच्छेदकताया उपरिदेशानवच्छिन्नत्वात् अत एव दिग्व्यभिचारं परित्यज्य संयोगजसंयोगे देशव्यभिचार एवाद्दतो भट्टाचार्येण एवं वृक्षे गगनसंयोगस्याव्याप्यवृत्तित्वं गगनेऽव्याप्यवृत्तिप्रतिपादयतो यत्तु संयोगमात्रेत्यादि गदाधरग्रन्थस्यापि देशनिष्ठावच्छेदकतायामेव दिगवच्छिन्नत्वे तात्पर्यम्बाच्य मन्यथा गगनसंयोगनिष्ठगगनवृत्तितायामेकस्यामुपरिदिग्मूलेदेशावच्छिन्नत्वासंभवेन भेदस्वीकारे वृक्षेपि भेदस्यावश्यकत्वापत्तेः। यद्वा गगने वृक्षे संयोगसत्तायां वृक्षस्यावच्छेदकतयाऽव्यागवृत्तितायां तात्पर्यम् अधोमूले वृक्षे गगनसंयोग इत्यादिप्रतीतिरप्रमाणिक्येवेति। केचित्त्वतिप्रसंगभङ्गायेत्यादि ग्रन्थमन्यथाव्याचक्षते तथाहि देशविशेषाद्यनवच्छिन्नसंयोगस्यानुपलम्भात्कारणानियम्यस्य देशविशेषावच्छिन्नत्वस्यानियमप्रसङ्गाद्देशविशेषस्य कारणत्वम्वाच्यं तत्कार्यतावच्छेदकञ्च न संयोगत्वं व्यभिचारापत्तेः तद्वारणाय च तत्तद्देशावच्छिन्नत्वं कार्यतावच्छेदकमभ्युपेय मेवञ्चानवच्छिन्नस्याव्याप्यवृत्तेर्गगनसंयोगस्योत्पत्त्यसम्भव उत्पादकसामग्र्यभावा द्यत्किंचिद्विशेषसामग्रीम्विना सामान्योत्पत्त्यसंभवेन विशेषसामग्र्या अवश्यापेक्षणीयत्वात् विशेषश्चावच्छिन्न एव क्लृप्तोऽनवच्छिन्नस्य कल्प्यत्वात्क्लृप्तानुसारेणैव च कल्पनायाः कार्यत्वा दित्यव्याप्यवृत्तिगगनसंयोगसिद्धौ नस्वरूपासिद्ध्यवकाश इति तन्न चारु वृक्षेऽव्याप्यवृत्तेरेव गगनेऽव्याप्यवृत्तितया तदुत्पत्तिसम्भवादिति दिक्॥ ०॥

दीधितौ यत्तदर्थयोरननुगमादिति, यत्तदर्थसंयोगघटत्वादीनामननुगतैकरूपाभावेन व्याप्तिकोटौ प्रवेशासम्भवाद्घटसमान्याभावघटीयया वह्निविशेषाभावादीनांव्याप्तिग्रहश्च न संयोगीयया वह्निविशेषाभावलिङ्गकसंयोगसामान्याभावानुमित्युपयोगी तयोर्विशिष्यव्याप्तिश्चाग्रे निराकरणीया नचयत्तच्छब्दार्थत्वमेवानुगतो धर्मः तस्य प्रमेयत्वादिसाधारण्येन यत्त्वाश्रयसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावकूटस्य

प्रायसोऽसत्वप्रसंगात् नचयत्वन्तत्वन्धर्मविशेषः मानाभावात् यत्पदेनैकधर्मोपादानेतत्पदेनापितस्यैवोपादानमिति नियमस्याशक्यानिर्वाह्यत्वाच्चेतिभावः। प्राचाम्मतेयत्तदर्थयोरनुगमादाहेति अनुगतत्वेसत्यननुगतकार्यकारीधर्मविशेषोयत्वतत्वमनुभवानुरोधात् उक्तनियमोपितत्स्वाभाव्यादेवोपपद्यते कथमन्यथास्वीयस्तनपानादिगोचरप्रवृत्तेस्तनपानादिगोचरकार्यताज्ञानादेनाव्याप्तिमुपलभ्य-योयत्रप्रवर्त्ततेसकार्यतयातज्जानातीति सामान्यतोव्याप्तिमुपादाय गवानयनप्रवृत्तितत्कार्यज्ञानयोरगृहीतव्याप्तिकेनापितत्प्रवृत्यातज्ज्ञानमनुमीयते यदिचसाध्यजातीयसाधनजातीययोः कयोरपिव्यभिचरस्यानुपस्थितावुपस्थितानिखिलसाध्यजातीयसाधनजातीयव्याप्तेर्विशिष्यग्रहादेवागृहीत व्याप्तिप्रवृत्तिविशेषालिङ्गेन कार्यत्वविशेषज्ञानानुमानसम्भव इति सामान्यव्याप्त्यभ्युपगमोनिरर्थक इत्युच्यत तदाप्रकृतेपि तथैव संयोगसामान्याभावसिद्ध्याभिमतसिद्धिरिति प्राचामाशयः। इदन्तु बोध्यम् यत्वतत्वयोरननुगतत्वेपि न क्षतिः जातिर्जातिमतीजातित्वादित्यनुमानादेवाभिमतसिद्धिः साध्यता च स्वतादात्म्यस्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावकूटव्यापकाभाव प्रतियोगितावच्छेदकत्वोभयसम्बन्धेन । यद्वावृक्षाद्यवृत्तिस्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताक यत्किञ्चिदभावकं यद्य त्तद्भेदकूटवान् योयः सवृक्षानिष्ठाभावप्रतियोगितावच्छेदक इति व्याप्त्यैवसामान्यव्याप्तिस्थलाभिषिक्तया भट्टाचार्योक्तयाभिमतसिद्धिरिति * ॥

दयादकत्वन्दुर्घटमिति, अथावच्छिन्नत्वैकानवच्छिन्नत्वोभयाभाववत्वमेवास्त्वेकावच्छिन्नत्वमुभयाभावघटकञ्चैकावच्छिन्नत्वं स्वसमानाधिकरणावच्छिन्नतादृशाभावाधिकरणताकूटावच्छेदकावच्छिन्नत्वरूप मेवञ्च गुणनिष्ठाधिकरणत्वस्यावच्छिन्नत्वविरहेणोभयाभाववत्वात्तस्यसाध्यव्यापकत्वं वृक्षानिष्ठसंयोगविशेषाभावधिकरणत्वेकुत्रापिनस्वसमानाधिकरणनिखिलतादृशाधिकरणतावच्छेदकावच्छिन्नत्वमित्युभयाभावविरहेणसाधनाव्यापकत्वम् कापिसंयोगविशेषाभावाधिकरणत्वमात्रस्यैव स्वसमानाधिकरणनिखिलतादृशावच्छेदकमूलावच्छिन्नत्वसत्वेनोभयाभाववत्तयाकापिसंयोगाभावरूपसाध्यव्यापकत्वस्यापिसम्भवेन नचतथापीत्याद्युक्तशङ्काया अपि

नावकाशः भट्टाचार्येणचेदमेकावच्छिन्नत्वं कपिसंयोगाभावरूपसा- ध्यव्यापकत्वसम्पत्तयउक्तम् नचाविशिष्टाभावमुपेक्ष्यकथमुभयाभाव उक्त इतिवाच्य मनिर्वाहा त्तथाहिजातित्वरूपत्वादीनाम- पियत्पदार्थतयातदवच्छिन्नाभावरूपसाध्यव्यापकत्वस्योभयाभाव- विशिष्टतादृशविशेषाभावे ऽसम्भवः स्वसमानाधिकरणावच्छिन्न तादृशाभावाधिकरणत्वस्यतदवच्छेदकत्वस्यचाप्रसिद्धे जातिवि शेषाभावाद्यधिकरणत्वमात्रस्यैव व्याप्यवृत्तित्वा त्तथाचै कावच्छिन्नत्वाप्रसिद्ध्यातद्घटितोभयाभावाप्रसिद्धेः तदुपपत्तयेचै- कावच्छिन्नत्वघटकाधिकरणत्वविशेषणावच्छिन्नत्वस्याव्याप्यवृत्त्य- भावत्वावच्छिन्ननिरूपितत्वानवच्छिन्नत्वोभयाभावरूपस्यावच्छेदक- त्वस्यचतद्घटकस्य स्वनिरूपितावच्छेदकत्वाभाववत्वसम्बन्धा- वच्छिन्नस्वाभाववत्वरूपस्यवाच्यतया विशिष्टाभावप्रवेशे जाति- त्वरूपत्वादीनांयत्पदेनोपादानेविशिष्टाप्रसिद्ध्या साध्योपाध्योः सा- मान्यव्याप्त्यनिर्वाहः यत्पदेनजातित्वस्योपादाने देशमात्रस्यैवप्रागु- क्तादृशावच्छेदकत्ववत्तया तदनवच्छिन्नत्वावच्छिन्नत्वयोर्विरुद्ध- त्वादिति। यद्वायदीययावद्विशेषाभावत्वावच्छिन्ननिरूपितमेकमधिकर- णत्वमेकावच्छिन्नत्वविशेषितंलघुभूतमुपाधिः एकावच्छिन्नत्वञ्चाव- च्छिन्नत्वैकानवच्छिन्नत्वोभयाभाववत्वमेव तद्घटकमेकावच्छिन्न- त्वञ्चैकमात्रवृत्तिधर्मावच्छिन्नावच्छेदकताकत्व मेवञ्चाव्याप्यवृत्त्यभा- वसाधारणकूटत्वेनव्याप्यवृत्त्यधिकरणत्वमप्यव्याप्यवृत्त्येवेति संयोगि ययावद्विशेषाभावाधिकरणत्वेऽवच्छिन्नत्वस्यानेकावच्छिन्नाभावकूटा- धिकरत्वस्यवृक्षावयवत्वेनैव देशावच्छिन्नतयैकानवच्छिन्नत्वस्यचस- त्वेनतस्यसाधनाव्यापकत्वं कपिसंयोगीययावद्विशेषाभावाधिकरण- त्वस्यतन्मूलावच्छेद्यतयोभयाभावत्वेनसाध्यव्यापकत्वमपिसम्भवति अत्रविशिष्टाभावनिवेशेनक्षतिः समानाधिकरणोभयत्वस्यैकविशिष्टा- परत्वरूपत्वात्। भट्टाचार्याणामुभयाभावोक्तिश्चात्रकल्पेस्वातन्त्र्ये- णनद्दयते किन्तुप्रागुक्तोभयाभावघटकमेकावच्छिन्नत्वमेकप्रकारेण- निरुच्याथवेत्यादिनाप्रकारान्तरेण तस्यैवनिर्वचनेउभयाभावात्मकत्व मितिग्रन्थलाघवानुरोधेनापितथोक्तिसम्भवेनवापूर्वपक्षानवकाशा- दितिचे दुपाधिसाध्ययोस्सामान्यव्याप्त्यनिर्वाहस्याकिञ्चित्करतया निरवच्छिन्नत्वरूपैकावच्छिन्नत्वनिवेशएव लाघवमित्याशयेनाह एका-

वच्छेदेनेत्यादिना, अधिकरणतामात्रस्याधिकरणवृत्त्यसाधारणधर्मावच्छिन्नतया देशकालेत्युक्त एकधर्मावच्छिन्ननिरूपिताधिकरणत्वस्यैकत्वे गुणनिष्ठस्यद्रव्यादिनिष्ठस्यचाधिकरणत्वस्यावच्छिन्नत्वमेवस्या दनवच्छिन्नत्वमेववास्यादिति देशकालानवच्छिन्नत्वं वृत्तित्वविशेषणतयोपात्तं तथाचतादृशाधिकरणत्वे गुणवृत्तित्वमनवच्छिन्नम्वृक्षादिवृत्तित्वञ्चसावच्छिन्नमितिनदोषइति ।

ननूपाधेर्व्यभिचारोन्नायकतयाव्याप्तिबुद्धावेवविरोधितयासाध्यसाधनयोः प्रकृतेसामान्यतएवव्याप्तर्गृहीतत्वेन तत्रसामान्यतएवसाध्योपाध्योर्व्याप्तिबुद्धेर्विरोधित्वस्वाच्य मन्यथाधूमाव्यापकमहानसीयतृणादेर्महानसीयवह्निव्यापकताबुद्धेर्वह्नित्वेनधूमत्वेनव्याप्तिबुद्धौविरोधित्वं स्या त्सामान्यतश्च साध्योपाध्योर्व्याप्तिर्नसम्भवति कपिसंयोगसामान्याभाववतिनिरवच्छिन्नकपिसंयोगीयविशेषाभावकूटवत्वस्यव्यभिचारित्वादित्याशयेनाशङ्कते नचतथापीत्यादिना। उक्तव्याप्तौसाध्यविधयाप्रवेशादिति, साध्यसाधनयोर्व्याप्तौव्यभिचारवारणायजात्यवच्छिन्नाभावप्रवेशस्योक्तत्वादित्यर्थः तेनसाध्यसाधनयोर्व्याप्तौजातिप्रवेशस्यप्रागेवकृतत्वेनोक्ताशङ्कायानसन्दर्भविरोधः एकावच्छेदेनतदीययावद्विशेषाभावस्योपाधित्वादितिदीधितौ कपिसंयोगाभावमादायोपाधिव्याप्तिभङ्गाशङ्कायां जातिप्रवेशस्यस्मारितत्वात् अतएवोपाधिसंपत्त्यर्थंजात्यवच्छिन्नाभावप्रवेशोनोचितइत्याशंकापिनिरस्ता व्यभिचारवारणायैवतत्प्रवेशस्यप्रागुक्तत्वादिति ॥ जात्यवच्छिन्नाभावश्च, संयोगघटोभयाभावादिकमादायसिद्धसाधनवारणाय जातीतरधर्मावच्छिन्नप्रतियोगिताकाभावरूप स्तज्जातिगतैकत्ववृत्तिप्रतियोगिताकाभावपर्यवशायी नातःसंयोगत्वरूपजातेःकपिसंयोगाभावप्रतियोगिताबच्छेदकत्वेपिदोषतादवस्थ्यमितिभावः । ० ॥

गुणविभाजकजातेरेवेति ॥ अयमभिप्रायः यत्वतत्वघटितसामान्यव्याप्तौतदेकविशेषसाध्यव्यापकत्वतादृशसाधनाव्यापकत्वयोरेकत्रग्रहोपिविरोध्यनुभवात् गुणविभाजकयज्जात्यवच्छिन्नाभावश्च यज्जात्यवच्छिन्नाभावत्वेनसाध्यविशेषः गुणविभाजकतज्जातिसामानाधिकरण्योभयावृत्तिधर्मावच्छिन्नाभावकूटोपिचसाधनविशेषः यत्वतत्वघटितस्थलवद्वाह्निधूमादिस्थलेमहानसीयवह्न्यादेर्व्यापकत्वाप्रतिभासनान्नदोषः एतेनसाध्यसाधनव्याप्तौजात्यवच्छिन्नाभावप्रवेशवद्गुणविभा-

जकजात्यवच्छिन्नाभावप्रवेशप्रयोजनविरहादुपाधिसंपत्त्यर्थन्तत्प्रवेशश्चानुचितइतिनिरस्तम्। निरवच्छिन्नवृत्तिकत्वविशिष्टसंयोगीययावद्विशेषाभावस्याप्युपाधित्वंयद्यपिसंभवति तथापिसामान्यव्याप्त्यनुरोधेनसामान्यएवोपाधिरुक्तः विशेषव्याप्तौचःविशेषोपाधिरग्रेवक्ष्यतएवेति गुणविभाजकजातित्वञ्च गुणत्वव्याप्यत्वेसतिगुणत्वव्याप्याव्याप्यजातित्वं तदपिगुणत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकजातिमदन्यजातित्वं जातिमत्ताचस्वसामानाधिकरण्यस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेनेति। वस्तुतस्तुगुणविभागसूत्रजन्यबोधीयोद्देश्यतावच्छेदकत्वमेवगुणविभाजकत्वंबोध्यम्। अस्तुसामान्यव्याप्तौसामान्यस्यैवोपाधेःप्रदर्शनीयत्व न्तथापिनक्षतिरित्याशयेनाह यत्विति,तथाचपरस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टतदीययावद्विशेषाभावस्योपाधेः तत्सामान्याभावव्यापकत्वं सामान्यतएवसम्भवतिकपिसंयोगसामान्याभाववत्याभिघातसामान्याभाववतिचवृक्षेमूलस्यान्तर्द्देशस्यचतदीयविशेषाभावमात्रावच्छेदकत्वेनपरस्परानवच्छेदकत्वविरहेणपरस्परानवच्छेदकतत्तच्छाखाद्यनवच्छिन्नमूलान्तर्द्देशाद्यवच्छिन्नवृत्तित्वविशिष्टतत्तदीययावद्विशेषाभावयोरसत्वा त्साधनव्यापकत्वन्तुनसम्भवतिसंयोगीययावद्विशेषाभाववतिवृक्षेतादृशवृत्तित्वविशिष्टस्यतस्यासत्वात् देशमात्रस्यैवतत्रपरस्परानवच्छेदकतयातदनवच्छिन्नत्वस्यनिरवच्छिन्नवृत्तित्वएवसत्वादितिभावः। नचपरस्परत्वप्रवेशादननुगमः तदीयविशेषाभावत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वविशिष्टाधिकरणत्वस्योपाधित्वेनविवक्षणात् वैशिष्ट्यंच स्वावच्छिन्ननिरूपितत्व स्वविशिष्टानवच्छिन्नत्वोभयसम्बन्धेनस्ववैशिष्ट्यंच स्वाश्रययत्किंचिदभावाधिकरणतानवच्छेदकत्वसम्बन्धेन। अथवातादृशाभावत्वविशिष्टाधिकरणताकूटवत्वमेवोपाधिः वैशिष्ट्यंच प्रागुक्तोभयसम्बन्धेनेति यत्किंचित्त्वप्रवेशा त्संयोगविशेषाभावत्वाश्रयाभावाधिकरणतानवच्छेदकदेशाप्रसिद्ध्यादिप्रयुक्तोपाध्यसम्भवानवकाशः। अत्रपरस्परावच्छेदकंयद्यत्तदनवच्छिन्नत्वंतुनप्रवेश्यम् तस्यनिरवच्छिन्नत्वएवपर्यवसानेन पूर्वकल्पाविशेषादिति॥

वृत्त्यनियामकस्यप्रतियोगितवच्छेदकत्वपक्षे ऽवच्छेदकतासम्बन्धेनतदभावाधिकरणीभूतदेशस्या वच्छेद्यतासम्बन्धेनाभाववत्व मेकावच्छिन्नत्वं व्याप्यवृत्तिरूपादिविशेषाभावकूटाधिकरणतायाअपि सं-

ग्राहकंभविष्यतीत्याशयेन चिन्त्यमित्युक्तम्। बहुषुपुस्तकेषु तादृशार्थप्रतिपादकः केचित्त्वित्यादिग्रन्थएवोपलभ्यते । अत्रावच्छेद्यत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावनिवेशनञ्च सामान्याभावनिवेशपक्षेलाघवानुरोधेनैवा वच्छेद्यत्वस्यप्रतियोगित्वे तत्रस्वरूपसम्बन्धावच्छिन्नत्त्वस्यप्रवेश्यत्वात् अवच्छेदकत्वसम्बन्धावच्छिन्नाभाववद्यद्यत्तन्निष्ठावच्छेदकत्वानिरूपितत्वाभावनिवेशेच गगनादीनामपि यत्पदार्थतया तन्निष्ठाव्याप्यवृत्तितानियामकावच्छेदकत्वाप्रसिद्ध्योक्ताभावाप्रसिद्धिःस्यादितितन्निवेशः। वृत्त्यनियामकस्याभावप्रतियोगितानवच्छेदकत्वेऽपि तत्सम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभावएव प्रमीयविशेष्यत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकोनिवेश्यइतिबोध्यम् ।

तदनवच्छेदकस्येति, । नचव्याप्यवृत्तिरूपाद्यभावाधिकरणतायाअप्यवच्छेदकत्वस्यसंसर्गधर्म्मविशेषादौप्रसिद्धिसम्भवा त्तत्साधारणावच्छेदकत्वोपादाने क्षत्यभावान्नदोषइतिवाच्यम् धर्म्मसंसर्गादिनिष्ठावच्छेदकत्वाव्याप्यवृत्तितानियामकावच्छेदकत्वादिसाधारणावच्छेदकतात्वस्यैकस्याभावादिति । यद्यवच्छेदकतात्वद्वयमन्यतरत्वेननिवेश्य स्वनिरूपितान्यतरवदभाववत्त्वमेवा नवच्छेदकत्वंविवक्षित न्तदानकोऽपिदोषइतितुविभाव्यम् ।

तन्मतेसंयोगसामान्याभावस्यकेवलान्वयितयेति, अथपरमाणुद्वयसंयोगस्याभावोनपरमाणौसम्भवतितस्यानवयवत्वादिति कथंकेवलान्वयित्वं तथासतिपरमाणावेवव्यभिचारवारणाय हेतुविशेषणसार्थक्यसम्भवात्कथंवैयर्थ्यमुक्तम्। भट्टाचार्येणचप्राचीनमतग्रन्थएववृक्षत्वावच्छेदेनसंयोगसमान्यंव्यवस्थाप्य गगनादौसंयोगाभावसाधनपरतांसामान्यानुमानस्यप्रतिपादितम् तद्ग्रन्थेसुतरामुक्ताशङ्का । यत्तु वृक्षत्वावच्छेदेनवृक्षइवद्रव्यत्वावच्छेदनपरमाणावपि द्रव्येसंयोगसामान्याभावसम्भवेन केवलान्वयित्वसम्भवइति तन्न तथासतिद्रव्यत्वावच्छेदेननकस्यापिगुणस्यसम्भवइति तत्सामान्याभावस्यापिसत्तयोपाधिप्रदर्शनासंगतः नचादिपदग्राह्यद्रव्याभिन्नत्वस्योपाधितासंभवस्तस्याऽपिप्रमेयत्वावच्छेदेनद्रव्यवृत्तित्वसम्भवात्तस्मात्साधारणधर्ममात्रावच्छेदेनैवस्वस्मिन्नभावसत्वमिदानीम्प्राचाम्मतेनवाच्यं वृ-

क्षत्वावच्छेदेनेत्यादौ वृक्षत्वपदस्यापितद्व्यक्तित्वपरत्वमेववोध्यम्। ए-वञ्च वृक्षत्वावच्छेदेनवृक्षइव परमाणुत्वावच्छेदेनापिनतत्रतत्सत्व-सम्भव एवं द्रव्यत्वावच्छेदेनपरमाणौद्रव्येतत्स्वीकारे वृक्षेऽपितत्र-तत्सत्वमवारितंस्यादिति भट्टाचार्यस्यवृक्षपक्षकानुमानपरित्यागोनि-र्वीजस्स्यादिति तद्ग्रन्थासंगतिर्दुर्वारेत्तिचेत्नैवं परमाणावपिदिग्वि-शेषावच्छेदेनसंयोगाभावसत्वसम्भवा दुक्तञ्च वैशेषिकसुत्रोपस्कारेशं-करमिश्रपादैः। परमाणावपिदिग्विशेषस्यावच्छेदकत्वसम्भवइति चिन्त्यमिति, चिन्ताचतत्र दिग्विशेषस्यावच्छेदकत्वाननुभवएव। यद्वा परमाणौसंयोगाभावः प्रलयावच्छेदेनवर्त्ततइति केवलान्वयित्व-सम्भवः। नचैवमुत्पत्तिकालावच्छेदेन संयोगसामान्याभावसत्त्ववृक्षेऽ पिस्यादेवेति तत्साधनायासोवृथेतिवाच्यं समवायेनगुणंप्रतिता-दात्म्येनद्रव्यत्वेनकारणत्वएवोत्पत्तिकाले संयोगाद्यभावसम्भव स्त-त्रैवहिनमानं लाघवेनतत्तद्गुणविशिष्टावयविनंप्रति तत्तज्जातीय-गुणविशिष्टावयवत्वादिना कारणत्वस्यैववाच्यत्वादितिचिन्त्यम्। भ-ट्टाचार्य्यैस्तु वृक्षे संयोगसामान्याभावसाधनपरित्यागस्तु प्रौढ़िप्रक-टनाशयाकृतः तैरपि प्राचांमतेन वृक्षेयावत्संयोगाभावोभ्युपेयए-वेति न संयोगाभावकेवलान्वयित्वप्रतिपादकस्यवैयर्थ्यप्रतिपादक-स्यचतद्ग्रन्थस्यासङ्गतिरित्यलम्।

ननु यद्यपि वृक्षसंयोगसामान्याभावस्य संदिग्धतयोपाधेर्नसा-ध्यव्यापकत्वनिश्चयसंभवः नच साध्यव्यापकत्वसंशयादस्तुसंदिग्धो-पाधितेतिवाच्यं साध्यवत्तयानिश्चितउपाधिसंशयस्थलएवसंदिग्धो-पाधेस्स्वीकरणीयत्वा दन्यथापक्षेतरत्वस्यसर्वत्रोपाधिताप्रसङ्गा त्तथा पिसाध्योपाध्योः साध्यसाधनयोश्चयत्रव्याप्तिग्राहकसाम्यंतत्रैवसन्दि-ग्धोपाधेस्स्वीकारेणप्रकृतेव्याप्तिग्राहकवैषम्यस्यतर्करूपस्यविरहेणस-न्दिग्धोपाधिस्संभवत्येवेति तत्फलेव्यभिचारग्रहएवाशंकामाविष्करो-ति अत्रयद्यपीदित्यादिना। वस्तुतस्तु संयोगत्वंयदिकिंचिदव-च्छिन्नद्रव्यनिष्ठाभावप्रतियोगितावच्छेदकंस्या त्किंचिदवच्छिन्नद्रव्यो-त्पत्तिकावृत्तिस्स्यात्कपिसंयोगत्ववदिति तर्केणवाधोन्नीतपक्षेतरत्व-वन्निश्चितोपाधितैव वृक्षत्वस्यावच्छेदकत्वशंकाचाग्रेनिराकरिष्यति। यद्वा संयोगाभावोयदिगुणाभावद्रव्यत्वाद्यभावव्यभिचारीस्या द्गुणा-दिव्यापकप्रतियोगिकोनस्या द्रुपाद्यभाववत् व्याप्याभावव्याप्यत्वनि-

यमोव्यापकाभावे गृहीतोऽत्रविपक्षवाधकः यस्यचनयद्व्यापकप्रतियो-
गिकत्वंनतस्यतदभावव्याप्यत्वं यथावन्ह्यभावस्यनधूमाभावइतिव्य-
तिरेकस्यापिग्रहः नचविपक्षवाधकनियमेव्याप्यवृत्यभावत्वमुपाधिः
कथमन्यथाकपिसंयोगाभावस्यनैतद्वृक्षत्वाभावव्याप्यत्वमितिवाच्यं
संयोगाभावेतत्ताद्दिग्देशस्यावच्छेदकत्वविरहात् वृक्षत्वादीनामवच्छे-
दकत्वस्यनिराकरिष्यमाणत्वादिति निश्चितोपाधिता ॥ अतएव तथा-
पीत्यादि ग्रन्थासंगतिरापन अन्यथा वृक्षेसंयोगसामान्याभावस्यसं-
दिग्धत्वेन गुणाद्यभावस्यव्यापकत्वसंदेहेतद्व्याप्यत्वस्यापिसंदिग्धतया
नानुमापकत्वसंभवः हेतुमत्वनिश्चयस्यैवानुमितिजनकत्वादित्यसंग-
तिस्स्यादिति । अथवा स्वमतसिद्धव्याप्तिमतोविनानुकूलतर्कं संयोग
यावद्विशेषाभावस्यहेतुतयायथोपन्यासः तथास्वमतसिद्धगुणाभाव-
व्याप्यत्वस्यहेतुतयोपन्यासस्संभवत्येव व्यभिचारसंशयस्य यथाभव-
तांनप्रतिबन्धकत्वं तथास्माकमपि एकतरव्याप्तिग्राहकतर्कावतारेतु-
ल्यवलत्वाभावान्नप्रतिपक्षता तेनपर्वतोवह्निमान् धूमादित्यत्र वह्निः
पर्वतावृत्तिः पर्वतेतरत्वव्याप्यत्वादित्यस्यन प्रतिपक्षतेतिहृदयम् ॥

तथाचेति, आपत्तेरापाद्यव्यतिरेकनिश्चयाधीनतया प्रसंगादित्यु-
क्तथाव्यभिचारलाभइतिभावः । नच वायुत्वादौरूपाद्यनवच्छेदकतया
गृहीतेरूपाद्यभावावच्छेदकत्वस्यतत्तन्मूलशाखादौतत्तत्संयोगानवच्छे-
दकतयाज्ञातेतत्तदभावावच्छेदकत्वस्यचगृहीततयोक्तसामान्यव्याप्तेरेव
प्रमेयत्वेऽपिगुणाद्यभावावच्छेदकत्वंकुतोनसिद्ध्येदितिवाच्य मतिप्रस-
क्तेस्वरूपसंबन्धरूपावच्छेदकत्वाभावस्यानिर्णीततयोक्तावच्छेदकत्वा-
भावनिर्णयेनप्रतिवन्धात् देशकालादावेवोक्तव्याप्तेः प्रामाणिकतयात-
दितरत्रत्तन्नियमेमानाभावाच्च । दीधितावापत्ति दानंच पराभ्युपगत-
व्याप्तिमाश्रित्य तात्पर्यंचव्यभिचारएवसर्वत्रव्याप्त्यभ्युपगमापात्तिस्स्थ
ल इति वोध्यम् ॥

पक्षसमत्वादिति, इदंचसाध्याभाववत्वांशेनिश्चयरूपम् शेषांशे
संशयसाधारणं व्यभिचारज्ञानंविरोधीतिमतेन वोध्यम् ।

घटपूर्ववर्तित्वेति, इदंचस्वरूपसंबन्धरूपकारणत्वस्योपलक्षकम्
स्वरूपसंबन्धरूपतदवच्छेदकत्वस्य नातिप्रसक्तेसंभवः । एतेननियत-
पूर्ववर्तित्वावच्छेदकत्वस्य कार्यपूर्वकालवृत्त्यत्यन्ताभावप्रतियोगितान
वच्छेदकत्वरूपस्यपारिभाषिकस्यैवव्यवहृतत्वस्वीकारेऽपिनक्षतिः ॥

वह्निसामानाधिकरण्यसामान्येति, तथाचस्वरूपसंबन्धरूपावच्छेदकत्वघटितस्यप्राचीनमतसिद्धसाध्यसामानाधिकरण्यावच्छेदकत्वरूपव्याप्यतावच्छेदकत्वस्यनानुपपत्तिरितिभावः॥ अनुकूलतर्कविरहस्थलेसाध्याभाववत्वांशेसंशयात्मक व्यभिचारज्ञानमपि प्रतिबन्धकमित्याशयेनाहकेचित्त्वति, यथाचेत्यादिग्रन्थस्योक्तावच्छेदकत्वसाधकानुमान वाधनिरासपरतांदर्शयति वृक्षत्वेत्यादि।

व्यवहारेति, शब्देत्यर्थः संदिग्धाप्रामाण्यकमिति, आप्तोक्तत्वानिश्चयेनेत्यादिः। नन्वाद्यक्षणावच्छिन्नोघटो गुणसामान्याभाववान् गुणसमवायिकारणस्वाव्यवहितोत्तरत्वशून्यत्वादित्यनुमानमेवास्तुमानमितिचेन्न द्रव्योत्पत्तावयवद्वयसंयोगस्यासमवायिकारणतयातत्सद्भावार्थमस्तु समवायिकारणस्यप्राक्त्वापेक्षासमवायिकारणगुणजन्येगुणे समवायिकारणकार्येणसहभावेनैवापेक्ष्यतइत्येतदर्थेनाप्रयोजकत्वशंकाकवलितत्वादनुमानस्येतिभावः॥

प्रलयत्वमेवव्याहन्येतेति, भावकार्य्यत्वं स्वाश्रयप्रागभावानधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति स्वाश्रयानधिकरणस्वाश्रयप्रागभावासमानकालीनवृत्तिध्वंसप्रतिगिवृत्तिवा कार्य्यैकवृत्तित्वा चैत्रत्ववदित्यनुमानस्यैवप्रलयेप्रमाणतया तेनैव कार्यानधिकरणतयैवतत्सिद्धेः तदभावेप्रलयत्वस्यैवासिद्धिप्रसंगादिति भावः।

मानाभावादिति, स्वत्वस्याननुगततयादृष्टान्तपक्षयोरनुगतसाध्याभावेनानुमानासंभवादागमस्यचतात्पर्यानिर्णयादिनासंदिग्धार्थतयाप्रामाण्यानिर्णयादितिभावः॥

अथोक्तरूपेणप्रतीतिविषयत्वस्यावच्छेदकत्वाभावेवृत्तित्वाभावेवा कल्पने कुत्राप्यभावस्याव्याप्यवृत्तित्वंनस्या दित्यस्वरसादाहयदिब्रूयादिति॥ सम्बन्धसत्तायास्सम्बन्धिसत्ताप्रयोजकतयाप्रयोजकविरहेप्रयोज्यविरहस्यावश्यकत्वमित्याशयेनाह तथाचेति।

यत्सम्बन्धाभाववानिति, अभावश्चतत्सम्बन्धेन तद्वत्ताबुद्धिर्येनसम्बन्धेनतत्सम्बन्धसत्तामपेक्षते तत्सम्बन्धावच्छिन्न प्रतियोगिताकः तेन जलाद्यवच्छेदेनकालिकेन वह्निसंयोगाभाववतिसमये तदवच्छेदेनसंयोगसम्बन्धावच्छिन्नवह्न्यभावासत्वेऽपिनव्यभिचारः॥ अन्यथेति, सम्बन्धसत्तायाः सम्बन्धिसत्ताप्रयोजकत्वमभ्युपेत्योक्तस्य नियमस्यसप्रयोजकत्वोपगमइत्यर्थः। तुल्यन्यायेनेति, प्रयोजकाभा-

वस्य कार्य्याभावइवोक्तस्यासाधारणप्रयोजकस्य प्रयोज्यस्यापिनियामकतयो दीच्यव्याप्तेरपिसप्रयोजकत्वमेवस्यादितितात्पर्य्यार्थः ॥

योयदीयेत्यादि, अत्ररूपसमवायवतिवायौरूपासत्वेनव्यभिचारः समवायस्यनानात्वमभ्युपेत्यवदरादेरित्यत्रादिपदाद्वायोरप्यापत्तिविशेष्यतांवास्वीकृत्य यन्निरूपितत्वविशिष्टस्यसम्बन्धस्यानुयोगितया व्याप्यत्वम्बोरीकृत्यवारणीयः रूपसमवायीवायुरित्यप्रत्यया त्ररूपनिरूपितत्वविशिष्टसमवायानुयोगित्वंवायौ कुण्डसंयोगीवदरइतिप्रत्ययाद्धितत्रकुण्डनिरूपितत्वविशिष्टसंयोगानुयोगित्वंच स्वीक्रियतएव नचसम्बन्धादिपदोत्तरमत्वर्थीयस्यप्रतियोगित्वमर्थः सम्भवति । घटसमवायिरूपमित्यप्रत्ययात् । अथसम्बन्धिसत्तायाः सम्बन्धसत्ताप्रयोज्यत्वानभ्युपगमे ह्रदादौनवह्निः पर्वतेत्वस्तीत्येतन्नियमोनस्यादितिचे त्सत्यम् सम्बन्धसत्ताधीनत्वपक्षेऽपि सम्बन्धस्यासम्बद्धस्यनियामकत्वउक्तदोषतादवस्थ्यात् सम्बद्धस्य तथात्वेचानवस्थापातात्सम्बन्धस्यक्वचित्स्वरूपतोनियामकत्वाभ्युपगमएवकार्य्यइति सम्बन्धिसत्तायाएवस्वरूपप्रयोज्यत्वंवाच्यं रूपान्तरेणप्रयोज्यप्रयोजकभावयोरेकत्राविरोधात् संयोगसमवायादीनांसंबन्धत्वन्तुविशिष्टानुभववलात्लाघवाच्चाश्रीयतइत्येतदभिमानं ।

कुण्डादिमत्वापत्तिरिति, इदन्तुचिन्तनीयंसम्बन्धिसत्तायां संबन्धसत्ताव्याप्यत्वेव्यभिचारदर्शनसामान्याभावेननिर्णीतेव्यापकाभावेनव्याप्याभावसाधनेतदुभयोर्व्याप्तिसप्रयोजकत्वाङ्गीकारेपिनोक्तदोषः प्रयोज्यप्रयोजकभावाङ्गीकारपक्षेपूर्वोक्तव्याप्तेस्सप्रयोजकत्वाङ्गीकारेऽपि तत्तन्निरूपिततत्तत्प्रतियोगिकत्वविशिष्टसंयोगसमवायादेरनुयोगितयानियतस्यसंसर्गत्वस्वीकारात् संयोगातिरिक्तसंबंधवाचकपदोत्तर मत्वर्थीयस्यैवानुयोगित्वार्थकत्वात्संयोगपदोत्तरस्यचाश्रयत्वमात्रार्थकत्वात्कुण्डादिनिरूपितत्वविशिष्टानुयोगित्वस्यसत्वेऽपि तत्प्रतियोगिकत्वविशिष्टानुयोगिकत्वविरहात्सम्बन्धान्तरस्थलेविशिष्टानुयोगित्वभावेऽपि संयोगस्थलेतस्यास्वीकाराद्वोक्तदोषस्यनसंभव इति ।

नचैतत्कालेत्यादि । नचात्रविनिगमकाभावइतिवाच्यं स्वारसिकोक्तप्रतीतेः क्लृप्तेनतन्तुनिष्ठघटाभावेनविषयपर्य्यवसानसम्भवेऽक्लृप्तविषयकत्वस्यान्याय्यतायाएवविनिगमकत्वादितिभावः । एत

त्कालस्यतदवच्छेदकत्वेति, नच्चैवमिदानीमत्रघटोनास्तीत्यत्रोभयाधि-करणत्वावगाहित्वंभट्टाचार्य्योक्तङ्कथंसंगच्छतइतिवाच्य मत्रेत्यस्यैतत्क-पालइत्यर्थकत्वा त्तत्र भयाधिकरणत्वस्यैवाव्याप्यवृत्तित्वादिति ॥ ० ॥

प्रतियोगिकुक्षावग्रहेपीति, नन्वेतत्कालवृत्तित्वस्यतन्तुविशेषणत्वे-नायन्दोष इति चेत् मूलेवृक्षेनकपिसंयोग इत्यत्रापि वृक्षइतिसप्त-म्याअवच्छेदकत्वार्थकत्वमभ्युपेत्यवृक्षावच्छेदक मूलवृत्तिकपिसं-योगाभावविषयकत्वसम्भवादव्याप्यवृत्यभावोच्छेदप्रसङ्गः नचे-दानीमेतत्कपालेनघटइत्यत्र कालवृत्तिकपाले कपालवृत्तिकालेवा घ-टात्यन्ताभावविषयकत्वेऽव्याप्यवृत्यभावाङ्गीकार इतिवाच्यं तत्रा-प्येतत्कालावच्छिन्नैतत्कपालवृत्तित्वाभावस्यैवघटेविषयत्वात्। नच वृक्षावच्छेदकत्वस्यवृक्षसमवायित्वरूपस्यैव वाच्यतया शाखयांरूपे-नरूपत्वमित्यस्यापिप्रामाण्यापत्तिः नहितत्प्रतीतेष्कथंचिदपिप्रामाण्यं-रूपत्वस्यव्याप्यवृत्तित्वाङ्गीकारा दितिवाच्यं मूलावच्छिन्नवृक्षवृत्ति त्वाभावस्यैवतत्रापिविषयत्वाङ्गीकारात् अतएवं करूपताप्युक्तप्रती-तीनामुपपद्यते यदिचोपरिमूलेवृक्षेनतत्संयोग इति प्रतीतौ मूलाव-च्छिन्नोपरिदिगवच्छिन्नवृक्षनिरूपितवृत्तित्वाप्रसिद्ध्या तदभावस्य न विषत्वसम्भवो यस्यहिवृत्तिर्नयत्रसार्वदैशिकी नसार्वकालिकी त-न्निरूपिततद्वृत्ति तायाएवसावच्छिन्नत्वस्याभ्युपेयत्वादिति मूलावच्छे-देनोपरिदिगवच्छेदेनवृक्षेतत्संयोगाभावएवविषय इत्यव्याप्यवृत्य भावसिद्धान्तस्य नहानिरित्युच्यते तदेदानीमस्ताचले प्राच्यां नज्यो तिरित्यत्र प्राचीदिगवच्छिन्नैतत्कालावच्छिन्नस्यास्ताचलवृत्तित्वस्या स्ताचलावच्छिन्नप्राचीवृत्तित्वस्यचाप्रसिद्धिः प्राचीदिगवच्छिन्ना-स्ताचलावच्छिन्नैतत्कालवृत्तित्वस्यापिहि नसंभव स्तादृशवृत्तिमतो ऽसम्भवादिति कालएवाभावोऽभ्युपगन्तव्यः। तत्कालसम्बद्धावस्ताच-लप्राचीदिग्विशेषौच तत्कालनिष्ठाधिकरणतावच्छेदकौसम्भवत इति कालवृत्तितावच्छेदकत्वन्देशस्यनाप्रामाणिकं यैस्त्वव्याप्यवृत्तिपदा-र्थोनाङ्गीक्रियते तैस्तु विशेषरूपेणसंसर्गत्वमभ्युपेत्य वृत्तित्वविशेषी-यस्वरूपसम्बन्धावच्छिन्नवृत्तित्वाभावविषयकत्वेन सर्वप्रतीतिरुपपा-द्यत इति ॥ ० ॥

येनरूपेणेत्यादि, यत्संबन्धावच्छिन्नयद्धर्म्मावच्छिन्नाधिकरणता-वन्निष्ठतत्संबन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकतद्धर्म्मवत्त्वं तेन-

सम्बन्धेनतेनरूपेणव्याप्यवृतितत्वमित्यर्थः नित्यज्ञानानुयोगिकविषयित्वादिनाव्याप्यवृत्तित्वसम्पत्तयेच तादृशाधिकरणतावन्निष्ठाभावीयप्रतियोगितासामान्ये यत्संवन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभाववत्त्वमेवविवक्षणीयमिति ।

द्रव्यत्वस्यसमवायेनेति, घटे गुणे नद्रव्यत्वमित्यादौ गुणावच्छेदेनघटेद्रव्यत्वाभावोनविषयः किन्तुघटेद्रव्यत्वंगुणेतदभावः घटवृत्तिगुणेवाद्रव्यत्वाभावः तादृशप्रतीतिरेववाऽप्रामाणकी प्रामाणिकी च घटेद्रव्यत्वं नतुगुण इत्यादि र्नघटेद्रव्यत्वाभावसाधनायालम् ॥ इदानींयद्रव्यत्वंतद्धटे नतुगुणइत्यादयः काले स्वरसतएवाभावसाधयन्ती तिकालिकेनाव्याप्यवृत्तित्वं नतुसमवायेनेत्याशयः ॥ ० ॥

नित्यगुणत्वादिति, गुणत्वाधिकरणे जन्ये कालिकेनकपिसंयोगात्मकाभावस्यवृत्तित्वात्प्रतियोगिवैयधिकरण्योपादानं संभाव्येतेत्यतउक्तंनित्येति ॥ ० ॥ प्रयोजनविरहादिति, तद्विशेषणविरहेऽपि व्याप्तिज्ञानस्यप्रमात्वसंभवादितिशेषः ॥ ० ॥

द्रव्यत्वानतिरिक्तत्वादिति, ननूक्ताभावस्यातिरिक्तत्वेऽपि तत्प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके विरहादतिव्याप्तिसंभवेऽनतिरिक्तत्वानुधावनमफलमितिचे दत्रकेचित् पारिभाषिकावच्छेदकत्वघटितकल्पेऽ तिरिक्तत्वेतस्या तिव्याप्त्यप्रसक्ते रनतिरिक्तेति । यत्वत्रतस्यानतिरिक्तत्वेऽपि घटध्वंसाद्यात्मकाभावमादायनदोषः तद्रूपभिन्नगुणत्वादित्यादावपि विषयत्वस्यजन्यत्वे तद्ध्वंसात्मकाभावं विषत्वस्यातिरिक्तत्वेनित्यत्वेऽपिचतस्य तत्स्वरूपाभावं तद्रूपभेदतद्रूपत्वप्रकारकयत्किंचिज्ज्ञानान्यतरस्यविषयत्वस्वरूपान्यतरसंबन्धावच्छिन्नप्रतियोगिताकाभावादिकम्वादायनदोषइति तत्तुच्छम् द्रव्यवृत्यवृत्तिधर्म्मावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धेनद्रव्यत्वाभावसाध्यकस्थले वृत्यनियामकसम्बन्धस्यप्रतियोगितावच्छेदकत्वे यथाश्रुतसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वस्यैवविवक्षिततयो क्ताभावस्यानतिरिक्तत्वेऽतिव्याप्तिवारणायोगात् घटध्वंसाद्यभावाभावादीनां साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकानां केवलान्वयितयासाध्यवन्निष्ठत्वादित्याहुः । परेतु समनियताभावयोर्भेदेऽपि तदधिकरणत्वमेकमेवेति हेत्वधिकरणत्वनिष्ठविशेषणत्वसम्बन्धावच्छिन्नाधिकरणत्वानिरूपकत्वस्य द्रव्यत्वस्वरू-

पाभावसत्वान्नातिव्याप्तिः नचसमवायावच्छिन्नत्वस्वरूपसम्बन्धाव-च्छिन्नत्वाभ्यामधिकरणताभेदइतिवाच्यं व्यासज्यवृत्त्यैकावच्छेदकत्व-पक्षेसावच्छिन्नत्वनिरवच्छिन्नत्वतत्तत्सम्बन्धावच्छिन्नत्वादीनामव्या-प्यवृत्तित्वव द्त्राप्येकस्यामेवाधिकरणतायां तत्तन्निरूपितत्वावच्छेदेन-तत्सम्बन्धावच्छिन्नत्वस्यापिस्वीकारेणाव्याप्यवृत्तित्वाभ्युपगमादिति-प्राहुः॥ ऋजवस्त्वभावसाध्यकेऽतिव्याप्तिमुक्त्वा द्रव्यभिन्नत्वप्रका-रकप्रमाविशेष्यत्वरूपभावसाध्यकेपितामाह द्रव्यभिन्नत्वप्रकारकप्र-माविशेष्यत्वाभावस्यापीतिवदन्ति।

साध्यतावच्छेदकसम्बन्धेत्यादि, घटत्वाभावस्यकालिकेनयोऽभा-वइत्युपलक्षण मभावाभावसाध्यकेऽपि द्रष्टव्यम् घटत्वाभावश्चस्वरूपा-दिसम्बन्धावच्छिन्नप्रतियोगिताकः समवायादिसम्बन्धावच्छिन्नप्रति-योगिताकस्य कालिकादिनाअव्याप्यवृत्तितया तदभावसाध्यकस्थल-स्याप्यव्याप्यवृत्तिसाध्यकस्थलत्वादिति। तथापि साध्यतावच्छेदक-सम्बन्धेनेत्यादि, प्रतियोगिताविशिष्टप्रतियोगित्वानवच्छेदकत्वमनव-च्छेदकत्वान्तार्थः वैशिष्ट्यंच स्वतादात्म्य स्वविशिष्टप्रकारताशा-लिग्रहत्वव्यापकप्रतिवध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारता-वच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरणनिरूपितवृत्तितावदभावीयत्वो-भयसम्बन्धेन स्ववैशिष्ट्यञ्च स्वावच्छेदकधर्मावच्छिन्नत्व स्वाव-च्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन एवञ्चसाध्याभावस्योक्त-स्थले घटत्वाभावरूपतया तदीयघटत्वनिष्ठप्रतियोगितावच्छेदका-वच्छिन्नग्रहाविरोधितावच्छेदकसम्बन्धत्वस्य स्वरूपेसत्वेऽपिनक्षतिः स्वावच्छेदकधर्म्मावच्छिन्नत्वम्विहायस्वसामानाधिकरण्यप्रवेशे व-ह्न्यधिकरणत्वकालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावान्य-तरस्यस्वरूपेणसाध्यतायां धूमेसद्धेतौ साध्याभावप्रतियोगितास-मानाधिकरणताद्दशप्रमेयाभावत्वावच्छिन्नप्रकारताकग्रहविरोधिताघ-टककालिकमादायाव्याप्त्यापत्तेः नचप्रातिवध्यतायांताद्दशग्रहत्वव्या-पकत्वासम्भवइतिवाच्यं ताद्दशप्रतिवध्यताप्रसिद्ध्यर्थंकिञ्चिद्धर्म्माव-च्छिन्नविशेष्यतानिरूपितस्वविशिष्टप्रकारतासमानाधिकरणभेदप्रति-योगितावच्छेदकत्वन्नास्तीतिप्रतीतिसिद्धाभावरूपस्यैवव्यापकत्वस्य-प्रवेश्यत्वात् स्वावच्छेदकावाच्छिन्नत्वञ्च स्वावच्छेदकतात्वावच्छिन्न-प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताक-

पर्य्याप्तिकावच्छेदकताकत्व न्तेनविषयितासम्बन्धेनवह्निधूमोभयसाध्यकव्यभिचारिणि साध्याभावप्रतियोगिताविशिष्टप्रकारताकग्रहत्वव्यापकप्रतिबध्यत्वाप्रसिद्धावपिनातिव्याप्त्यापत्तिः नचप्रतियोगिताविशिष्टप्रकारत्वावच्छिन्नत्वमेवविवक्षणीयमिति वाच्यम्। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावसाध्यकात्मत्वहेतुके प्रमेयाभावज्ञानाधिकरणत्वोभयाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबन्धकतानिरूपितां साध्याभावप्रतियोगितावच्छेदकधर्म्मावच्छिन्नप्रकारत्वावच्छिन्नामुभयवत्ताज्ञानसाधारणप्रतिबध्यतामादायाव्याप्त्यापत्तेःस्वावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशात् कालिकेनप्रमेयाद्यभाववत्ताबुद्धिप्रतिबन्धकताघटकस्वरूपसम्बन्धमादायप्रमेयाभावसाध्यकस्थलेनाव्याप्त्यापत्तिः अथघटभिन्नंकपालत्वादित्यत्र घटभेदाभावस्यघटत्वघटोभयात्मकत्व उक्तविरोधिताघटकसमवायेनघटात्मकसाध्याभावाधिकरणेकपालेहेतोर्वृत्तित्वेनाव्याप्तिरिति चेत् घटभेदाभावस्यघटत्वमात्ररूपत्वाभ्युपगमा दाधाराधेयभावानुरोधात् उभयरूपत्वेऽपि समवायेनघटत्वावगाहिनएव तादात्म्येनचघटावगाहिनएव घटभेदाभावविषयकज्ञानस्य विरोधितया विरोधितावच्छेदकप्रकारतावैशिष्ट्यस्य वृत्तितायाम्विवक्षितत्त्वाद्वादोषस्यनसम्भवः वैशिष्ट्यञ्च स्वसमानाधिकरण्य स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनेति ननुकालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावसाध्यकपटाभावत्वेसद्धेतौ घटाभावाभावेघटाभाववानितिबुद्धिम्प्रति घटाभावाभावेकालिकेनघटाभावाभाव इति बुद्धेः प्रतिबन्धकतया तदवच्छेदकप्रकारतावच्छेदककालिकसम्बन्धावच्छिन्नाधेयतासम्बन्धेनसाध्याभावस्यहेत्वधिकरणवृत्तितयाऽव्याप्तिरिति चेन्न तादृशप्रतिबध्यताविशिष्टप्रकारताविशिष्टवृत्तित्वस्य विवक्षणीयत्वात् प्रतिबध्यतावैशिष्ट्यञ्च स्वावच्छेदकविशेष्यतावच्छेदकासमानाधिकरण्य स्वनिरूपितप्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन प्रकारतावैशिष्ट्यञ्च प्रागुक्तसम्बन्धेन नचकालिकेनाभाववान् वन्ह्यभाववान् कालिकेनाभाववान् ह्रद इत्यस्यापिप्रतिबन्धकतया तदवच्छेदकप्रकारतामादायवन्हिमान् धूमादित्यादावव्याप्तिरिति वाच्यम ज्ञानवैशिष्ट्यानवच्छिन्नत्वेनप्रतिबन्धकत्वस्य विशेषणीयत्वात् नचैवमपिवह्न्यभावस्य कालिकेनयद्व्याप्यङ्कालिकेनतद्वत्ताबुद्धेरपिप्रतिबन्धक-

तया तदवच्छेदकवह्न्यभावनिष्ठप्रकारताविशिष्टवृत्तित्वमादायाव्या-
प्तितादवस्थ्यमितिवाच्यम् भ्रमानिरूपितत्वस्य प्रकारताविशेषण-
त्वात् यदिचोक्तदोषवारणायसामानाधिकरण्यंविहाय स्वावच्छेदकध-
र्म्मावच्छिन्नत्वस्यसंसर्गत्वमुच्यते। तदाप्रतियोगिताविशिष्टप्रकारत्वा-
वच्छिन्नत्वमेववाच्य न्नतु व्यापकत्व म्प्रयोजनाभावात् नच साध्य-
तावच्छेदकसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नत्वमात्रम्वाच्यमिति वा-
च्यम्। स्वरूपेणवह्न्यधिकरणत्वसाध्यके वह्न्यधिकरणत्वाभावस्य-
कालिकेनयोऽभावः स्वरूपेणतद्वानिति बुद्धिम्प्रति कालिकेन वह्न्य-
धिकरणत्वाभाववानितिबुद्धेः प्रतिबन्धकतयाऽव्याप्तेः प्रतियोगितासा
मानाधिकरण्यप्रवेशेन तद्वारणसम्भवे ऽप्युक्तयुक्त्याप्रमेयस्य घटा-
द्यनुयोगिकस्वरूपेणसाध्यतायां सद्धेतावव्याप्तिः स्यात्। स्वावच्छे-
दकधर्म्मावच्छिन्नत्वप्रवेशेनतस्यवारणे ऽप्यभावस्यघटानुयोगिकस्व-
रूपेणसाध्यतायां सद्धेता वभावाभावस्यकालिकेनाभाववत्ताबुद्धि-
प्रकारतायां प्रतियोगितावच्छेदकधर्म्मावच्छिन्नत्वसत्त्वेनाव्याप्तिः
स्यादिति प्रतियोगितावच्छेदकधर्म्मातिरिक्तधर्म्मानवच्छिन्नत्वस्या-
पिनिवेश्यत्वात् स्वावच्छेदकसम्बन्धावच्छिन्नत्वञ्च पर्य्याप्त्यघ-
टितमेवोपादेयम् प्रयोजनविरहादिति प्रकारताविशिष्टघटक-
स्वावच्छेदकसम्बन्धावच्छिन्नत्वञ्चस्वनिरूपितसंसर्गतावच्छेदकता-
पर्य्याप्त्यधिकरणधर्म्मनिष्ठावच्छेदकताकसंसर्गताकत्वन्तेन स्वरू-
पकालिकोभयसम्बन्धेन वह्न्यभाववत्ताबुद्धेः प्रतिबन्धकत्वेन
प्रकारतानिरूपितसंसर्गतावच्छेदककालिकत्वावच्छिन्नसंसर्गताकवृ-
त्तिताया हेत्वधिकरणनिरूपिताया वह्न्यभावेस त्वेऽपि नवह्निमान्धू-
मादित्यत्राव्याप्तिः वृत्तितानिरूपितसंसर्गतावच्छेदकतापर्य्याप्तिश्च न-
निवेश्या प्रयोजनाभावादिति ॥ ० ॥

वस्तुतोऽव्याप्यवृत्तित्वमत्रेत्यादि; अत्र स्वपदंसाध्यतावच्छेदका-
वच्छिन्नपर न्तेनात्मवृत्तित्वाविशिष्टसत्तासाध्यकस्यनव्याप्यवृत्तित्व-
हानिः। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वञ्च साध्यतानिरूपितसं-
सर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपावच्छि-
न्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकसंसर्गताकत्वम्। तेनात्मत्व-
स्यसमवायस्वकालीनद्रव्यत्वोभयसम्बन्धेनसाध्यताया मात्मानुयो-
गिकसमवायेनद्रव्यत्वस्यसाध्यतायाञ्च नव्याप्यवृत्तित्वहानिः। अथा-

त्रहेत्वधिकरणवृत्तित्वं सम्बन्धसामान्येनै वाभिमतम् । कथमन्यथा सत्तावान् जातेरित्यत्र प्रतियोगिवैयधिकरण्योपादानमुक्त मेवञ्च हेत्वधिकरणसम्बन्धित्वप्रवेशे व्याप्यवृत्तिसाध्यकेऽसम्भवापत्त्या वृत्तित्वस्यैवप्रवेशनियततया विषयितयागगनवह्नेदसाध्यकव्यभिचारिणि गगनस्वरूपसाध्याभावस्यहेत्वाधिकरणवृत्तित्वविरहेणाभावान्तरमादायातिव्याप्ति र्नचसाध्यतावच्छेदकतदन्यकिञ्चिदन्यतराविशिष्टाभावमादायदोषवारणसम्भवइतिवाच्यम् उक्तभेदस्यस्वरूपतादृशभेदत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्वान्यतरसम्बन्धेनसाध्यतातांव्यभिचारिणितत्सम्भवादितिचेन्न हेत्वधिकरणनिरूपितसम्बन्धित्वे साध्याधिकरणनिरूपितत्ववृत्त्यानियामकसम्बन्धावच्छिन्नत्वोभयाभाववत्वस्यविशेषणीयत्वा दुक्तव्यभिचारिणिहेत्वधिकरणनिरूपितसाध्याभावनिष्ठसम्बन्धितायां साध्यवन्निरूपितत्वविरहेणोभयाभावसत्वान्नातिव्याप्तिः सद्धेतौचहेत्वधिकरणनिरूपितवृत्त्यनियामकसम्बन्धावच्छिन्नसम्बन्धितायामुभयस्यैवसत्वेननाव्याप्तिरिति ।

तस्यसम्बन्धविशेषानियन्त्रितत्वादिति, तस्य, सर्वथाव्याप्यवृत्तित्वस्येत्यर्थः इदञ्च तल्लाभार्थतायांहेतुः तथाचस्वाधिकरणेयस्याभावः कथञ्चिदपिनवर्त्ततेसएवयतः सर्वथाव्याप्यवृत्तित्वेनव्यवह्रियते ऽतस्सर्वथेतिपदसमभिव्याहृतव्याप्यवृत्तिपदादनुपदोक्ततादृशाप्रतियोगित्वमेवव्याप्यवृत्तित्वम्बोध्यतइतिभावः । यद्वोक्तपञ्चम्यन्तस्यतेनेत्यत्रान्वयः तथाचयतउक्तव्याप्यवृत्तित्वस्यवृत्तित्वांशेनसम्बन्धविशेषावच्छिन्नत्वमतोव्यभिचारित्वादीनांवृत्त्यनियामकत्वेनैवनात्मत्वादेर्व्याप्यवृत्तित्वहानि रन्यथातत्सम्बन्धानांवृत्तिनियामकत्वेऽव्यात्मत्वादीनांव्याप्यवृत्तित्वंस्यादेवेतिभावः । अथवानवृत्तिनियामकः, नवृत्तिनियामकोभ्युपेयः अत्रैवोक्तपञ्चम्यन्तस्यान्वयः नचोक्तसम्बन्धस्यवृत्तिनियामकत्वएवतत्प्रतिषेधोयुज्यतइतिवाच्य मिहहेतावुपाधिरित्यादिनाव्यवहारेणव्यभिचारित्वस्यवृत्तिनियामकत्वस्याभ्युपेतत्वा न्नचोक्तव्यवहारस्यकागतिरितिवाच्यं षष्ठ्यर्थेऽपिसप्तमीप्रयोगस्यशास्त्रेस्वीकरणीयत्वा दृश्यतेचैवमन्यत्रापि भ्रमतिगगनेरात्रौराजावखण्डकलश्शशीत्यादौ अतएवनवृत्तिनियामकइत्यस्यानुवादत्वे वृत्यनियामकघटितस्यैवव्यभिचारित्वस्यवृत्तिनियामकत्वप्राप्त्या जन्यत्वाभावादीनांव्याप्यवृत्तित्वमनुभवसिद्धमवलुप्यतेत्यपिनिरस्तमि-

ति क्वचिच्चतस्यसम्बन्धविशेषनियन्त्रितत्वादितिपाठः, तत्रस्वाधिकरणत्वांशइतिशेषः, पञ्चम्यन्तस्यनव्याप्यवृत्तित्वहानिरित्यत्रान्वयः तेनादिपदग्राह्यनित्यज्ञानादीनांविषयितयाधिकरणे कालिकेनात्मत्वाधिकरणे स्वाभावस्यसत्वेऽपि नव्याप्यवृत्तित्वहानिरित्यर्थइति ॥

नच विशिष्टसत्वस्येत्यादि, ननु व्यभिचारिणस्सर्वलक्षणालक्ष्यतयाकथन्नातिव्याप्तिरिति चेदत्र केचिद्व्याप्यवृत्तिसाध्यकस्थलीयलक्षणेसाध्यतावच्छेदकेऽव्याप्यवृत्तितावच्छेदकत्वस्यविशेषणतयाविशिष्टसत्तात्वेतद्विरहेणनातिव्याप्तिरित्याशय इति वदन्ति तन्नातिचारु अभ्रान्तस्यव्यभिचारिलिङ्गकानुमितिप्रसङ्गरूपवक्ष्यमाणदोषस्यासङ्गते स्साध्यतावच्छेदकस्याव्याप्यवृत्तितानवच्छेदकत्वात् व्यभिचारग्रहकाले ऽनुमितिप्रसङ्गमात्रस्यवक्ष्यमाणतात्पर्य्यविषयत्वेतूक्तोत्तरस्यापि सम्भवएवेति । वस्तुतस्तुप्रकृतसाध्यहेत्वादेरनुगतत्वेनाननुगत एव व्याप्यत्वव्यवहारप्रयोजकः तत्रव्याप्यवृत्तितत्तत्साध्यनिरुपितव्याप्यत्वव्यवहारे लाघवेनप्रतियोगिवैयधिकरण्याविशेषितस्वोद्देश्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकतत्तद्धर्म्मावच्छिन्नसामानाधिकरण्यमेव प्रयोजकमिति नजातित्वावच्छिन्नेद्रव्यत्वत्वावच्छिन्नइव विशिष्टसत्वनिरूपितोव्याप्यत्वव्यवहारः प्रयोजकस्योक्तसामानाधिकरण्यस्य तत्र सत्वा त्सतश्चप्रतियोगिवैयधिकरण्यघटितसामानाधिकरण्यस्यतदप्रयोजकत्वादित्यत्रतात्पर्य्यम् ।

जातौ विशिष्टसत्त्वव्यभिचारग्रहेति, विशिष्टसत्तात्ववृत्तिस्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणजातिमद्वृत्त्यभावप्रतियोगितावच्छेदकत्वघटकत्वग्रह इत्यर्थः इदञ्चेष्टापत्तिवारणायोक्तम् दोषताचाभ्रान्तस्य व्यभिचारिलिङ्गकानुमितित्वेनैवेति बोध्यम् ॥ अथव्याप्यत्वव्यवहारइवव्याप्यवृत्तिसाध्यकानुमितावपिप्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यैवलाघवेन कारणत्वकल्पना त्कथम्प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादनुमितिप्रसङ्गइति चेन्न व्याप्यवृत्तिसाध्यकस्थलेऽप्यव्याप्यवृत्तित्वग्रहदशायामनुमित्युपपत्तये प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानहेतुतायाव्याप्तिग्रहग्रन्थेवक्ष्यमाणतया तत्काल आपत्तिसम्भवात् नचैवन्नोपादेयञ्चेत्यादिग्रन्थासङ्गतिरिति वाच्यम् यथासल्लिङ्गकानुमितेर्भ्रान्तमात्रपुरुषीयतया अ-

सिद्धान्ततया तद्वारणायाऽव्याप्यवृत्तिसाध्यकानुमितौ प्रतियोगिवैय-धिकरण्यघटितव्याप्तिज्ञानस्यैवहेतुत्व अतथाऽव्याप्यवृत्तिसाध्यके तत्र प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यापि प्रमात्वसम्भवादित्याशयाद्व्यवहारप्रयोजकनिर्वचनपरत्वाद्वेति।

व्याप्यत्वव्यवहारप्रसङ्गरूपसार्वत्रिकातिप्रसङ्गपदार्थम्प्रकृतेसङ्गमतुमाह विशिष्टसत्त्वस्याप्युक्तेति। अतिरिक्ततामत इति, विशेष्यसम्बन्धविशेषणावगाहित्वरूपप्रमात्वस्यापारिभाषिकत्वसम्पत्त्यर्थम्विशिष्टातिरिक्तादरः। यद्वातिरिक्ताधिकरणत्वकल्पनापेक्षया विशिष्टातिरिक्ताकल्पनायायुक्तत्वात्तदादरः नचतत्राधिकरणत्वस्यक्लृप्तद्रव्यत्वाधिकरणतारूपत्वगौरवमिति वाच्यम्। निरूपकत्वस्योभयधर्म्मावच्छिन्नस्यातिरिक्तस्यतथापि प्रसङ्गात्। तत्तत्क्षणविशिष्टसत्वनिरूपितानन्ताधिकरणत्वस्याप्यतिरिक्तस्यैवकल्पनीयतयागौरवाच्चेति बोध्यम्।

विशिष्टसत्वसाध्यकइति, इदमुपलक्षणं भूतत्वमूर्त्तत्वयोर्व्याप्यवृत्तिगुणात्मकत्वे साङ्कर्येणतयोर्जातित्ववारणन्नघटते स्वाश्रयेऽसार्वदिकवृत्तेर्जातित्वस्यैवाप्रसक्तेः तस्मात्स्पर्शवदवृत्तित्वेसतिशब्दवदवृत्तिधर्म्मशून्यत्व म्विशेषगुणवद्वृत्त्यात्मावृत्तिधर्मवत्वम्वाभूतत्व मवच्छिन्नपरिमाणवेगवदाद्यवृत्तिधर्म्मशून्यत्वं वेगवद्वृत्तिगगनावृत्तिधर्म्मसमवायित्वम्वा मूर्त्तत्वमित्यवश्यमभ्युपेयमिति भूतत्वमूर्तत्वयोरपिनव्याप्यवृत्तित्वसम्भवइति॥

दीधितावुभयत्वन्नविशिष्टत्वादतिरिक्तमिति, नचनञ्द्वयोक्तिर्विफलेतिवाच्यं तथासत्युभयत्वमात्रस्य विशिष्टत्वातिरिक्तत्वालाभात् तदुक्तौचाभावान्वयस्यानुयोगितावच्छेदकावच्छेद्यत्वानियमेनतल्लाभादिति॥

वृत्तिमतीति, गगनादिहेतोरव्याप्यत्वस्यसाध्यासामानाधिकरण्याधीनत्वादिदमुक्तं।

अनवस्थाभयेनेत्यादिरिति, पटाभावभेदस्यातिरिक्तत्वे भेदभेदस्यतद्भेदस्याप्यतिरिक्तत्वमित्यनवस्थापत्तिरित्यर्थः यद्यप्येवमपि प्रतियोगित्वादिकल्पनानवस्थितिस्तदवस्था तथाप्यनन्तभेदाकल्पनालाघवम्भवत्येवेति–नचैम्पटाभावेऽपि पटाभावभेदसत्वप्रसङ्गः तदभिन्नस्यघटाभावस्यसत्वादितिवाच्यं घटाभावस्यतादात्म्येनैव प-

टाद्यभावभेदव्यवहारप्रयोजकत्वाभ्युपगमात् अभावप्रतियोगिकाभावा-
धिकरणकाभावस्याधिकरणात्मकत्वेऽपि नाभावात्यन्ताभावोऽधि-
करणात्मा अनवस्थितेरभावात् तथाहिसमानाधिकरणसम्बन्धावच्छि-
न्नप्रतियोगिताकाभावस्यस्वरूपेणाभावःप्रथमाभावः प्रथमाभावप्रतियो-
ग्यात्मा तदभावश्चप्रथमाभावः व्यधिकरणसम्बन्धावच्छिन्नप्रतियो-
गिताकाभावस्यस्वरूपेणाभावोऽसिद्धएवा भावस्यव्यधिकरणसम्ब-
न्धावच्छिन्नप्रतियोगिताकसर्वोऽप्यभावोगगनाभावएव नित्याभावस्य-
कालिकेनसर्वोभावःकालिकेनघटत्वाद्यभावात्मकएव स्वरूपेणतद-
भावश्चतत्प्रतियोगिरूप एवास्विशेषरूपेणसंसर्गताचनस्वीक्रियतइत्य-
धिकरणात्मकताचाभावभेदमात्रस्यैवेदानींग्रन्थकर्तुरभिमता अतए-
वाभावाभावस्यप्रतियोगिनिरूपतामेवावलम्ब्य सम्प्रदायइत्यस्वरसइ-
त्यादिनात्रास्वरसम्वक्ष्यति । एवञ्चघटाभावस्यकालिकसम्बन्धाव-
वच्छिन्नपटाभावात्मकतयात्यन्ताभावत्वनिरूपितपटाभावनिष्ठप्रतियो-
गितावच्छेदकावच्छिन्नसमानाधिकरणत्वादव्याप्तितादवस्थ्यमितिनि-
रस्तम् तादृशाभावस्यघटाभावानात्मकत्वा त्सम्प्रदायइत्यस्वरस
इत्यादिनावक्ष्यमाणदोषतुल्यत्वेनेष्टत्वाच्चेति ॥ परेतुकालिकसम्ब-
न्धावच्छिन्नपटाभावाभावत्वनिरूपितप्रतियोगितावारणाय स्वप्रति-
योगिमत्वग्रहविरोधिताघटकसम्बन्धावच्छिन्नहेत्वधिकरणनिरूपितवृ-
त्तितावच्छेदकत्वमत्यन्ताभावत्वरूपानुयोगितांविशेषणन्देय न्तथा-
चोक्तात्यन्ताभावत्वस्यतादृशावच्छेदकत्वविरहान्नदोषः यत्त्वत्यन्ताभाव-
त्वनिरूपितप्रतियोगितायांसाध्यवच्छेदकसम्बन्धावच्छिन्नत्वम्विशे-
षण न्नचैवमवभेदत्वनिरूपितप्रतियोगितावारणेनात्यन्ताभावत्वनिरू-
पितत्वम्व्यर्थमितिवाच्यं स्वरूपकालिकोभयसम्बन्धावच्छिन्नप्रतियो-
गिताकाभावमादायदोषवारणाय साध्यतावच्छेदकसम्बन्धातिरिक्त-
सम्बन्धानवच्छिन्नत्वरूपस्यैवतस्यवाच्यतया भेदत्वनिरूपितप्रति-
योगितायांसम्बन्धानवच्छिन्नत्वपक्षेतत्सार्थक्यसम्भवादिति तत्तुच्छं
कालिकेनघटसाध्यकतत्क्रियात्वेसद्धेतावव्याप्त्यापत्तेः तत्रात्यन्ताभा-
वत्वनिरूपितप्रतियोगितायाः कालिकसम्बन्धावच्छिन्नाया गगना-
भावनिष्ठाया स्साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वादितिवदन्ति तन्न
घटभिन्नंनित्यत्वादित्यत्राव्याप्तितादवस्थ्या देवंघटाभावस्यपूर्वक्षण-
विशिष्टपटाभावाभावस्यचैकतया घटाभावनिरूपिताया हेत्वधिकर-

णनिरूपितवृत्तिताविच्छेदकताहशाभावत्वनिरूपितायाः प्रतियोगिता-
या अवच्छेदकीभूतधर्म्मावच्छिन्नाधिकरणत्वस्यैवहेत्वाधिकरणेसत्वे-
नाव्याप्तितादवस्थ्यात् नचापरक्षणावच्छिन्नमात्रवृत्तेरुक्ताभावस्यघ-
टाभावनिष्ठस्यकथंघटाभावात्मकतेतिवाच्यं घटभेदस्यस्वरूपपटत्वा-
वच्छिन्नप्रतियोगित्वान्यतरसम्बन्धेनसाध्यतायांसद्धेतौपटाभावत्वेऽ-
व्याप्तेः पटाभावान्याभावस्यैवप्रतियोगिव्यधिकरणतयातस्यचपूर्वक्ष-
णावच्छिन्नपटाभावत्वाभावेनस्वानिष्ठेनाभिन्नतयाताहशाभावत्वस्य-
चहेत्वधिकरणनिरूपितवृत्तिताविच्छेदकत्वेनतन्निरूपितप्रतियोगित्वमा-
दायाव्याप्तेरुद्धारासम्भवादिति ॥

अग्रेविवक्षणीयस्येति, ननुवह्निमान्धूमादित्यत्राप्यव्याप्तिस्सम्भ-
वत्येव घटाभावस्यस्वनिष्ठेनवह्नितदभावाऽननुयोगिकस्वरूपेणपटा-
भाववह्निन्नभेदेनघटाभावत्ववाह्निन्नभेदेनचैकतयातत्प्रतियोगिताव-
च्छेदकावच्छिन्नस्यवह्नेस्संयोगेनाधिकरणत्वस्यपर्वतेसत्वादितिचेन्ना-
भावमात्रप्रतियोगिकाभावस्याधिकरणत्वरूपत्वाभ्युपगमात् । वि-
शेषरूपेणससंर्गत्वाभ्युपगमाच्च । यद्वाविषयितयारूपत्ववदभावमा-
दायाव्याप्तिवारणाय ॥ साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नप्र-
तियोगितावच्छेदकनिष्ठावच्छेदकताकनिरूपकताकाधिकरणतावदन्य-
त्वस्यैववाच्यतयानोक्तदोषसम्भवः नचवह्नित्वप्रतियोगिकसमवाय-
स्यसाध्यतावच्छेदकताघटकसम्बन्धत्वेऽव्याप्तिवारणाय पारिभाषि-
कस्यैवसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यवाच्यत्वा दु-
क्तदोषतादवस्थ्यमितिवाच्यं साध्यतावच्छेदकताघटकसम्बन्धाव-
च्छावच्छेदकताकनिरूपकताकाधिकरणत्वीयस्वरूपसम्बन्धावच्छिन्न-
प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाभावस्यैवाविवक्षितत्वात्पा-
रिभाषिकतद्विवक्षायाम्प्रयोजनाभावा च्चैवमपिवह्नित्वाधिकर-
णत्वविशिष्टस्यसाध्यतायान्तथाप्यव्याप्तिरितिवाच्यं प्रतियोगितायां-
साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेस्वप्रतियोगितावच्छेदकसम्ब-
न्धेनप्रतियोगिवैयधिकरण्यस्यसाध्यावच्छेदकसम्बन्धेनप्रतियोगिवैय
धिकरण्यपर्यवसायितया ग्रेविवक्षणीयेत्यादरत्रैवतात्पर्य्येण संयोगेन-
साध्यतास्थलेप्रतियोगितायांभेदत्वनिरूपितायांसाध्यतावच्छेदकस-
म्बन्धावच्छिन्नत्वविरहेणदोषासम्भवादित्यन्येप्रलपन्ति तन्नसाधु
साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यभावरूपत्वे भेदत्वनिरूपित-

प्रतियोगित्वमादायदोषासम्भवेना त्यन्ताभावत्वनिरूपितत्वस्यवैयर्थ्यापत्तेः अभावरूपत्वेच वह्नित्वाधिकरणत्वविशिष्टसाध्यकेपिदोषतादवस्थ्यात् अव्याप्यवृत्त्यधिकरणतायाअव्याप्यवृत्तित्वे तादृशाधिकरणत्वाभावस्यविवक्षितुमशक्यत्वा च्छेदस्यवह्नित्वप्रतियोगिकसमवायेनवह्नित्वविशिष्टसाध्यकस्थलेऽप्रसिद्धत्वात् अवच्छेदकतायांसाध्यतावच्छेदकनिष्ठत्वस्यनिरूपकत्वेसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यविशेषणत्वे घटभिन्नंकपालत्वादित्यादावपिघटभेदमादायलक्षणसम्भवाच्चेति ॥ ० ॥

अभावसाध्यकाव्याप्तितादवस्थ्यमिति, यद्यपिपूर्वक्षणविशिष्टघटाभावाभावसाध्यकधूमे घटाभावस्यप्रतियोगिव्यधिकरणस्यसाध्याभावात्मकत्वेनसाध्यतावच्छेदकेतत्प्रतियोगितावच्छेदकत्वनिबन्धनाप्यव्याप्तिःप्रदर्शयितुमुचिता तथापिप्रतियोगिव्यधिकरणाभावप्रसिद्धावेवोक्तरीत्याऽव्याप्तिस्सम्भवति तत्प्रसिद्धिश्चनकथञ्चिदप्येतत्कल्पइतितदुपेक्षाकृता ॥

नचदैशिकेत्यादि, अथदैशिकविशेषणतयागोध्वंसविरोधिनोःसमवायसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभवयो स्साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वविरहा त्तादृशप्रतियोगिताकस्यकालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्यलक्षणघटकस्यप्राचांमतेकालिकसम्बन्धावच्छिन्नध्वंसाद्यभावात्मकत्वेन स्वप्रतियोगितावच्छेदककालिकेनस्वप्रातयोगितावच्छेदकावच्छिन्नध्वंसविरोधित्वसम्भवात्साध्यतावच्छेदकसम्बन्धेनप्रतियोगिवैयधिकरण्यघटितकल्पेसमवायसम्बन्धावच्छिन्नगवाभावस्यप्रतियोगिवैयधिकरण्यस्यैवासत्वेनतस्यकालावृत्तित्वसम्पत्तयेस्वरूपेणगोध्वंससत्वोपपादानस्यव्यर्थत्वाच्चेदमसङ्गतमितिचे न्मैवं सामान्यतोहिस्वसत्तायानस्वप्रतियोगितावच्छेदकसम्बन्धेनस्वप्रतियोगितावच्छेदकावच्छिन्नविरोधित्वं तथासतिगगनाभावस्यकेवलान्वयित्वानुपपत्तेः कालिकसम्बन्धावच्छिन्नस्वाभावस्यापिस्वप्रातयोगितावच्छेदकावच्छिन्नत्वादिति तत्तदभावत्वेनस्वसत्तायां तत्तदभावत्वनिरूपितप्रतियोगितावच्छेदकसम्बन्धेनतन्निरूपितप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्यैवविरोधित्वम्वाच्य न्तथाचगवात्यन्ताभावत्वेनसत्तायांकालिकेनगोध्वंसवत्वस्यनविरोधित्वमुक्तविरोधितावच्छेदकरूपानाक्रान्तत्वा-

त् तत्तत्प्रतियोगिकाभावत्वेन स्वसत्तायां तत्तत्प्रतियोगिकध्वंस-
स्यातिरिक्तविरोधित्वञ्चनकालिकेनकपालेपिसमवायेनगवात्यन्ताभा-
वासत्वप्रसङ्गा दितिस्वरूपेणैवतस्यवाच्यतया दैशिकविशेष-
णतयाकालेतत्सत्वएवगवात्यन्ताभावस्यासत्वमुपपद्यतइतिनासंगतिः
नचोक्तविरोधितायांस्वरूपसम्बन्धावच्छिन्नगवात्यन्ताभावस्यगोध्वं-
सविरोधित्ववारणाय प्रतियोगितायांसम्बन्धविशेषावच्छिन्नत्वस्य-
प्रवेशनीयतया समवायादिसम्बन्धावच्छिन्नगवात्यन्ताभावेस्व-
रूपेणतस्याविरोधित्वेपि कालिकसम्बन्धावच्छिन्नाभावेकालिकेनवि-
रोधित्वे नक्षतिरितिवाच्यं लाघवानुरोधेनकेवलान्वयिभिन्नत्वस्यैवत-
त्प्रवेश्यत्वात् भट्टाचार्य्यैणकालिकेनध्वंसविरोधित्वप्रतिपादनञ्च तत्त-
त्प्रतियोगिकत्वविशिष्टाभावत्वेनस्वसत्ताया स्तत्तत्प्रतियोगिनेवप्रति-
योगितावच्छेदकसम्बन्धेनतत्तत्प्रतियोगिकध्वंसप्रागभावाभ्यामपिप्र-
तियोगिभ्यामनुभवानुरोधेनविरोधित्वमाहत्येतिबोध्यम् ॥ नचयुज्यते-
चायमेवपक्षो ऽन्यथास्वरूपेणध्वंसासत्वनिबन्धनपूर्वपक्षस्यस्वरूपेण-
तत्सत्वप्रतिपादनेनैवसमाहिततया समवायादिसम्बन्धावच्छिन्नप्र-
तियोगिताकस्य तेनसम्बन्धेनकालावृत्तिजन्याभावस्यापिकाला-
वृत्तित्वप्रसंगादितिवाच्य मिदानीन्तदाशङ्कनस्यकालिकसम्बन्धाव-
च्छिन्नगवात्यन्ताभावस्यकालावृत्तित्वप्रसङ्गेनोत्तरग्रन्थप्रतिपाद्येनस-
मानत्वात् किञ्चिदग्रेस्वरूपेणध्वंससत्वङ्कालेप्रतिपादितवतोभट्टाचा-
र्य्यस्यग्रन्थेप्युक्तपर्यनुयोगस्यसमानत्वाच्च नचैतदस्वरसेनैवाथवेत्या-
दिना प्रतियोगिवैयधिकरण्यघटितकल्पाभिप्रायकत्वंसंसर्गाभावमा-
त्रोक्तावपीत्यादिग्रन्थस्यवक्ष्यतीतिवाच्य मथवेत्यादावेवनिर्भरत्वव-
र्णने ऽथयदेत्यादिदीधितिशङ्काग्रन्थस्यदैशिकविशेषणतयावृत्तित्वघ-
टितलक्षणाभिप्रायकतायावर्णिततया शङ्कोत्तरग्रन्थस्यभिन्नालम्बन-
त्वापत्त्यान्यूनतापत्तेः अथाथवेत्यादिग्रन्थस्यसम्यक्पर्य्यालोचनेऽथ-
यदेत्यादिपूर्वपक्षाशयस्यसंसर्गाभावमात्रोक्तावपीतिमध्यमपक्षाशय-
स्यच तत्रैवप्रकाशमानतया तस्यसंसर्गाभावमात्रोक्तावपीतिमध्यम-
पक्षव्याख्योक्तस्वरूपसम्बन्धेनध्वंसवृत्तित्वकल्पापेक्षया नकल्पान्तरत्व-
मपित्वथयदेत्यादिग्रन्थसमुदितव्याख्यापेक्षयैवेतिनन्यूनतावसरः अ-
तएवाथयदेत्याद्याशङ्कायाःप्रतियोगिवैयधिकरण्याघटितकल्पाभिप्राय-
कउत्तरग्रन्थे तच्छून्येचेत्यादिप्रतियोगिवैयधिकरण्यसद्भावप्रतिपा-

दनग्रन्थासङ्गतिरपिनेतिचे दस्त्वेतग्रन्थस्यातिरमणीयत्व न्तथापिजगदीशग्रन्थस्यायुक्तताचनप्राप्ता भवतिचसैवपरिहरणीयेति परिहृतेदानींतदाशङ्कनेत्यादिनाअतएवेत्यादिनानुपदोक्तासङ्गतिश्चपरिहरिष्यतइत्यलम्॥ ० ॥

विरोधाभावादिति, ध्वंसस्य विशेषणतयाप्रतियोगिसमवायिनियतत्वा त्कालस्यातथात्वादिति भावः।

भूतलादिदेशस्येवेति, भूतलेघटोनष्ट इत्यादि प्रतीतेः कालिकविशेषणत्वावगाहित्वस्य जलेघटोनष्टइत्यादिप्रतीत्यापत्तेर्वक्तुमशक्यत्वा द्विशेषणत्वस्यदैशिकस्य तद्विषयतायावाच्यतया प्रतियोग्यसमवायिनिभूतलेयथाध्वंसस्यदैशिषविशेषणत्वं संसर्गस्तथेत्यर्थः॥

कालस्यापीति, नचेदानींघटइत्यत्रे वेदानींघटोनष्ट इत्यत्रापिकालिकविशेषणतैवास्तुसंसर्गो दैशिकसम्बन्धस्वीकारेमानाभाव इति वाच्य माश्रयनाशाधीनद्रव्यगुणादिनाशस्यप्रत्यक्षतोपपत्तये कालेदैशिकविशेषणत्वस्यावश्यंस्वीकरणीयत्वा दिन्द्रियसम्बद्धकालविशेषणतामात्रस्य तत्र सन्निकर्षत्वसम्भवान्नहितत्रकालिकविशेषणत्वस्य सन्निकर्षत्वसम्भव स्तथासतिकालपरिमाणाद्यभावस्यापि कालेप्रत्यक्षापत्तेः अथकालानुयोगिकविशेषणताकालिकीत्युच्यते केयन्तदतिरिक्ता कालानुयोगिक्यपिदैशिकाविशेषणतेत्युच्यतइतिचेदुच्यते विशेषणताहित्रयी इदानींघटइति प्रतीतौभासमानोपाध्यवच्छिन्नकालानुयोगिकीकालिकी प्राच्यांघट इत्यादिप्रतीतौभासमानोपाधिविशेषावच्छिन्नादिगनुयोगिकीदिक्कृता स्वासाधारणधर्म्मावच्छिन्नानुयोगिकीदैशिकी कालिकदैशिकविशेषणतयोश्चकालानुयोगिकयोरपिभेदःप्रतीयतएव यदिदानींसमवायसम्बन्धावच्छिन्नकालपरिमाणाभावइतिजायते कालेतादृशाभाव इति तुनजायत इति—

शब्दानित्यतायामिति, नचप्रतियोगियोग्यत्वस्यतन्त्रत्वे वायुस्पर्शध्वंसोपि प्रत्यक्षः स्यादितिवाच्य माश्रयनाशजन्यस्यतस्यग्राहकेन्द्रियसन्निकर्षाभावादिति शब्दानित्यताचिन्तामणेरालोके ग्राहकेत्युपलक्षण ङ्कालेगृह्यतएवेतीष्टापत्तिरपिद्रष्टव्या नचसमयेऽपि किञ्चिद्देशावच्छेदेनग्राह्यः अत्रेवासमवायिनोपितद्देशत्वसम्भवादितिग्रन्थेन पक्षधरमिश्रैरुक्त इतिद्रष्टव्यम्॥

तथापिप्रतियोगिवैयाधिकरण्याघटितस्येति, इदञ्चनप्रतियोगिवै-

यधिकरण्यघटितेतिव्याप्त्यभावाभिप्रायकं किन्तुप्रलयस्यगोध्वंस-
वत्वेनगवान्यन्ताभावानधिकरणत्वादितिदीधितिग्रन्थसङ्गमनार्थं त-
स्यप्रतियोगिवैयधिकरण्यघटितातिव्याप्त्यभिप्रायकत्वे ध्वंसरूपप्रति-
योगिसत्वमात्रमुच्यते, तद्धेतुकगवात्यन्ताभावानधिकरणत्वप्रतिपाद-
नमफलंस्यात्तत्र एवञ्च प्रतियोगिवैयधिकरण्यघटितेप्यतिव्याप्तिस-
म्भवेतदुपेक्षानिरर्थकेतिनिरस्तम् नच प्रतियोगिवैयधिकरण्यघटिते-
तिव्याप्तेः सम्भवएवनेति वाच्यं गवात्यन्ताभावप्रतियोगिध्वंसाधिकर-
णत्वस्यैवहेत्वधिकरणेसत्वात् इत्थमेवातिव्याप्तिरथवेत्यादिनाग्रन्थेनभ-
ट्टाचार्येण प्रतिप्रपादिता नचस्वप्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य-
हेत्वधिकरणवृत्तित्वघटिते प्रतियोगिवैयधिकरण्यघटितेपि गवात्यन्ता-
भावस्यप्रलयावृत्तित्वप्रयुक्तएवातिव्याप्तिसम्भवः तस्यस्वप्रतियोग्यन-
धिकरणात्मादिवृत्तित्वात् अवश्यञ्चात्रहेत्वधिकरणवृत्तित्वंसम्बन्धविशे-
षेण वाच्यम् अन्यथागुणवृत्तेरपिकपिसंयोगाभावस्यकालिकेनवृक्षवृत्ति-
त्वसम्भवादिति प्रतियोगिवैयधिकरण्यघटितलक्षणातिव्याप्तिपरताप-
रित्यागोनोचितइति वाच्यम् स्वयंप्रतियोग्यनाधिकरणहेत्वाधिकरण-
वृत्तित्वस्यैवनिष्कर्षितत्वेनतत्रवृत्तित्वेसम्बन्धविशेषावच्छिन्नत्वनि-
वेशस्यनिष्प्रयोजनतयाऽतिव्याप्तिसम्पत्त्यर्थंगवात्यन्ताभावानधिकरण-
त्वप्रतिपादनमफलंस्यादिति तत्परतापरित्यागस्यैवोचितत्वात् य-
थापाततस्तदुक्तार्थावलम्बनेनापितद्ग्रन्थव्याख्याभवत्युचिता तदा-
प्रतियोगिवैयधिकरण्याघटितस्येत्याद्युक्तिरुपलक्षणविधयेतिबोध्यम् ॥
नच शङ्काग्रन्थस्य प्रतियोगिवैयधिकरण्यघटितकल्पाभिप्रायकत्वेत-
च्छून्येत्याद्युत्तरग्रन्थासङ्गतिरिति वाच्यम् प्राचीनमतखण्डनेनव्या-
प्यवृत्तिसाध्यकस्थलीयलक्षणातिव्याप्तिवारणेपि प्रतियोग्यसामा-
नाधिकरण्यघटितकल्पेकथंतद्वारणमित्याशङ्कायान्तद्ग्रन्थावतार-
णस्यवक्ष्यमाणत्वात् । वस्तुतस्तुकालेतच्छून्येसतिप्रतियोग्यनधिक-
रणकालवृत्तित्वादित्यर्थे हेतुसमानाधिकरणत्वमात्रपर्यवसायि-
त्वात् तथाहि कालस्यगोशून्यत्वेभवतिप्रतियोग्यनाधिकरणत्वम् ध्वं-
सादीनामप्रतियोगित्वात् यतः प्रतियोग्यनधिकरणत्वमतो भावोहे-
त्वाधिकरणकालवृत्तिरित्येवव्याख्येयम् ॥ अन्यथा प्रतियोगिवैयधि-
करण्यघटितकल्पातिव्याप्तिवारकत्वाभिप्रायकत्वेपि कालस्यतदन-
धिकरणत्वादित्यस्यैववक्तुमुचितत्वा त्प्रतियोग्यसामानाधिकरण्य-

घटितकल्पाभिप्रायकत्वे प्रतियोग्यसमानाधिकरणत्वादित्येवब्रूयादि-
ति। केचित्तु स्वप्रतियोग्यधिकरणावृत्तित्वरूपप्रतियोग्यसामाना-
धिकरण्यघटिते घटाद्यभावस्यतादृशावृत्तित्वसम्पत्यर्थम् वृत्तित्व-
स्यसम्बन्धाविशेषेणवाच्यतया गवात्यन्ताभावस्यनासंग्रहइति तत्क-
ल्पोपेक्षाभवत्युचितेतिप्रलपन्ति तन्न संयोगसाध्यकातिव्याप्त्यातद-
र्थस्यपरित्यक्तत्वेनतद्विषयत्वमुक्तग्रन्थस्याङ्गीकृत्यसमाधानस्यानुचि-
तत्वात्। अन्येतु प्रतियोगितावच्छेदकसम्बन्धेनप्रतियोग्यनधिकर-
णत्वकल्पेनातिव्याप्तिः अत्यन्ताभावनिरूपितध्वंसनिष्ठप्रतियोगिता-
यांस्वरूपसम्बन्धावच्छिन्नत्वस्यैवानुमितिग्रन्थेप्रतिपादिततया ध्वंस-
निष्ठप्रतियोगितायाम् साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविरहादि-
तिवदन्ति तदप्यसत् प्रतियोगिवैयधिकरण्यघटितेकस्मिंश्चिदपिक-
ल्पेऽतिव्याप्तिसम्भवेप्रतियोगिवैयधिकरण्यघटितकल्पातिव्याप्त्युपे-
क्षाकथंकृतेत्येवंपूर्वपक्षस्यासमाहितत्वात् किमुसाध्यतावच्छेद-
कसम्बन्धेनप्रतियोग्यनधिकरणत्वघटितेसिद्धान्तकल्पे। यत्त्वभा-
वाघटितस्यैवप्रतियोगिवैयधिकरण्यघटितस्यसर्वथासिद्धान्ततया
तत्रनातिव्याप्तिसम्भव इति तदुपेक्षायुज्यत इति तदपिनमनोरमं
यद्यपीत्यादिग्रन्थालोचनेकृतेऽभावघटितकल्पस्यैवेदानीमङ्गीकारवि-
षयत्वप्रतिभासात्। वस्तुतस्त्वभावघटितकल्पस्य स्वनिरूपितयादृ-
शप्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्त्यभावीय-
तादृशप्रतियोगितानवच्छेदकत्वघटितस्यैवनिष्कृष्टतयातत्रनातिव्याप्तिः
गवात्यन्ताभावस्य लक्षणघटकत्वादित्यत्रैवयद्यपीत्यादेस्तात्पर्य्या-
न्नकोपिदोष इति।

सृष्टिकालवृत्तित्वविशिष्टगोत्वात्यन्ताभावेऽति, नचतत्प्रतियोगि-
तायान्निरवच्छिन्नावच्छेदकताकत्वविरहइतिवाच्य मेतन्मतेसद्धेता-
वपि तादृशाभावस्यैवलक्षणघटकतया तत्प्रतियोगितायान्तत्संपत्य-
र्थं साध्यतावच्छेदकनिष्ठसावच्छिन्नावच्छेदकत्वानिरूपितत्वार्थक
त्वस्य तस्य वाच्यत्वादिति॥ ० ॥

गोत्वावच्छिन्नत्वस्वीकारेपीति, यद्यपिध्वंसस्य तद्व्यक्तिप्रति-
योगिकत्वस्यैवानुभविकतया प्रतियोगितातिप्रसक्तस्यगोत्वस्य न प्र-
तियोगितावच्छेदकत्वसम्भवः नचगौर्नास्तीतिप्रतीतिरिव गौर्नष्ट इत्य-
पिप्रतीतिर्दृश्यत इति तत्र सामान्यावच्छिन्नप्रतियोगिताकात्यन्ताभाव

विषयकत्वमिव सामान्यावच्छिन्नप्रतियोगिताकध्वंसविषयकत्वमत्रा- पिस्यादिति वाच्यम् भवेदेतदेवं यदिहिप्रतियोगित्यंशे भासमानधर्मस्य प्रतियोगितावच्छेदकत्वानियमोऽकारणकृतस्स्या न्नास्त्येव तादृशः स अत्यन्ताभावस्यच तत्वम्बाधबुद्धिविरोधित्वानुरोधेनाभ्युपेयते गौ- रस्तीतिबुद्धिकालेप्यत्रगौर्नष्ट इति बुद्ध्युत्पत्तेर्ध्वंसस्यच तत्वन्नाभ्यु- पेय न्तथाप्येकजातीयेषुचरमव्यक्तिध्वंस समये तज्जातीयसामान्य- ध्वंसप्रतीतेरानुभविकत्वे तस्य तज्जातीयव्यक्तिमात्रबुद्धावेव विरो- धितया तदनुरोधेनैव सामान्यावच्छिन्नप्रतियोगिताकत्वंध्वंसेभ्यु- पेय न्तत्प्रतियोगिताया अतीतानिखिलंव्यक्तिसाधारणतया नागत- स्य तज्जातीयस्याविद्यमानतया च सामान्यन्नतदतिप्रसक्तमित्या- शयः। अपिनोक्तसामान्यध्वंसप्रतीतेः प्रामाणिकत्वे विवादाभि- व्यक्तिः कृतेति ॥ ० ॥

सम्बन्धानवच्छिन्नस्यैवेति, तादृशसम्बन्धानवच्छिन्नत्वञ्चपारि- भाषिकमेवबोध्य न्तेननतादात्म्येनघटाभावसाध्यकसद्धेतौ हेतुसमा- नाधिकरणसंसर्गाभावीयतादृशसम्बन्धानवच्छिन्नप्रतियोगित्वाप्रति- सिद्धिः। नच विषयत्वध्वंसमादायलक्षणसङ्गतिरितिवाच्यम् ता- दृशसाध्यकव्यभिचारिण्यतिव्याप्तेरिति ॥

साधारण्यादिति, इदञ्चभेदभिन्नाभावत्वस्य संसर्गाभावत्वात्मक- त्वमभ्युपेत्य संसर्गारोपजन्यप्रतीतिविषयाभावत्वपक्षे ध्वंसीय प्रति- योगितायांसम्बन्धावच्छिन्नत्वस्यस्वीकृतयातत्प्रयोगितायामुक्तसम्ब- न्धानवच्छिन्नत्वस्यासंभवादिति ॥

मानाभाव इति, नच प्रलयएव मानाभावइति वाच्यम् समयस- मवायिभिन्नवृत्तिध्वंसप्रतियोग्यवृतिकार्य्यद्रव्यत्वं कार्य्यद्रव्यप्रागभाव- समानकालीनारम्भकातिरिक्तकार्यद्रव्यानधिकरणवृत्ति ध्वंसप्रति- योगिवृत्तिकार्य्यमात्रवृत्तिधर्म्मत्वा च्छब्दत्वव दित्यनुमानस्यैवमान- त्वादिति।

मानत्वादिति, इदमुपलक्षणम्—सर्गान्तरीयद्व्यणुकोत्पत्त्यनुरोधे- नापिप्रलयेस्पन्दःस्वीकरणीय इति ॥

तृतीयक्षणइति—महापवनजलवर्षानलादिभि रदृष्टसहकृतैः स्थू- लेषु विनष्टेषु त्रसरेणुनाशार्थं परमाणुक्रियाजायते ततोविभाग स्त- दनन्तरं पूर्वसंयोगनाश स्ततउत्तरदेशेन क्षणैकस्थायिनात्रसरेणुना-

संयोगो द्व्यणुकनाशश्च ततः क्रियानाश स्त्रसरेणुनाशश्च ततउत्तर संयोगनाश स्सएवक्षणोनिखिलजन्यानाधारत्वान्महाप्रलयइत्युच्यते तत्क्षणमादायपूर्वैतृतीयक्षण इत्यर्थः ।

कार्यद्रव्येणसहैवेति, एवकारेण गगनादिभिस्संयोगोव्यवच्छिद्यते ननुमूर्त्तसंयोगानुगुणाक्रियातएवविभुसंयोगाभ्युपेयोविभुमात्रसंयोगानुगुणक्रियायाःप्रयोजनविरहेणानभ्युपेयत्वा त्तथाचात्राप्युत्तरदेशसंयोगानुगुणक्रियया विभुसंयोगस्यादेवे त्येवकारार्थासंगतिरित्यतआह ननित्यत्वामिति, तथाच भावकार्य्यत्वस्यानित्यत्वव्याप्ततयातदानींगगनादिसंयोगस्वीकारेनाशकाभावेननित्यत्वापत्त्याव्यापकविरहेणभावकार्य्यत्वप्रतिक्षेपेतत्स्वरूपप्रतिक्षेपः प्रयोगश्च महाप्रलयपूर्वतृतीयक्षणोत्पन्नसंयोगो ननित्यैकवृत्तिः नाशातिरिक्तनाशकपूर्वत्वानधिकरणत्वेसतिभावकार्य्यत्वा द्यन्नैवन्तन्नैवं यथासृष्टिकालीनगगनपरमाणुसंयोगः शब्दध्वंसेव्यभिचारवारणायविशेष्यदलं तस्यकालेपिद्रव्यातिरिक्तेविशेषणत्वस्वीकारेतर्क्कस्फुरणायैवतदिति बोध्यम् विपक्षवाधकश्चात्र भावकार्यस्यानित्यत्वव्याघातः नचकारणसत्वेनियमक्षतिर्नकार्य्यवारणायालमिति गगनसंयोगःस्यादेव एवमुक्तनियमोप्यप्रयोजकएव भावकार्यस्याविनाशित्वेक्षत्यभावात् तस्मान्नाशकपूर्ववर्त्तितैवाविनाशित्वेप्रयोजिका नतुभावकार्य्यत्व मन्यथा कार्य्यत्वमात्रस्यविनाशित्वप्रयोजकत्वमभ्युपेत्यनाशस्यापिविनाशित्वं स्या देवञ्चाविनाशिनोपिगगनसंयोगस्यस्वीकारेनकापिहानिरिति वाच्यम् प्रलयप्रयोजकादृष्टस्यैवगगनसंयोगप्रतिबन्धकत्वाभ्युपगमेन तदभावात्मककारणविरहा द्भावकार्य्यानधिकरणस्यैवप्रलयत्वेनोक्तसंयोगोत्पत्तौप्रलयत्वव्याहतेः नचोपभोगयोग्यभावकार्य्यानधिकरणत्वमेवप्रलयत्वम्प्रलयेभावकार्य्यसत्वनिर्णयएवोपभोगयोग्यभावकार्य्यत्वत्वेनपक्षतायांगौरवस्यप्रलयसाधकानुमानसह्यत्वा दन्यथा द्व्यणुकस्यापिकस्यचित्सत्वेक्षत्यभावेनतत्सत्वस्याप्यापत्तेः एवम्भावकार्येषु सर्वेषूपलब्धंबिनाशित्वम्भावकार्य्यत्वव्यापकतयैवगृहीत न्नचतन्नित्यभावकार्यसम्भावनामात्रेणहातुमुचितमेतदनुरोधेन तदभावस्यैवव्यवस्थापनीयत्वात् नचभावत्वमकिञ्चित्करं ध्वंसध्वंसेप्रलयेसर्वभावोन्मज्जनप्रसङ्गा दनन्तध्वंसस्वीकारप्रसङ्गेनगौरवप्रसङ्गाच्च नचप्रलयेविभागावस्थानसम्भवः तस्योत्तरदेशसंयोगेनैवप्रायोविनाश्यत्वा दन्यथा-

प्रहारादिपूर्वोत्पन्नविभागावनुत्पन्नविभागौचघटावालोचयताञ्जायमान- विभक्तप्रतीतिस्समानाकारत्वेनानुभूयमानैकत्रविभागविषयिणीपरत्र- संयोगाभावविषयिणीतिस्या त्सतिविभागेकुत्रापिनतद्विषयिणीतिव- क्तुमशक्यत्वा न्नचेष्टापत्ति रनुभूयमानसमानाकारत्वभङ्गापत्तेः नच- संयोगाभावेनैवविभक्तप्रतीतेर्गतार्थता भावत्वेनानुभूयमानत्वा द्विनि- गमनाविरहेणसंयोगप्रतीतेरेवविभागाभावविषयत्वप्रसंगाच्च किञ्चो- त्तरसंयोगस्यानाशकत्वे गिभक्तयोर्ययोर्नसंयोगोनित्ययोस्तयोर्विभाग- स्याविनाशित्वप्रसङ्गः नचभावकार्य्यस्याविनाशित्वमिष्यतइत्यलम- प्रस्तुतविचारवाहुल्येनेति ॥ ० ॥

स्वमतेद्व्यणुकस्याभावादिति, तस्यमेरुसर्षपयोःसाम्यप्रसंगवारणा- यावयवधाराविश्रामस्यवाच्यत्वेलाघवात्त्रुटावेवविश्रामोवाच्यस्तद- पकृष्टमहत्त्वस्यचनित्यत्वाङ्गीकारा दपकृष्टमहत्त्वंप्रत्यनेकद्रव्यत्वस्य- प्रयोजकतया सप्रयोजकत्वेनाभिमत न्त्रसरेणु स्सावयव श्चाक्षुषद्रव्य- त्वादित्यादिद्व्यणुकादिसाधकमनुमान मप्रयोजकमेवा णुत्वव्यवहार- श्चापकृष्टपरिमाणैरेवोपपादनीयइति नद्व्यणुकादिस्वीकारेप्रयोजनमि- त्याशयः ॥ ० ॥

बलवत्तरप्रमाणाभावादिति, ब्राह्मंचवर्षशतमित्यस्येदानीमागमत्वा- नुपलब्धे रागमत्वेनप्रसिद्धेरैतिह्यतया तत्रप्रामाण्यासम्प्रतिपत्तेः अ- विधित्वेनान्यार्थतात्पर्यकत्वसंदेहाच्च सर्गान्तरीयद्व्यणुकोत्पत्त्यर्थम् क्रियाभ्युपगमोऽपिप्रलयाव्यवहितोत्तरक्षणएवहिद्व्यणुकोत्पत्तेः प्रामा- णिकत्वएवतस्यचसविवादत्वादितिभावः ॥

तच्चिन्त्यमिति, परंप्रत्युद्भावितस्यदोषस्यपरमतेनासम्भवित्व- एवादोषत्वमत्युचितं स्वमतेनतस्यादोषत्वन्तु नदोषतयाऽनुद्भावन- प्रयोजकमिति महाप्रलयस्यपराभ्युपगततया महाप्रलयान्तर्भावेणा- तिव्याप्तिवारणमेव स्थलान्तरानुसरणवर्जिमातिसुन्दरं नतुस्वमतेद्व्यणु- कासम्भवेनस्थलासम्भवः प्राचीनैस्तु त्रसरेणुनित्यतायास्सन्दिग्धत- याव्यभिचारसंशयस्यचाप्रतिबन्धकतया चाक्षुषद्रव्यत्वेऽनित्यत्व- सावयवत्वादिव्याप्यत्वेनिश्चिते त्रसरेणुपरिमाणस्यनित्यत्वासम्भवात् द्व्यणुकादिसाधकमनुमान न्नाप्रयोजकं नचमहदारम्भकारम्भकत्वात्प- रमाणुत्वेनाभिमतस्याप्यस्तुसावयवत्व मनवस्थाभयेनकुत्रापिविश्रा- मस्यवाच्यत्वे परमाणावेवतत्रैवास्तुविश्राम इतिवाच्यं महदारम्भ-

कस्यानवयवत्वे यथामहतोघटस्यमहत्वानुपपत्तिः कपालस्यानेकत्वाभावेनघटस्यानेकद्रव्यत्वाभावा न्नतथा महदारम्भकारम्भकस्यानवयवत्वे महत्वानुपपत्तिरिति तस्याप्रयोजकत्वा त्कपालिकादीनामपि महदारम्भकत्वादेव सावयवत्वमिति नपरमाण्ववयवप्रसङ्गइत्येवन्द्व्यणुकस्याभ्युपेतत्वादितिचिन्तावीजम् ॥ ० ॥

इतिमतइति, प्रलयोप्यदृष्टाधिकरणजन्यस्यनित्यसुखसाक्षात्कारस्यसत्वादितिशेषः सुखमात्रस्यपरमपुरुषार्थत्वभ्रममूलकमेवचतन्मतम्बोध्यं दुःखाभावस्यपुरुषार्थताव्यवस्थाप्यविस्तरेणतन्मतखण्डनस्यभट्टवार्तिकएवोपलब्धत्वादिति।

कार्य्यमात्रम्प्रत्यदृष्टस्येति, अयमाशयः नहिप्रयोजननिमित्ताभ्याम्विनाकस्यचित्कार्य्यस्योत्पत्तिरिति सामान्यतोनियमे प्रयोजनस्य चेतनसम्बद्धस्या नियमवारणाय तत्तच्चेतनादृष्टनियम्यतायाः स्वीकरणीयतया महाप्रलयस्यापि मोक्षविरोध्यात्मविशेषगुणादिभावविरोधितया सप्रयोजनस्य तत्वज्ञानद्वारामोक्षप्रयोजकादृष्टैरेवोत्पादनीयत्वा ददृष्टजन्यत्वम् अतएव महाप्रलयस्य सुखदुःखाद्यजनकतया कथमदृष्टजन्यत्वा न्नचाज्ञातोत्पत्तिविनाशवता मंकुरादीना मप्यप्रयोजनत्वे प्यदृष्टजन्यत्ववदितिवाच्य म्परमकारुणिकानां योगिनामुत्पन्नयोगजधर्म्माणा मेवान्ततःसांसारिकजन्तुसुखजननयोग्यतथाविधानाम्विनाशेदुःखस्य दुःखजननयोग्यतथाविधानाम्विनाशे सुखस्य सम्भवात् तत्तदङ्कुरच्छेदादिना क्रिम्याद्युत्पादकतयावा संसारे कथञ्चित्सर्वेषामेव प्रयोजनवत्वादित्यपिनिरस्त म्भविष्यन्महाप्रलयसाक्षात्कारेण योगिनामेववासुखाद्युत्पत्तिसम्भवेन कथञ्चित्सप्रयोजनत्वाच्चेति। केचित्तु लाघवेनकार्य्यत्वावच्छिन्नंप्रत्यदृष्टस्यकारणत्वे व्यभिचारवारणायैवप्रलयेप्यदृष्टोत्तरत्वस्यकल्प्यत्वादिति वदन्ति।

तदानीमसम्भवादिति, नित्यत्वप्रसङ्गादितिशेषः अविदितेप्रमाणाभावादिति क्वचित्पाठः तस्याऽयम्भावः प्रलयप्रयोजकादृष्टादिविनाश्य न्तदानींदुःखमास्ता मितियदिब्रूया त्तदपिनसम्भव त्यविदिते ऽसाक्षात्कृते मानाभावादिति इदमुपलक्षणं शरीराद्यनवच्छिन्नतस्योत्पत्तेरप्यसम्भवोवोध्यः।

बाधनिश्चयादीति, गोमत्ताबुद्धौ गौर्नास्तीतिबुद्धे र्नगोप्रतियोगिकाभावावगाहित्वेनविरोधित्व न्तस्यतद्गवात्यन्ताभावधीसाधार-

णत्वा श्चापिगोत्वसमनियतप्रतियोगिताकाभावावगाहित्वेन यावद्गौर्नास्तीतिबुद्धेर्विरोधित्वापातादिति गोत्वावच्छिन्नप्रतियोगिताकाभावावगाहित्वेनैवतद्वाच्यतया त्यन्ताभावप्रतियोगितायांसामान्यधर्मावच्छिन्नत्वसिद्धिरितिभावः । ननुभ्रमसाधारण्यानुरोधेन प्रतियोगित्वसम्बन्धावच्छिन्नगोत्वेतरधर्मानवच्छिन्नप्रकारतानिरूपिता भावत्वावच्छिन्नविशेष्यत्वाभिन्नप्रकारताकनिश्चयत्वेनैव विरोधित्वम्वाच्यमिति नप्रतिबध्यप्रतिबन्धकभावानुरोधेनतत्सिद्धिरतआहादीति तथाच प्रतिबध्यप्रतिबन्धकभावस्यविषयविरोधाधीनतया गोप्रतियोगिकाभावादीनान्नतत्वमिति गोमात्रावच्छिन्नप्रतियोगिताकाभावस्यैवतद्वाच्यतया सामान्यधर्म्मावच्छिन्नत्वसिद्धिः नचकेवलगोत्वावच्छिन्नस्यविलक्षणमेवप्रतियोगित्वंसंसर्ग स्तेनचतत्सत्वन्नतद्गवाद्यभाव इति प्रतियोगित्वमात्रएवधर्म्मावच्छिन्नत्वेमानाभावः भवतापिगोत्वमात्रावच्छिन्नत्वस्यविलक्षणस्यैवस्वीकरणीयत्वा दन्यथातस्याभावघटितत्वेनानवस्थापातादितिवाच्यं यावल्लक्षयितुंशक्यन्तावद्वैलक्षण्याभ्युपगमस्यानुचितत्वा त्प्रतियोगित्वञ्च तत्तद्धर्मावच्छिन्नत्वेनलक्षयितुंशक्यत इतितस्यागस्यानुचितत्वेना वच्छिन्नत्वाभ्युपगमात् तन्मात्रावच्छिन्नत्वमपि तदतिरिक्तानवच्छिन्नत्वत्वेनलक्षयितुंशच्यमिति तदपिलक्षणीयमेव अनवस्थितिश्च तत्वाद्यनुगतधर्मघटितत्वेन सामान्यतोज्ञानेनदोषाया स्तुवातद्विलक्षणमेव कानोहानि रित्येवानिर्बचनीयताबाद्यातिरिक्तानामवमच्छिन्नत्ववादिनांनिष्कर्षइति—

एकसम्बन्धेनेत्यादि,अथतद्गौर्नास्तीतिबुद्धिस्साक्षात्सम्बन्धेनगोमत्ताबुद्धिमात्रस्यैवविरोधिनी गवावयवेगोमति चत्वरादौच तदनुपत्तेः कालिकेनगोमत्ताबुद्धिश्च इदत्वाद्यवच्छिन्नविशेष्यिका इदानीङ्गौरस्तीत्येवतत्प्रतीतेः भवतिचतद्विरोधिनी सम्बन्धविशेषानवगाहिनी दानीङ्गौर्नास्तीतिप्रतियोगितायांसम्बन्धावच्छिन्नत्वेमानाभावः नचगोसमवायिनीसंयोगेनगौर्नास्तीतिबुद्ध्युपपत्तेः सम्बन्धावच्छिन्नत्वमावश्यकम्प्रतियोगितायामितिवाच्यम् गोसंयोगाभावस्यक्लृप्तस्यैवतत्रविषयत्वात् ॥ संयोगविशिष्टगोप्रतियोगित्वेनोल्लेखेपि शिखीविनष्ट इति वह्निशेषणस्यप्रतियोगित्वसम्भवात् नचात्रतत्रववाधकस्यविरहणकथम्भासमानत्यागइति वाच्यम् लाघवस्यैवप्रयोजकस्यबाधस्यैवसत्वात् उक्तप्रतीतिबलात्सम्बन्धविशेषेण

वगोमत्वविरोध्यभावस्यैवसाक्षात्सम्बन्धेन गोमत्वमात्रविरोध्यभाव-स्यापिगौर्न्नास्तीतिप्रतीतिसिद्धस्यसत्वम्वाभ्युपेयम् एवमपिताद्दशा-त्यन्ताभावध्वंसबुद्धिसाधारणैकप्रतिबन्धकत्वानुरोधेनध्वंसप्रतियो-गितायां धर्म्मावच्छिन्नत्वमावश्यकमितिचेद्धन्ता नुभाविकमपीदम्म-तंन्यायसिद्धान्तपक्षपातादपोद्यते तथाहि संयोगेनगौर्नास्तीतिबुद्धिः प्रतियोगितयागामुल्लिखन्तीगोप्रतियोगिकत्वांशेबाधमनासादयन्ती-नलाघवमात्रेणगोसंयोगंप्रतियोगित्वेनस्वीकर्त्तुंक्षमतेऽनुभवापलाप-कस्यलाघवस्याकिञ्चित्करत्वा त्सन्देहएवलाघवस्यवस्तुव्यवस्थाप-कत्वा द्गोप्रातियोगिकत्वेनसंयोगानुपस्थितावपिसंयोगेन गौर्नास्तीतिबु-द्ध्युत्पादाच्च एवञ्चसाक्षात्संबन्धेनगोमत्त्वमात्रेगौर्नास्तीति बुद्धिर्नजाय-तएवेतिकेनतुभ्यमभ्यधायि संयोगादिसम्बन्धावच्छिन्नप्रतियोगि-ताकाभावातिरिक्तस्यतद्विषयस्यानभ्युपगमा त्संयोगसम्बन्धावाच्छि-न्नप्रतियोगिताकाभावावगाहिनीसाप्रत्यक्षबुद्धि स्समवायेनगोमति-समवायावच्छिन्नप्रतियोगिताकाभावावगाहिनीचसंयोगादिनागोमति-जायतएव योग्यानुपलब्धिरूपसामग्रीवशान्नजायते इतोविपरीता नचैवंसंयोगादिनागोमत्युपलब्धगवात्यन्ताभावः परत्रस्ववोधसंक्रा-न्तयेऽत्रगौर्न्नास्तीति कथन्नाभिलपतीतिगौर्न्नास्तीतिप्रत्ययवेद्य स्तेनन-गृहीतइति कल्प्यत इति वाच्यम् समवायेनगौर्न्नास्तीत्याद्यभिलाप-स्य स्पष्टप्रत्यायनेच्छानिबन्धनत्वेनार्थापत्तेरपक्षीणव्यापारत्वा त्सं-म्बन्धानवच्छिन्नप्रतियोगिताकाभावविषयकत्वेनप्रत्यक्षस्यानुव्यवसी-यमानतायास्सन्दिग्धत्वेन नततस्ताद्दशाभावसिद्धि स्ताद्दशा-नुभवस्याविवादत्वेताद्दशाभावनिराकरणममरगुरूणामप्यशक्यमित्य-लम् ॥

सम्बन्धविशेषमन्तर्भाव्यैवेति, ननु संयोगसमवायादिसंबन्धेन-गोमत्ताबुद्धावुभयसम्बन्धेन गवात्यन्ताभाववत्ताबुद्धेरविरोधित्वेन तद्वारणाय संयोगत्वाद्यतिरिक्तधर्म्मावच्छिन्नसंसर्गत्वानिरूपितत्व-स्यैवविरोधित्वघटकतायावाच्यतया ध्वंसवत्ताबुद्धिसाधारण्यन्दु-र्वारमितिचेन्न ध्वंसीयप्रतियोगितायामपिसम्बन्धावच्छिन्नत्वस्वीका-रात् । यद्वाभेदप्रतियोगित्वस्य सम्बन्धानवच्छिन्नत्वेतद्ग्रहस्यप्रतिब-न्धकत्ववारणायतद्धर्मातिरिक्तधर्म्मानवच्छिन्नसंसर्गतानिरूपितत्वस्यै-ववाच्यतयानध्वंसबुद्धिसंग्रहइति यदिचतद्गौर्नास्तीत्यादिबुद्धिरत्य-

न्ताभावत्वरूपानुयोगित्वावगाहिनी तदात्यन्ताभावध्वंसादिबुध्योर्नै-करूपेणप्रतिबन्धकत्वसम्भव इति चिन्त्यम् ॥

विभावनीयमिति, इदानीं गौर्नास्तीति बुद्धेस्सर्वानुमताया अप-लापएवचिन्ताबीजम् नचतत्रकालिकेनाभाववत्वंविषयः तद्गोर्विद्यमा-नतादशायामपीदानीन्तद्गौर्नास्तीतिप्रत्ययापत्तेः नचसमवायादिस-म्बन्धावच्छिन्नप्रतियोगिताकाभावोविषयः प्रतियोग्यभावान्वयस्यतु-ल्ययोगक्षेमत्वेनेदानींगौरित्यत्रकालिकेनगोमत्वस्यप्रतीतत्वेननञात-त्संबन्धावच्छिन्नाभावबोधस्यैवानुभविकत्वादिति ।

नन्विदानीमश्वइत्यादि, । अत्रकालवृत्तितावच्छेदकत्वंदेशेभ्युपे-त्येदानींकालेऽश्वेचस्वरूपतएवगोत्वाभावस्याभ्युपगम्यतयाश्वइवका-लेपिस्वरूपतएवतत्सत्वमङ्गीकृत्यकालाश्वोभयवृत्तित्वङ्गोत्वाभावेविष-यआस्तामितिचे देवन्देशवृत्तितायांकालस्याप्यवच्छेदकत्वन्नस्यादि-दानींगेहेगौर्नास्तीत्यत्राप्युक्तयुक्त्यावृत्तित्वद्वयस्यैवविषयत्वसम्भवा न्नचेष्टापत्ति रनुभवविरोधा दन्यथागोस्तद्गेहेविद्यमानत्वदशाया-मिदानींगेहेगौर्नास्तीतिप्रतीतिरपिस्यात् ॥ गेहेकालान्तरावच्छे-देनतत्कालेचदेशान्तरावच्छेदेनगवात्यन्ताभावस्याभ्युपगततयावृत्ति-त्वद्वयावगाहित्वेऽबाधितत्वात् तस्या अपीष्टत्वेभवतिभवतांमतिर्ज्ञा-नातुतथैवभवान्किमनुरोधेनचरणपातेनापिवयन्देशकालादीनामवच्छे-दकत्वमङ्गीकारयामइत्याखण्डलार्थः ॥

प्रतियोग्यारोपस्तज्जन्येति, । आरोपस्यजनकताचोपलभ्येतेत्येव-मापत्तिद्वाराबोध्येति ॥

पूर्वोत्तरकालावेवेति, अयमिदानींयदिस्वाश्रयोत्तरकालकत्वसं-सर्गेणघटवान्स्यात् घटवत्वेनोपलभ्येत इतिध्वंसप्रत्यक्षे अयमिदा-नींस्वाश्रयपूर्वकालकत्वसम्बन्धेनघटवान्स्यात्तत्वेनोपलभ्येत इति प्रागभावप्रत्यक्षेकारण मित्युत्तरकालपूर्वकालयोः सम्बन्धघटकत्वात् सम्बन्धत्वमित्याशयः ॥

चक्रकादिप्रसङ्गइति, स्वग्रहसापेक्षग्रहसापेक्षग्रहसापेक्षग्रहविष-यत्वेनस्वभिन्नत्वप्रसङ्गइत्यर्थः स्वमत्यन्ताभावत्वं तद्ग्रहसापेक्षोनिय-मग्रह स्तत्सापेक्षस्संसर्गाभावत्वग्रह स्तत्सापेक्षत्वस्यात्यन्ताभावत्व-ग्रहेसत्वा दापादकसत्वं चक्रकप्रसङ्गव्याप्यावात्माश्रयान्योन्याश्रयप्र-सङ्गावितिनतौदर्शिताविति बोध्यम् ॥

कथञ्चिदिति, उक्तारोपम्बिनाजायमानप्रत्यक्षस्थलेपिताद्दशारोपंप्रकल्प्येत्यर्थः ॥

स्वीकारेपीति, अपिनात्यन्ताभावप्रत्यक्षेप्रतियोग्युपस्थितिसहकृतयोग्यानुपलम्भस्य प्रागभावप्रत्यक्षेप्रतियोगिजनकसामग्र्युपलम्भसहकृतस्यध्वंसप्रत्यक्षेनाशकोपलम्भसहकृतस्य कारणत्वादेवसर्वत्रानिर्व्वाहान्नप्रतियोग्यारोपस्य कारणत्वमितिसूचितम् नचनाशकोपलम्भसहकारोव्यर्थः असमवायिकारणमात्रनाशाधीनकार्यनाशस्थलेऽनुपलब्धासमवायिकारणनाशस्यध्वंसप्रत्यक्षापत्तेः नच कपालखण्डाद्युपलब्धिस्थलेध्वंसबुद्ध्यनुपपत्तिरानुमानिकत्वात्कपालध्वंसमनुमायघटध्वंसस्यप्रत्यक्षसम्भवादिति ।

निरुक्तसंसर्गाभावत्वविरहेति, संसर्गारोपजन्यप्रतीतिविषयवृत्त्यभावविभाजकोपाधिमत्वस्यसंसर्गाभावत्वरूपत्वेनातिव्याप्तिरिति चिन्तनीयम्० ॥

सदातनत्वविशिष्टमिति, नचघटाभावाभावस्यघटरूपतयाऽनित्यनत्वेसदातनत्वविरहादत्यन्ताभावत्वानुपपत्तिरितिवाच्य मतिरिक्तत्वाभ्युपगमाद्घटकालविशिष्टस्यैवसंसर्गत्वाभ्युपगमेन घटाभावदशायान्तत्सत्वासम्भवात् । यद्वाभावत्वस्य भावभेदरूपतयाघटस्वरूपेतत्रतद्विरहेणात्यन्तभावत्वविरहोपिनदोषइति ॥

अनुयोगिताविशेषोवेति, इदन्तुबोध्यं भेदत्वस्यानुयोगिताविशेषत्वेऽत्यन्ताभावत्वस्यापितद्रूपत्वमेवेति ॥

सास्ना दावव्याप्तीति, साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यपारिभाषिकत्वेनदोषसम्भवइति तु विभावनीयम् ० ॥

इदमप्यभावेत्यादि, नतु धर्म्मिभेदधर्म्मात्यन्ताभावयोरैक्येऽव्याप्तिविरहेऽप्यभावाधिकरणकाभावस्याधिकरणस्वरूपत्वेगोभेदस्यापिहेतुसमानाधिकरणात्यन्ताभावरूपतयातत्राव्याप्तिरस्त्येव नचाभावाधिकरणकोप्यभावोभावप्रतियोगिकएवाधिकरणस्वरूपइतिवाच्यम् तादात्म्येनाभावसाध्यकेतथाप्यव्याप्तिरितिचेन्न हेत्वधिकरणनिरूपितवृत्तितावच्छेदकानुयोगितानिरूपितसंसर्गाभावीयप्रतियोगित्वविवक्षायान्दोषाभावात् नचात्यन्ताभावीयत्वप्रवेशेप्रयोजनविरहोत्राप्यस्त्येवेतिवाच्य मिष्टत्वात् ० ॥

यथायादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्त-

त्प्रतियोगितानवच्छेदकत्वघटितलक्षणेसंसर्गाभावीयत्वप्रवेशप्रयोजन-विरहएवनतथाव्याप्यवृत्तिसाध्यकस्थलीयलक्षणेपि तत्राव्याप्तेरपि सम्भवादित्यत्र तात्पर्य्यादिति ॥

सहजत एव प्रतियोगिव्यधिकरणत्वादिति, इदानीं प्रतियोगिस-म्बन्धित्वप्रवेशो प्रयोजन विरहेण प्रतियोग्यधिकरणत्वाभावस्यहेत्व-धिकरणेसत्वसम्भवादिति भावः ।

अव्यावर्त्तकत्वादिति, सावयवत्वस्य तत्प्रयोजकत्वा दन्यथा विभूनामपिव्यावर्त्तकत्वापतेः ॥

नन्वस्त्ववच्छिन्नपरिमाणवत्वमेव व्यावर्तकत्वेप्रयोजकमित्यत्र-सिद्धान्तभंग रूपदण्डमाहकालोपाधीति, नचदिगुपाधितायामव-च्छिन्नपरिमाणवत्वम् कालोपाधितायाञ्चजन्यत्वंप्रयोजकमिति नदो-ष इति वाच्यम् परमाणूनांव्यावर्त्तकत्वस्यानुभावकत्वेहिप्रयोजकभे-दकल्पनायुज्यते नचासन्दिग्धन्तदस्तीत्युभयत्रापिसावयवत्वस्यैव प्रयोजकत्वौचित्यादिति ।

प्राचाम्मत इति, प्राच्याम्घट इति बुद्धिर्न्नदिङ्मात्रमधिकरण-तयाविषयीकरोति प्रतीच्यां घट इति प्रत्ययापत्ते र्नाप्युपाधिमात्रम् । वृक्षो घट इति प्रत्ययापत्तेः किन्तूपाधिविशेषविशिष्टान्दिशा-न्तत्रोपाधेरवच्छेदकत्वमेवनत्वधिकरणत्व मित्येके । विशिष्ट बुद्धे-र्विशेषणविशेष्योभयसम्बन्धावगाहित्ववद्विशिष्टानुयोगिकबुद्धेर्विशे-षण विशेष्योभयानुयोगिकसम्बन्धावगाहितया दिशीवदिगुपाधाव-प्यधिकरणत्व ञ्चघटेरूपमित्यादिविशिष्टबुद्धिःकथमितिवाच्यं त-स्योलपक्षितानुयोगिकत्वस्यैवस्वीकारादित्यर इति विवादप्रदर्श-नायमतइत्युक्तम् ।

एवमवच्छेदकतासम्बन्धेनेति, ममान्तष्करणेकोपो ममचेतसिरा-गइत्यादिप्रामाणिकव्यवहारदर्शनादूद्वेषेच्छाद्यात्मविशेषगुणावच्छेद-कत्वस्यमनोनिष्ठस्यवृत्तिनियामकत्वमभ्युपेत्य। यत्तुचेष्टात्वावच्छिन्नंप्र-तिकृतेरवच्छेकतासम्बन्धेनकारणत्वमितितदनुरोधेनवृत्तिनियामकत्वं तस्येति तदपिकारणत्वघटकप्रतियोगितायांकारणतावच्छेदकसम्ब-न्धावच्छिन्नत्वस्यप्रवेशपक्षेवृत्त्यनियामकस्यप्रतियोगितानवच्छेदकत-याकारणत्वासम्भवा दत्रतादात्म्यादीनामपिवृत्तिनियामकत्वप्रसङ्गा-च्चातीवादरोविधेयः ।

दिक्कालयोरीश्वरानतिरिक्तत्वादिति, तयोरीश्वरानतिरिक्तत्वेऽपिसूर्य्यपरिस्पन्दावच्छिन्नेतत्रेदानींघटइत्यादिबुद्धिविषयत्वमुदयादिसन्निधानाद्यवच्छिन्नेप्राच्यांघटइत्यादिबुद्धिविषयत्वंघटादीनान्तुनोपाधित्वं तेनोपधेयोपाधेरेकत्वेनेदानींघटःप्राच्यांघटइत्यनयोरेकत्रप्रसङ्गः। घटादीनामुपाधित्वस्यानुभविकत्वउक्तप्रसङ्गवारणायतयोर्भेदोनकेनाप्यपलपितुंशक्यइतिमन्तव्यम् । मतमिदन्दीधितिकृतोनात्यादरणीयन्न्यायविद्भि रुक्तयुक्त्यातत्तदन्तःकरणशरीराद्युपाधिभेदकल्पनयासर्वदोषपरीहारेणैकचेतनवादरूपौपनिषदमतप्रवेशापत्तेरिति ॥ ० ॥

स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नमिति, अत्र स्वप्रतियोगिताविशिष्टनिरूपकताकाधिकरणत्व वन्निरूपितवृत्तित्वन्नास्तीति प्रातीतिकोऽभावोलक्षणघटकः वैशिष्ट्यं च स्वावच्छेदकधर्म्मावच्छिन्नत्व स्वनिरूपितसंसर्गतावच्छेदकधर्म्मावच्छिन्नसंसर्गताकत्वोभयसम्बन्धेनेति—प्रतियोगितावच्छेदकावच्छिन्नत्वञ्च—प्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणधर्म्मपर्य्याप्तावच्छेदकताकत्व न्तत्रन्न्यूनवारकपर्य्याप्तिनिवेशफल म्विशिष्टसत्तावाञ्जातेरित्यत्रग्रन्थेकृतैवोक्तमितरवारकपर्य्याप्तिनिवेशफलन्तु वह्निमान्महानसीयवह्निमद्विषयकज्ञानत्वादित्यत्रातिव्याप्तिवारणम्—नचास्यसद्धेतुत्वमेवेतिवाच्यं शुद्धवह्नित्वावच्छिन्नस्य शुद्धवह्नित्वावच्छिन्ननिरूपितविषयित्वस्य संसर्गतया महानसीयवह्निज्ञानेतस्यसत्वेनतेनसम्बन्धेन साध्यतायांसद्धेतुत्वेऽपि प्रकारितासम्बन्धेनसाध्यतायांव्यभिचारित्वात्। नचतज्ज्ञानस्यवह्निप्रकारकतयातत्सम्बन्धेनतत्रकुतोनवह्निसत्वमितिवाच्यं शुद्धवह्नित्वावच्छिन्नस्य शुद्धवह्नित्वावच्छिन्ननिरूपितप्रकारित्वस्यैव संसर्गत्वा त्तादृशीचप्रकारिता नतज्ज्ञाने महानसीयत्वस्याधिकस्यनिरूपकतावच्छेदकत्वात् उभयधर्म्मावच्छिन्ननिरूपितप्रकारित्वञ्च नप्रत्येकधर्मावच्छिन्नस्य संसर्गः । विशिष्टसत्तात्वावच्छिन्ननिरूपितसमवायस्य तत्रतत्रप्रतिपादितसत्तात्वावच्छिन्नासंसर्गत्ववत् । तस्यापिचप्रकारित्वस्यसंसर्गत्वे महानसीयवह्निमदितिज्ञानानन्तरं वह्निमत्वेनजानामीत्यनुव्यवसायापत्तेः महानसीयवह्निमानित्यनुमित्यनन्तरंवह्निमनुमिनोमीत्यनुव्यवसायापत्तेश्च नचतदिष्यते तथासतिवह्नित्वमात्रावच्छिन्नविधेयताकानुमितौप्रमाणाभावप्रसङ्गात् । वह्निंजानामीत्यनुव्यवसायश्चन प्रकारितासम्बन्धेनज्ञानांशेवह्न्यवगाही व-

ह्निविशेष्यकज्ञानानन्तरमपितदुत्पादा त्किन्तु विषयित्वमात्रेणे-ति एवं प्रतियोगितासम्बन्धेनवह्निसाध्यकमहानसीयवह्न्यभाव-त्वहेतुकातिव्याप्तिवारणमपि महानसीयवह्निसाध्यकवह्निमहानसीय-विषयकज्ञानत्वहेतुकातिव्याप्तिश्च वह्नित्वमहानसीयत्वगतद्वित्वमहा-नसीयत्ववह्नित्वगतद्वित्वयोर्भेदेसहजतएववारणीया तदभावएक-त्वादेःपर्य्याप्त्यनभ्युपगमेच समवायेननमहानसीयत्वविशिष्टत्वेस-तिकालिकेनवह्नित्वविशिष्टसाध्यकेधूमेव्याभिचारिणि समवायावच्छि-न्नवह्नित्वनिष्ठावच्छेदकतानिरूपितकालिकावच्छिन्नमहानसीयत्वनिष्ठा-वच्छेदकतानिरूपितनिरूपकतामादायातिव्याप्तेर्व्वारणायच प्रतियो-गिताविशिष्टनिरूपकत्वमेवादरणीयं वैशिष्ट्यञ्च स्वनिरूपितावच्छे-दकताविशिष्टान्यावच्छेदकत्वानिरूपितत्व स्ववृत्तित्वोभयसम्बन्धेन वृत्तिताच स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपित-त्वसम्बन्धेन वैशिष्ट्यञ्चोभयत्र प्रसिद्धचतुष्टयेषुयावदादेयन्तैश्चबो-ध्यम् एवञ्चप्रतियोगितावच्छेदकनिरूपकतावच्छेदकयो र्विशिष्टा-वच्छेदकत्वपक्षेऽभिन्नतया स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन-प्रतियोगितावच्छेदकतावैशिष्ट्यस्यनिरूपकतावच्छेकताया वि-रहा द्विशेषसम्बन्धस्यावच्छेदकत्वपक्षे स्वावच्छेदकसम्बन्धाव-च्छिन्नत्वविरहेणतद्वैशिष्ट्याविरहान्नमहानसीयवह्निसाध्यकव्यभिचा-रिण्यतिव्याप्तिः । अथविशिष्टस्यानवच्छेदकत्वे सम्बन्धविशे-षस्यानवच्छेदकत्वे च कागतिरितिचेन्न रक्तदण्डवानितिप्रती-तौस्थलभेदेनयथाविलक्षणावच्छेदकताद्वयस्वीकार स्तथामहान-सीयवह्निमानितिज्ञानम्बह्निमहानसीयवदितिप्रतीतेर्वारणायमहानसी-यवह्निमदिति प्रतीत्युपपत्तयेच महानसीयविशेषणतापन्ने वह्निविशे-षणतापन्नेच वह्नित्वइवाच्छेदकत्वद्वयस्यविलक्षणस्यस्वीकरणीयतया-स्ववृत्यच्छेदकतात्वव्याप्यधर्म्मवत्वस्यापिवैशिष्ट्यघटकत्वाङ्गीकारे-णातिव्याप्तिवारणस्यकर्तुं शक्यत्वादितिमादृशामपरःपन्थाः ॥ ० ॥

भेदकूटविशिष्टहेत्वधिकरणेति, हेत्वाधिकरणनिरूपितवृत्तितावच्छे-दककूटत्वप्रतियोगिकपर्य्याप्तीयानुयोगितानिरूपितपरम्परावच्छेक-त्ववत्वनप्रतियोगित्वस्यात्र लक्षणघटकत्वम्बोध्यम् ।

तादात्म्यसम्बन्धेनापीति, अत्रतादात्म्यसम्बन्धेनकस्यचिदपि-नप्रागुक्तव्याप्यवृत्तित्वमितियोजना व्याप्यवृत्तित्वस्यसाध्यतावच्छेद-

कसम्बन्धेनाधिकरणत्वघटितत्वा भ्युपगमेनसङ्गमनीया तत्रतादात्म्ये- नात्मसाध्यस्थले प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानस्यापि- प्रमात्मकतया तस्यव्याप्यवृत्तिसाध्यकत्वस्यसमुचिततया तन्निर्व्वा- हाय सम्बन्धित्वनिवेशस्यावश्यकत्वे सङ्गतिर्बोध्या तादात्म्यसम्ब न्धेनापि कस्यचिज्जन्यस्य नप्रागुक्तव्याप्यवृत्तित्वमितियोजनातुरम- णीयैवेति ॥

यथाश्रुतमेवसम्यागिति, उक्तव्याप्यवृत्तित्वस्यपारिभाषिकस्यै वालक्ष्यतानियामकत्वेन तादात्म्यसम्बन्धसाध्यकस्थलस्यापिलक्ष्यत- या वास्तविकव्याप्यवृत्तित्वस्यैवेदानीन्तादात्म्येनकपिसंयोगादिमतः स्वीकरणीयतया भेदकूटनिवेशेप्रयोजनाभाव इतिभावः ॥

योहेतुस्तदधिकरणेति, अत्रहेत्वधिकरणत्वएवतादृशवृत्तित्वाभा- वस्यविशेषणत्वेतात्पर्य्यं न्तेन विषयितयावह्निर्हेतुत्वेवह्निज्ञानत्वस्य- साध्यत्वेवह्निज्ञानेवह्नौवह्निज्ञानत्वसामानाधिकरण्यंनतूक्तसामानाधिकर- ण्याभावविशिष्टवह्निज्ञानइतिवह्निज्ञानत्वसामानाधिकरण्याभावविशिष्ट वह्न्यधिकरणेतादृशवह्निज्ञाने साध्याभावस्यसत्वेपिनाव्याप्तिःनापि- वह्नित्वावच्छिन्ननिरूपितविषयितयावह्निर्हेतुत्वे तेनसम्बन्धेनविशिष्ट- वह्नित्वाधिकरणत्वाप्रसिद्धावप्यव्याप्तिः नचसामानाधिकरण्याभावउप- लक्षणं कपिसंयोगसाध्यकवृक्षवृत्तित्वाविशिष्टसत्वेसद्धेतौगुणावच्छेदे- नप्रतियोगिसामानाधिकरण्याभाववत्सत्तानातिरिक्तविशिष्टसत्ताधिक- रणवृक्षवृत्तित्वात्कपिसंयोगाभावस्येत्यव्याप्तेरिति ॥

मूलस्वरसेनेति, यद्यपितादृशमूलस्यसंयोगाभावहेतुकव्यभिचा- रिण्यतिव्याप्तिवारणपरतासंभवति तथापिप्रसिद्धसत्वहेतुकव्य- भिचार्य्यतिव्याप्तिवारणपरतापरित्यागस्यानुचितत्वेनाभावविशेषण- त्वलाभइति ॥ ० ॥ ० ॥

अवच्छेदकत्वाभावेति, अत्रैवम्मूलेवृक्षेनकपिसंयोगइत्यत्रापिवृक्ष- वृत्तेः कपिसंयोगनिष्ठाया अवच्छेदकत्वाभावस्यैवाविषयत्वसंभवेन प्रतियोगिवैयधिकरण्यस्यैवव्यर्थत्वंस्या दत्रावच्छेदकत्वाभावस्य तत्र- कपिसंयोगाभावस्यैवाविषयत्वमानुभविकमितिनास्माकञ्चित्त मास्क- न्दतीतिचिन्त्यम् ।

हेत्वधिकरणइति, सप्तम्यावच्छेदकत्वार्थकत्वमाहृत्याह प्रतियो- गिवैयधिकरण्यावच्छेदकेति, हेत्वधिकरणइतिसप्तम्यानिरूपितत्वा-

र्थकत्वे प्रतियोग्यनधिकरणनिरूपितं यद्धेत्वधिकरणनिरूपितवृत्तित्वं तद्वदभावे हेत्वधिकरणवृत्तित्व मप्रतियोगिव्याधिकरणहेतुस माना-धिकरणत्वान्तस्य यथाश्रुतमेवार्थ स्तत्र व्याप्यवृत्तेरवच्छेदकत्वा-भावेऽपि नदोषइत्यरुचेराह गुरुतरंचेति, तस्यकेवलान्वयितयेति, घटादीनांकालोपाधित्वेकालवदेवाभावसत्वं तस्यानुपाधित्वे नित्यव-देवतन्नतादृशाभावइति भावः।

दीधितौप्रतियोगितावच्छेदकावच्छिन्नस्य यस्यकस्यचिदित्या-दि, प्रतियोगितावच्छेदकसमानाधिकरणनिरूपकत्वनिष्ठावच्छेदं-कताभिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिता-धिकरणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिता-कभेदवत्वं निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगित्वनिष्ठावच्छेच्दक-कताभिन्ना वच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदकताभिन्ना वच्छेदकत्वानिरूपितधर्म्मनिष्ठाधेयत्वसम्बन्धावच्छिन्नावच्छेदकता-भिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदकत्वभिन्नावच्छेदक त्वानिरूपितनिरूपकत्वनिष्ठावच्छेदताभिन्नावच्छेदकत्वानिरूपिताधि-करणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभे-दवत्वं प्रतियोगितावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिं-न्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदक-ताभिन्नावच्छेदकत्वानिरूपितनिरूपकत्वनिष्ठावच्छेदकताभिन्नावच्छेद कत्वानिरूपिताधिकरणत्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकत्वानिरूपि-तप्रतियोगिताकभेदवत्वम्वोक्तमित्यर्थः।

अनतिरिक्ततयेति, अयमाशयः विशिष्टसत्तावावान् गुणइति ज्ञाना नन्तरं सत्त्वज्ञानामीत्यनुव्यवसायादर्शनात्सत्वस्यद्विधाभानाननुभवा द्विशिष्टसत्वंसत्वादनतिरिच्यते नचतत्रसत्वस्यविशेष्यत्वमात्रं प्रका-रत्वन्तुविशिष्टस्येत्यभ्युपगमेप्युक्तानुव्यवसायोपपत्तिरिति वाच्यम्। तादृशविशेष्यत्वस्यप्रकारतानात्मकत्वे तज्ज्ञानस्यसमूहालम्बनत्वापत्तेः सत्तानास्तीतिबुद्धिप्रतिबध्यत्वाद्यनुपपत्तेश्च नचविशिष्टमात्रस्यप्रका-रत्वेपिप्रकारतावच्छेदकत्वस्यवैशिष्ट्यसत्तात्वोभयवृत्तितयासत्तात्वा-वच्छिन्नप्रकारताशालिबुद्धित्वरूपप्रतिबध्यतावच्छेदकसत्वान्नानुपप-त्तिरिति वाच्यम् प्रकारेभासमानस्यैवप्रकारतावच्छेदकतया सत्ता-त्वस्यविशिष्टावृत्तित्वे तज्ज्ञानस्यभ्रमत्वापातात् वृत्तित्वेह्यनतिरिक्त

त्वाभ्युपगमः नचसत्तात्वमुभयसाधारणोधर्म्मइति वाच्यम् केवल-स्यविशिष्टव्यावृत्तधर्म्मान्तरानुपलम्भा त्कैवल्येत्वनेकविधेविलक्षणे-प्रमाणाभावात् नचविशिष्टस्यानतिरिक्तत्वेगुणेतत्प्रतीतेःप्रमात्वमिति वाच्य म्विशिष्टाधिकरणत्वस्यप्रमात्वनियामकत्वाभ्युपगमात् नचा-धिकरणत्ववैलक्षण्यापेक्षयाविशिष्टस्यैवकुतोनवैलक्षण्यमितिवाच्यम् विशिष्टस्यातिरिक्तस्यस्वीकारेपितान्निरूपिताधिकरणत्वस्यकेवलनिरू-पिताधिकरणत्वातिरिक्तस्यनिरूपकभेदेनस्वीकारणीयत्वा दियांस्तु-विशेषोस्माकमवच्छेदकंवैलक्षण्यप्रयोजकं भवतान्तुनिरूपकमेवेति । अथविशिष्टाधिकरणत्वस्यप्रतीतिनियामकत्वेसर्वेषामेवाभावानामैक्य-प्रसङ्गः घटवतिघटाभाववत्ताबुद्धेर्घटप्रतियोगिकत्वविशिष्टाभावत्वाव-च्छिन्नाधिकरणत्वस्याविलक्षणस्यासत्वादेववारणादितिचे त्सत्यं विशेषणानुपरक्तस्यसत्वस्यप्रतीतिसिद्धतयातस्यसर्वत्रविशिष्टप्रती-तौ विशेषणोपरागोयुक्तः प्रतियोग्युपरागम्विनाभावबुद्धेरप्रसिद्धत-या केवलाभावसद्भावेप्रमाणाभावा त्कस्यविशिष्टबुद्ध्यनुसारः स्या-द्विशिष्टबुद्धयोहितत्तत्प्रतियोग्युपरक्तत्वेनभिन्नमूर्तिकानेवाभावान्विष-यीकुर्वन्ति केवलमभावत्वमात्रञ्चानुगताकारानुरोधादेकम् एवम्वि-शिष्टाधिकरणत्वं यदस्माभिः क्वचिदङ्गीक्रियते क्वचिच्चन नतत्रवा-ङ्मात्रस्य सहायता किन्तुवैशिष्ट्येविशेषणाधिकरणत्वं येनसम्बन्धेन-निविशिष्टेतेनाविशेषणवत्वाविशेष्यवत्वोभयसद्भावस्य नैतस्याभावा-धिकरणत्वसत्वासत्वप्रयोजकत्व मसम्भवात् अनीलघटवतिनीलवि-शिष्टघटत्वावच्छिन्नाधिकरणत्वासत्वप्रयोजकन्तूक्ताधिकरणतानिरूप-कस्यानीलाद्यावृत्तत्वन्तदिवाभावाधिकरणत्वस्थलेस्वीकारेघटप्रति-योगिकाभावस्याघटप्रतियोगिकाभावव्यावृत्तावेकाभावकथापिदूरापे-ता कदाचिद्रक्तस्यदण्डस्यारक्तताद्दशायांरक्तविशिष्टदण्डाधिकरण-त्वासत्वप्रयोजकंहिविशेष्यसम्बन्धविशेषणेनसहविशेष्याधिकरणस्यै-ककालत्वं तदपिन प्रकृतेसत्वप्रयोजकं विशेषणस्यघटस्यभूतलेन-सहैककालत्वात् कालविशेषणस्थलीयाधिकरणत्वप्रयोजकस्य काला-धिकरणसम्बन्धस्य प्रकृतविषयानन्तर्भावादिति । अतएवाभावस्थ-लेऽननुभविकमधिकरणत्ववैलक्षण्यमभ्युपेत्य कयोश्चिदभावयोरभेदो-पगमे सर्व्वेषामेवाभावानामैक्यप्रसङ्ग इत्युक्तं जलादिवृत्तित्वविशिष्ट-गोत्वाद्यभावेत्यादिदीधितिव्याख्यावसरे विशिष्टस्यातिरिक्तत्वे प्रमा-

त्वस्यापारिभाषिकत्वमनुगुणमितियत्प्रागुक्त न्तत्त्वेतास्वनतिरिक्तासाधकयुक्तिष्वकिञ्चित्करमित्यलंप्रसङ्गागतविचारबाहुल्येनेति ॥ ०॥

असम्भवइति, यद्यपि स्वप्रतियोगितावच्छेदकसम्बन्धेनसाध्यतावच्छेदकसम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानाधिकरणत्वविवक्षायान्नासम्भवः तथापिस्वरूपसम्बन्धेनसाध्यतायांसद्धेतावव्याप्तिर्भवत्येवेति बोध्यम् ॥

स्वप्रतियोगित्वमित्यादि, स्वत्वस्यानुगतत्वे स्वप्रतियोगितानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितसंसर्गत्वनिष्ठावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेदकत्तानिरूपिताधिकरणत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदत्वेननिवेशः भवति चसंयोगत्वनिष्ठावच्छेदताकसंसर्गताकघटाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदोहेत्वधिकरणवृत्तिरितिनासम्भवः स्वत्वस्याननुगतत्वेच । भावविशिष्टाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं विवक्षणीयं वैशिष्ट्यञ्च स्वतादात्म्य स्वविशिष्टनिरूपकताकाधिकरणत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवद्धेत्वधिकरणवृत्तित्वोभयसम्बन्धेन स्ववैशिष्ट्यञ्च स्वप्रतियोगितानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणावच्छेदकताकसंसर्गताकत्व स्वप्रतियोगितावच्छेदकतासमानाधिकरणावच्छेदकताकत्वोभयसम्बन्धेना त्रोभयत्वावच्छिन्नसंसर्गतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतायां संसर्गतावच्छेदकत्तासामानाधिकरण्यनिष्ठावच्छेदकतानिरूपितत्वमात्रंनिविशिष्टं तेनस्वनिरूपितप्रतियोगिताकसंसर्गतावच्छेदकतासमानाधिकरणसंयोगत्वनिष्ठावच्छेदकत्वघटितविशेषसंसर्गेणस्वविशिष्टनिरूपकताकाधिकरणत्वरूपविशेषसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वस्यहेत्वाधिकरणेसत्वान्नासम्भवः स्वत्वस्यपरिचायकत्वान्नाननुगमः । अथ पूर्व्वक्षणवृत्तित्वविशिष्टघटाभावाभावस्य साध्यत्वे धूमे घटाभावप्रतियोगितावच्छेदकसंयोगेनस्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणपर्व्वतवृत्तिघटाभावात्मकसाध्याभावप्रतियोगितावच्छेदकत्वा त्साध्यतावच्छेदकस्येत्यव्याप्तिः नचस्वीययत्प्रतियोगितावच्छेदकसम्बन्धेनस्वप्रति-

योगितावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्तद्वृत्तिसाध्यतावच्छे- दकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीयतत्प्रतियोगित्वंप्रतियोगि- ताविशिष्टप्रतियोगितात्वेनानुगतन्निवेश्यं वैशिष्ट्यञ्च स्वतादात्म्य स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वनिरूपकाभावीयप्रतियोगितावच्छे- दकावच्छिन्नत्वोभयसम्बन्धेनस्वविशिष्टनिरूपकताकाधिकरणतावत्व- सम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवद्वृत्त्वधिक- रणवृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीय- त्वोभयसम्बन्धेनेति नदोष इति वाच्यम् घटवान्तात्क्रियात्वादित्यत्र- कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्यतत्क्रियासमानकालीनप- दार्थाभावस्यपूर्वक्षणाविशिष्टस्वाभावाभावात्मकतयास्वप्रतियोगिता- वच्छेदकावच्छिन्नसामान्यान्तर्गतपूर्वक्षणवृत्तित्वविशिष्टस्वाभावस्य- स्वप्रतियोगितावच्छेदकेनकालिकेनस्वरूपेणवाहेतुमतिसत्वेनाव्याप्ते- रितिचेन्न स्वविशिष्टप्रतियोगितावच्छेदकावच्छिन्नत्वस्यैवसंसर्ग- त्वात् वैशिष्ट्यञ्च स्वनिरूपकाभावीयत्व स्वावच्छेदकसम्बन्धाव- च्छिन्नत्वोभयसम्बन्धेन तथाच तद्व्यक्तिनिष्ठकालिकसम्बन्धावच्छि- न्नप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नस्वनिरूपकाभावप्रतियोगिता- वच्छेदकावच्छिन्नत्वस्यतद्व्यक्तिनिष्ठनिरूपकत्वएवसत्वेननाव्याप्तिः । नचैवमपिप्रमेयवान्वाच्यत्वादित्यत्रसमवायसम्बन्धावच्छिन्नप्रमेयनिष्ठ प्रतियोगिताविशिष्टत्वस्यस्वस्मिन् सत्वेनाव्याप्तिरिति वाच्यम् सा- ध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीयत्वं विहाय- साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यविशिष्टप्रतियोगितायाएव- विशेषणत्वात् । नचघटनिष्ठसंयोगसम्बन्धावच्छिन्नप्रतियोगिता- यां स्वरूपसम्बन्धावच्छिन्नत्वविरहेणतादृशप्रतियोगिताप्रसिद्ध्याति- व्याप्त्यसम्भवात् ग्रन्थासङ्गतिरिति वाच्यम् । स्वरूपसम्बन्धेनसा- ध्यतायांसङ्केतावुक्तयुक्त्याऽव्याप्त्या साध्यतावच्छेदकसम्बन्धाव- च्छिन्नत्वस्यपारिभाषिकस्यैवविवक्षितत्वादिति ।

सत्ताद्रव्यत्त्वयोरिति, द्वित्वंविवक्षितम् सत्तामात्रेणैव समवेतव्य- वहारोपपत्तौद्रव्यत्वादिनामननुगतानांनतथात्वम् नचविनिगमकाभा- वः एकमेवहिविनिगमकः द्रव्यत्वादिषुमध्येनैकमपिहितादृशम् यत्- सर्वत्रसमवेतव्यवहारप्रयोजकं तस्यैकस्यतथात्वेऽपरस्यापितथात्व- मित्यनेकस्यतादृशाभावत्वेगौरवम् । सत्वस्यतथात्वेच तेनैवसर्वत्रस-

मवेतव्यवहारोपपत्तेर्नापरस्यतथात्वमितिभावः।

नियमाच्चेतिभावइति, ननुगुणसामान्याभावाभावस्याप्येकत्वस्वरूपत्वमेवास्तु कपिसंयोगादीनांतु नतथात्वम् इत्यात्मत्वहेतावपि नदोषसम्भवइतिचेत् अत्रकेचित् स्ववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणवृत्तिप्रतियोगिताकाभावावृत्तित्वम् स्वप्रतियोगित्वाविशेषणम्बाच्यम् तथाचात्मत्वहेतौकपिसंयोगात्मकाभावस्य कपिसंयोगान्यकपिवृत्तिगुणान्यगुणसामान्याभावाभावस्यैकतया तदीयतादृशगुणसामान्याभावनिष्ठप्रतियोगत्वस्ये दृशाभावावृत्तितयासंग्राह्यत्वाद्भवत्येवाव्याप्तिः वृक्षत्वहेतुकेच तादृशगुणसामान्याभावनिष्ठप्रतियोगित्वस्य तादृशत्वेन संग्राह्यत्वेऽपि तत्प्रतियोगितावच्छेकावच्छिन्नाधिकरणत्वस्यवृक्षादावुत्पत्तिकालावच्छेदेनसत्वात्। कपिसंयोगान्यकपिवृत्तिसमवेतान्यसमवेताभावाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वसत्वेपि तत्प्रतियोगित्वस्य कपिसंयोगवृत्तिपदार्थविभाजकीभूतधर्म्मानधिकरणघटत्ववृत्तिप्रतियोगिताकाभाववृत्तित्वेन धारणासम्भान्नाव्याप्तिरितिग्रन्थासंगतिः नचोक्तसमवेताभावाभावमादायैववृक्षत्वहेतावव्याप्तिरितिवाच्यम् अनुयोगिताविशिष्टानुयोगिता निरूपितप्रतियोगितानवच्छेदकत्वस्यविवक्षितत्वात् वैशिष्ट्यंच स्वतादात्म्य स्वविशिष्टप्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाधिकरणहेत्वधिकरणवृत्यभावनिष्ठत्वोभयसम्बन्धेन वैशिष्ट्यञ्च स्वाश्रयनिरूपितत्व स्वाश्रयवृत्तिपदार्थविभाजकीभूत धर्म्मानधिकरणवृत्तिप्रतियोगिताकाभावावृत्तित्वोभयसम्बन्धेन तथा च तादृशसमवेताभावाभावत्वरूपानुयोताविशिष्टानुयोगिता निरूपितत्वस्य कपिसंयोगाभावनिष्ठप्रतियोगित्वे विरहान्नाव्याप्तिरिति अथात्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावसाध्यकभावत्वे साध्याभावरूपानुयोगित्वस्य निखिलपदार्थवृत्तित्वेन स्वसमानाधिकरणपदार्थविभाजकीभूतधर्मानधिकरणत्वाप्रसिद्ध्या नुयोगित्वान्तरमादायातिव्याप्तिः तस्यसत्तामात्रवृत्तित्वे स्वविशिष्टसत्ताभावनिष्ठप्रतियोगित्वमादायातिव्याप्तिवारणे प्युक्तप्रमेयाभावस्यस्वरूपाविषयित्वान्यतरसम्बन्धेन साध्यतायां सत्ताभावविषयकज्ञानत्वेऽतिव्याप्तिदुर्वारा प्रमेयाभावनिष्ठप्रतियोगितायामुक्तावृत्तित्वरूपाविशेषण विरहात् सत्ताभावनिष्ठ प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्यहेत्वधि-

करणेविरहाच्च। पटवृत्तित्वविशिष्टघटात्वाभावसाध्यकेव्यभिचारिणि साध्याभाववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणघटत्वनिष्ठप्रतियोगिताकाभाववृत्तित्वस्यैवसाध्याभावत्वरूपानुयोगित्वाश्रयनिरूपितप्रतियोगितायांसत्वेनाभावान्तरानुयोगित्वमादायातिव्याप्त्यापात्तेश्च अतिव्याप्तिवारणाया श्रितकल्पेऽतिव्याप्तेरिष्टापत्तेरयोगादिति-चेन्न. अनुयोगितावैशिष्ट्यस्यप्रतियोगितायां स्वाश्रयनिरूपितत्व स्ववृत्तित्वोभयसम्बन्धेनवाच्यत्वात् वृत्तित्वञ्चस्वनिरूपकत्वस्वाश्रयप्रतियोगियत्किञ्चित्वृत्तिपदार्थविभाजकीभूतधर्मानधिकरणप्रतियोगिकाभावाभाववृत्तित्वान्यतरसम्बन्धेन! तथाचव्यभिचारिणिसाध्यनिष्ठप्रतियगितैवानुयोगिताविशिष्टा कपिसंयोगाभावसाध्यकसद्धेतौतादृशगुणसामान्याभावनिष्ठापीतिनासङ्गतिरितिध्येयम्। यत्तु गुणसामान्याभावस्ययदेकत्वमात्रस्वरूपन्तत्रनानुगतत्वप्रयोजकम् द्रव्यत्वादिवदनुगतस्यैकत्वस्याभावा दननुगतस्यापि स्वसत्तायांगुणसामान्याभावाभावव्यवहारोत्पादकत्वेनतत्स्वरूपत्वेचविनिगमकाभावान्निखिलगुणात्मकत्वमिति तत्तुच्छम् संख्यारूपत्ववा परिमाणरूपत्वम्वा पृथक्त्वरूपत्वम्वेत्यत्रविनिगमकाभावेऽपिसंयोगादिरूपतायांलाघवस्यैवविनिगमकत्वात् एकत्वेनचैकेनैवतत्तद्रव्येगुणसामान्याभावाभावव्यवहारोपपत्तेः संयोगादिभिस्त्वनन्तैरिति।

दीधितौयादृशप्रतियोगितेत्यादि; यादृशप्रतियोगितानिरूपितावच्छेदकतावद्धर्मनिष्ठावच्छेदकतानिरूपितनिरूपकताकाधिकरणतावान्नतिप्रतीतिसिद्धस्य प्रतियोगितात्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वानिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितधर्मनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदकताभिन्नावच्छेकत्वानिरूपितनिरूपकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिताधिकरणत्वानिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदस्यहेत्वधिकरणवृत्तेर्निरूपितंयत्प्रतियोगित्वन्तन्निरूपिताधिकरणत्वनिष्ठावच्छेदकतानिरूपितानिरूपकत्वनिष्ठावच्छेकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितधर्मनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतारूपितावच्छेदकतावत्प्रतियोगितानवच्छेदकत्वम्विवक्षित नच महानसीयाभावप्रतियोगितावच्छेदकावच्छिन्नत्वे सति

वन्ह्यभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावान्ने-ति भेदस्यापि तादृशभेदत्वेनलक्षणाक्रान्ततया तन्निरूपितप्रतियोगि-तानिरूपितपरम्परावच्छेदकतावत्त्वस्य वन्ह्यभावप्रतियोगित्वेसत्वाद-व्याप्तिरिति वाच्य मवच्छेदकत्वनिष्ठवच्छेदकताविशिष्टनिरूपकत्वनि-ष्ठावच्छेदकत्वस्यविवक्षितत्वात् वैशिष्ट्यं च स्वभिन्नावच्छेदकत्वानिरू-पितत्वसम्बन्धेन। यद्वैकत्ववृत्तित्वंनिरूपकत्वनिष्ठावच्छेदकतायां विशे-षणं वाच्यम् वृत्तित्वञ्च स्वनिरूपितपरम्परीयोभयावृत्तिधर्म्मनिष्ठा-वच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन तथाचनदोष इति तन्न एकत्वादेः पर्य्याप्त्यनभ्युपगमे-निवेशासम्भवात्। वस्तुतस्तु निरूपकत्वनिष्ठावच्छेदकतायान्नकि-मपिविशेषणादिकंदेयं निरूपकत्वस्ययादृशप्रतियोगितावच्छेदकता-त्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृतित्वेन यादृशप्रतियोगि-ता विशिष्टत्वेन वानिशर्नीयतया निरूपकत्वनिष्ठावच्छेदकताव-च्छेदकतयाप्रतियोगित्वव्यक्तिद्वयस्य प्रवेशासम्भवात्। किन्तु व न्ह्यभावप्रतियोगित्वव्यक्तिविशिष्टनिरूपकताधिकरणतावत्वे सति महानसीयाभावप्रतियोगिताविशिष्टनिरूपकताकाधिकरणतावद्भेदवा-रणाय तादृशाधिकरणत्वनिष्ठावच्छेदकताविशिष्टत्वं प्रतियोगिता-यान्निवेश्यं वैशिष्ट्यञ्च स्वभिन्नावछेदकत्वानिरूपितत्वसम्बन्धेन। यद्वाधिकरणत्वनिष्ठा वच्छेदकताद्वयानिरूपितत्वं प्रतियोगितावृत्यु-भयावृत्तिधर्म्मनिष्ठावच्छेदकताद्वयानिरूपितत्वम्वा विशेषणत-याप्रतियोगित्वस्योपादेय मितिनकस्याचिद्दोषस्यसम्भवः। इदञ्चा-धिकरणत्वप्रतियोगित्वावच्छेदकत्वानामधिकरणप्रतियोग्यवच्छेदका-नां भेदेऽपि नभेदइतिमतेऽन्यथाधूमवान्वह्नेरित्यत्रातिव्याप्तेः धूमाभा-वप्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावद्भेदस्य प्र-तियोगिताया मधिकरणत्वद्वयादिनिष्ठावच्छेदकतानिरूपितत्वस्य-सत्वेना वच्छेदकताद्वयस्याधिकरणत्वादिनिष्ठस्य निरूपितत्वसत्वे-नच धूमत्वावच्छिन्नप्रतियोगित्वस्यलक्षणाघटकत्वा देवं साक्षात्पा रंपरासाधारणावच्छेदकत्वनिरूपितत्वमभ्युपेत्यैवेदं समुचित मन्य-थावह्निमान्धूमादित्यत्राव्याप्तिरनुपदोक्तायाअनुद्धारादित्यवधेयम्॥

अधिकरणतानिरूपितस्वरूपसम्बन्धेनेति, नचाधिकरणत्वीयस्व-रूपोपादाने प्रतियोगितावच्छेदकतयाऽधिकरणतात्वप्रवेशोव्यर्थ इति

वाच्यम् वाच्यम् प्रमेयत्वत्वादित्यादौप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपितप्रमेयत्वनिष्ठाधेयत्वस्यस्वरूपसम्बन्धावाच्छिन्ननिरूपकताकप्रमेयत्वनिष्ठाधिकरणत्वस्यचप्रमेयत्वात्मकतयैकत्वेनप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात् अधिकरणतात्वावच्छिन्नतियोगिकस्वरूपस्यविवक्षणेच वह्न्यभावप्रतियोगित्वस्यापिलक्षणघटकत्वापत्तेः प्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपितत्वावच्छिन्नस्य तादृशाधिकरणतात्वावच्छिन्नप्रतियोगिकस्वरूपेणसत्वासम्भवादिति अनुगमस्तु प्रतियोगिताविशिष्टप्रतियोगिताकाभावत्वेन वैशिष्टयञ्च स्वावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतात्वावच्छिन्नत्व स्वावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनेति ॥

तेनायः पिण्डस्यापीति, सम्बन्धसामान्येनप्रतियोगितावच्छेदकावच्छिन्नत्वाविवक्षायामेवैतद्दोषस्यप्रदर्शिततया कथंतत्सम्भवःप्रतियोगिव्यधिकरणाभावाप्रसिद्धेरितिचेत् तदयोगोलकसंयुक्तासमानकालीनतद्व्यक्त्यवच्छिन्नाभावस्यैवप्रतियोगिव्यधिकरणत्वसम्भवा त्तत्प्रतियोगितैवलक्षणघटिका स्ववृत्तिवाच्यत्वादिकन्तु न संसर्गः अत एव वह्निमान्धूमादित्यादावव्याप्तिसम्भवेऽतिव्याप्तिदानमनुचितमितिनिरस्तम्। नचैवमपिद्रव्यमात्मत्वादित्यादावव्याप्तिः विषयितयाज्ञानस्याभावमात्रप्रतियोगितावच्छेदकावच्छिन्नत्वादिति वाच्यम्। विषयित्वस्येदानींसंसर्गत्वानभ्युपगमात्। अधिकरणतानिरूपकतावच्छेदकसम्बन्धसमान्येनैवप्रतियोगितावच्छेदकावच्छिन्नत्वस्यवावाच्यत्वात्। नचतथाप्यात्मनिवस्तुमात्रसमानकालीनस्य कस्यचिद्विशेषगुणस्यसर्वदैवसत्वादव्याप्तितादवस्थ्यमिति वाच्यम्। चरमध्वंसावच्छिन्नावच्छिन्नाभावप्रतियोगित्वस्यैवलक्षणघटकत्वसम्भवादिति ध्येयम् ॥०॥

यदवच्छेदकत्वंतन्निरूपितस्वरूपेति, अत्रावच्छेदकतात्वावच्छिन्नप्रतियोगित्वप्रवेशफलमधिकरणतात्वावच्छिन्नातियोगित्वप्रवेशफलवदेव वोध्यम्।

अत्रयादृशप्रतियोगितावच्छेदकधर्म्मइत्यादि, अत्रैतत्कल्पपरिष्कारश्च हेत्वधिकरणत्वपरिष्कारवत् तत्रसङ्केतावेवप्रायोऽहेत्वाधिकरणस्यहेत्वधिकरणत्वापत्त्याव्याप्तिपरिहारः फल मत्रप्रायोव्यभिचारिणिसाध्याभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्यहेत्वाधिकरणे

प्रसङ्गेनातिव्याप्तिपरिहारः द्रव्यानुयोगिकसमवाय विशिष्टसत्तात्वाव-
च्छिन्ननिरूपितप्रकारितान्यतरसम्बन्धेन सत्तासाध्यकविशिष्टसत्त्व-
प्रकारकज्ञानत्वहेतुके ऽतिव्याप्तिवारणञ्च द्रव्यत्वसाध्यकउक्तान्यत-
रसम्बन्धेनसत्त्वेसद्धेतौ हेत्वधिकरणत्वपरिष्कारप्रदर्शिता व्याप्तेः प्रद-
र्शितवारणरीत्याकार्यं समवायेनघटत्वपटत्वोभयसाध्यकव्यभिचारि-
ण्यतिव्याप्तिश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेद-
कत्वस्य साध्यतावच्छेदकाविशेषणतामभ्युपेत्यवारणीया। यत्तु प्र-
मीयप्रकरतावच्छेदकत्वविशेषणेनतद्वारणं कार्यमिति तन्न तथासति-
प्रतियोगितावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यत्वस्य प्रमीय-
विशेष्याताप्रतियोगिकस्वरूपेणाभावस्य लक्षणघटकत्वापेक्षायानिर्वी-
जत्वापत्ते रस्मत्कल्पेच प्रमीयत्वप्रवेशेनगौरवस्यैवतदुपेक्षाविजत्व-
सम्भवात्—तचोक्तविशेष्यत्वाभावश्चतादृशविशेष्यतात्वेतरधर्म्मान-
वच्छिन्नतादृशविशेष्यतात्वावच्छिन्नप्रतियोगिताकएवविवक्षणीयः—स
चोक्तविशेष्यतात्वावच्छिन्नप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियो-
गिताकः केवलान्वयीति प्रतियोगितामात्रस्यलक्षणघटकत्वापत्तिरिति
व्ययम् संसर्गीयप्रतियोगितायामुक्तविशेषतात्वावच्छिन्नत्वस्याप्रवेश्य-
त्वात् नचवह्नीयसंयोगेनसाध्यतायांसद्धेतौ प्रतियोग्यधिकरणाप्रसि-
द्धिः—स्वाश्रयाधिकरणत्वस्यावश्यंसाध्यतावच्छेदकसम्बन्धेनवाच्य-
त्वात्-अन्यथाधूमवान्वह्नेरित्यत्रधूमाभावस्यप्रतियोगिवैयधिकरण्या-
नुपपत्त्याऽतिव्याप्तिः स्यादिति वाच्यम्। प्रतियोगितावच्छेकतात्वा-
वच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपविशिष्टाधिकरणत्वस्य साध्य-
तावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धेनाभावस्य
विवक्षितत्वात् वैशिष्ट्यञ्च स्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियो-
ग्यवच्छेदकताकत्व स्ववृत्तित्वोभयसम्बन्धेन वृत्तिताच स्वाभाववत्त्व-
सम्बन्धेना भावश्च स्वसमानाधिकरणसाध्यतावच्छेकसम्बन्धाव-
च्छिन्नाधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगि
तानवच्छेदकत्व स्वकालीनसाध्यतावच्छेदकसम्बन्धावच्छिन्नाधि-
करणतानिरूपकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदक-
त्वोभयसम्बन्धावच्छिन्नप्रतियोगिताकोबोध्य इति ॥ ० ॥

सर्वत्रासम्भव इति, इदमिदानींप्रकारित्वादिनाव्याप्यव्यापकभा-
वाङ्गीकारेणा न्यथाप्रकारितासम्बन्धेनघटसाध्यकतज्ज्ञानत्वेऽव्या-

ष्यसम्भवेनासम्भवासङ्गत्यापत्तेरिति—

अतिप्रसङ्गादिति, नचप्रमेयवदभावप्रतियोगित्वस्यतत्तत्प्रतियोगित्वाभिन्नतत्तद्धर्मस्वरूपत्वेन तत्प्रतियोगित्वाभिन्नतया ऽसम्भवएवात्रापिसम्भवतीतिवाच्यं स्वाभिन्नस्वावच्छेदकत्वस्यविवक्षणे ऽसम्भवासम्भवान्नचकालिकोऽपिसम्बन्धोघटाद्यभावप्रतियोगिताघटक स्तेनचघटत्वाद्यवच्छिन्नाधिकरणत्वमेवहेत्वधिकरणमिति वाच्यम्। तत्पर्वतासमानकालीनव्यक्त्यभावप्रतियोगित्वस्यैवलक्षणघटकत्वसम्भवात् नचकालिकेनतादृशतद्व्यक्तित्वविशिष्टाभावप्रतियोगित्वस्यतत्प्रतियोगित्वेनसहैक्या त्स्वावच्छेदकताघटककालिकेनप्रतियोगितावच्छेदकतद्व्यक्तित्वस्यपर्वतसमानकालीनेऽपिसत्वादप्रसिद्धिरितिवाच्यम् तद्व्यक्तित्वस्यतद्व्यक्त्यात्मकत्वा त्तद्व्यक्तिविशिष्टाभावस्यलक्षणघटकत्वा त्प्रतियोगित्वस्य प्रतियोगितावच्छेदकताघटकसंसर्ग प्रतियोगितावच्छेदकोभयात्मकत्वाभ्युपगमेन तत्प्रतियोगित्वयोरैक्यासम्भवाच्च नचप्रतियोगितावच्छेकसम्बन्धात्मकत्वं संयोगेनरूपाभावप्रतियोगित्वस्यरूपेऽसत्वप्रसङ्गादिति भावः।

यदभावीययत्प्रतियोगितेति; यदभावीयत्व यत्प्रतियोगितात्वोभयधर्म्मावच्छिन्ननिरूप्यतानिरूपितानिरूपकतावदवच्छेदकतावत्सम्बन्धेनयदभावीयत्वयत्प्रतियोगितात्वोभयधर्म्मावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावदवच्छेदकतावद्धर्मावच्छिन्नानधिकरणत्वमित्यर्थः॥

प्रतियोगिमत्त्वादिति, प्रतियोगित्वस्योभयत्वरूपत्वे प्युभयत्वत्वेनैवतदवच्छिन्नाधिकरणत्व म्प्रत्येकवद्देशावृत्ति नतुप्रतियोगितात्वेन प्रत्येकवद्देशेप्युभयाभावप्रतियोगिमदिति प्रतीतेरितिभावः।

बिरोधस्यसाक्षादनुमिताववविरोधित्वमतमालम्ब्याहयद्वेति, अतिप्रसङ्गभङ्गादिति, विरोधस्थलइति शेषः तेनप्रवेशादेवेत्यत्रनैवकारव्यवच्छेद्यासम्भवः। साध्यसामानाधिकरण्यस्यसम्बन्धविशेषनियन्त्रितस्यापिसाधारणहेतुसाधारणत्वादिति॥

मानाभावस्येति, अत्यन्ताभावप्रतियोगितायां सम्बन्धावच्छिन्नत्वसाधकस्य प्रतिवध्यप्रतिबन्धकभावाद्यनुपपत्यादेर्भेदस्थलेऽवतारासम्भवात्। सम्बन्धस्यैकप्रतियोगिकत्वापरानुयोगिकत्वनियमेन तादात्म्यस्यसम्बन्धत्वाभावाच्च—घटोद्रव्यमित्यादिशाब्दस्यच प्रथमार्थतादात्म्यप्रकारकत्वं सम्बन्धानवच्छिन्नप्रकारकत्वम्बाभ्युपे-

यं प्रकारतात्वादिकन्तुविषयतात्वव्याप्यधर्म्मविशेषएवेति सम्बन्धानवच्छिन्नत्वेऽपिनतत्रप्रकारतात्वक्षतिः। अस्तुवासम्बन्धावच्छिन्नैवतत्प्रकारता तथापि प्रतियोगितायाः तदभ्युपगमोऽप्रामाणिकएवेतिभावः। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमेवभेदत्वन्त्वनुयोगिताविशेषः प्रमाणाभावादितिमतेऽप्याह एवमिति, स्वामित्वादिसम्बन्धस्यप्रतियोगितावच्छेकत्वेमानाभावादितिशेषः॥

सम्बन्धान्तरावच्छिन्नतत्तदनन्तेति, ननुप्रतियोगितावच्छेदकत्वस्योपलक्षकतयैवनिवेश्यत्व मन्यथाप्रमेयधूमहेतुकस्थले गुरुधर्मस्यप्रतियोगितानवच्छेदकत्वपक्षे ऽव्याप्तेश्चेतिकथंगौरवमितिचे दत्रकेचि त्प्रतियोगितायांसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशे कम्बुग्रीवादिगुरुधर्म्मभेदस्यनप्रवेशो ऽन्यथाविषयित्वादिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य कम्बुग्रीवादिमत्वेऽपिसत्वेन तद्भेदस्यप्रवेशनीयतयां गौरवमितिवदन्तिं। अत्रब्रूमः साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपावच्छेदेन पर्य्याप्तिसम्बन्धावच्छिन्नताद्दशप्रतियोगितावच्छेदकत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदकूटस्य साध्यतावच्छेदकनिष्ठस्य चक्रवर्त्तिलक्षणोक्तत्वेन दीधितकृत्सम्मतस्य लक्षणघटकतामभ्युपेत्यगौरवोद्भावनंकृतं तच्चस्फुटमेव तत्तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्य स्वप्रतियोगितावच्छदकघटकतयाभिन्नस्य घटत्वादिभेदस्यलक्षणघटकत्वात् नचोक्तप्रतियोगितावच्छेदकत्वावच्छिन्नभेदनिवेशनमप्रयोजन म्महानसीयवन्ह्यभावप्रतियोगित्वस्यसाध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वविशेषणेनैववारणादितिवाच्यं तद्विशेषणोक्तेशिष्यबुद्धिवैशद्यार्थतायाःप्राक्प्रपञ्चित्वात्। पूर्वंतद्विशेषणमव्याख्यानरूपग्रन्थेशङ्कोत्तरक्रमेणाभिहित मिदानींदीधितिव्याख्यानेतत्सम्मतविशेषानुरसणमेवयुक्तमित्यस्यापिवक्तुंशक्यत्वाच्च। अतएव संबन्धान्तरावच्छिन्नतत्तदनन्तप्रतियोगितावच्छेदकभेदकूटेत्यादिलिखनमपिसङ्गच्छते—अन्यथाप्रतियोगितागतानन्त्यम्विहाय धर्म्मगतानन्त्यमेवोच्येतेति॥०॥

अथस्वावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावान्नेतिप्रतीतिसिद्धोयोहेत्वधिकरणवृत्तिभेद स्तदीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्प्रतियोगितावच्छेदकतावान्नेतिसामान्यभेदएवनिवे-

श्य स्तत्रनगौरवःप्रसरः अत्रहेत्वाधिकरणवृत्तिघटाधिकरणत्वाविशि-
ष्टभेदतत्प्रतियोगित्वघटाधिकरणत्वनिष्ठावच्छेदकत्वघटत्वावच्छिन्ननि-
रूपकत्वनिष्ठावच्छेदकत्वघटत्वानिष्ठावच्छेदकत्वनिष्ठावच्छेदकत्वघट-
त्वात्मकधर्म्मनिष्ठावच्छेदकत्वघटत्वनिष्ठावच्छेदकत्वनिष्ठावच्छेदकत्व-
घटनिष्ठप्रतियोगितानिष्ठावच्छेदकत्वघटनिष्ठप्रतियोगित्वघटत्वनि-
ष्ठावच्छेदकत्वादिघटितविशेषावच्छेदकावच्छिन्नप्रतियोगिताकभेदान-
वच्छेदकघटोभयभेदश्चादायातिव्याप्तिवारणाय तत्तदवच्छेदकनिष्ठाव-
च्छेदकताभिन्नावच्छेदकत्वानिरूपितत्व न्तद्व्यक्तेःस्वरूपतोभानेऽतिव्या-
प्तिवारणाय तत्तन्निष्ठावच्छेदकतानिरूपितत्वञ्चनिवेश्य मेवमेवभट्टा-
चार्य्येणसामान्यभेदनिवेशःकृतः तत्रस्वावच्छेदकावच्छिन्नवत्त्व-
सम्बन्धस्य परम्परात्मकस्य यद्धेत्वधिकरणवृत्तिभेदप्रतियोगिता-
वच्छेदकत्वेनोपादानम् तल्लाघवलोभेन नतु प्रकारविधयाप्रवेशस्या-
सम्भवेन हेत्वधिकरणवृत्तिभेदप्रतियोगित्वस्य स्वावच्छेदका-
घटकशेषनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वाविशेषिता-
वच्छेदकतानिरूपितस्योपादेयत्वेऽपि तत्कोटौतत्तत्प्रतियोगि-
त्वानिष्ठावच्छेदकतानां प्रतियोगित्वत्वसामानाधिकरण्येनोपा-
देयत्वेनो नुगमस्याभावादि चेन्न हेत्वधिकरणवृत्तिसामान्यभेदप्रति-
योगितावच्छेदकत्वेनानुगतरूपेण प्रतियोगित्वस्यानुपादेयतया म-
तभेदेनप्राग्युक्तत्वात् । अतएव नहेत्वाधिकरणवृत्तितावच्छेदककूट-
त्वप्रतियोगिकपर्याप्त्यनुयोगितानिरूपितपरम्परावच्छेदकतावत्वेनप्र-
तियोगित्वानुगमश्शक्यः । एवञ्च तन्मतावलम्बनेनापिपरम्परासम्ब-
न्धानुधावनंभट्टाचार्यस्येत्यपियुज्यतेवाचोयुक्तिः । अथवैतद्ग्रन्थस्यता-
दृशावच्छेदकत्वावच्छिन्नभेदनिवेशाभिप्रायकतायाष्प्रागुक्ततया सा-
मान्यभेदनिवेशोधूमवान्वह्नेरित्यादिव्यभिचारिण्यतिव्याप्तेः । उक्ता-
वच्छेदकतावत्प्रतियोगितावच्छेदकतात्वेन तादृशावच्छेदकतायाव्या-
सज्यवृत्तित्वा न्नचभट्टाचार्याणांसामान्यभेदोक्तिरसंगता स्वावच्छे-
दकतापर्य्याप्त्यधिकरणत्वरूपपरम्परायास्संसर्गतामभ्युपेत्यतादृश-
प्रतियोगिताविशिष्टान्यत्वनिवेशेतस्यतात्पर्यादितिध्येयम् ॥ ० ॥

ध्येयमिति, अन्योन्याभावत्वस्यानुयोगिताविशेषरूपत्वेनवैयर्थ्य-
सम्भवइतिचिन्ताबीजम् ।

इत्यपिवदन्तीति, व्याप्तेरेकरूपत्वाभावप्रसङ्गसूचनायापीति ॥

अनुमितिरप्यनुपपन्नेति, तथाचगोविधेयकानुमितेरप्यभ्युपगमे
गवेतरावृत्तित्वरूपायानिरवच्छिन्नगोत्वविधेयकानुमितिप्रयोजकव्या-
प्तेरुपस्थितिध्रौव्ये गोविधेयकत्वेनाभिमतानुमितावपि गोत्वविधेय-
कत्वस्यसम्भवेन गोस्साध्यत्वमप्रामाणिकमेवेतिभावः । ननुगोत्वत्व-
घटकगवेतरावृत्तित्वस्य समवायसम्बन्धावच्छिन्नवृत्तित्वप्रतियोगि-
कत्वा त्सास्नानिष्ठस्य व्याप्तिरूपस्य समवेतत्वसम्बन्धावच्छि-
न्नवृत्तित्वप्रतियोगताकत्वा दुभयोर्भेदे गोत्वत्वोपस्थितेः कथंव्या-
प्त्युपस्थितिरूपत्वमितिच द्गोस्तादात्म्येनसाध्यत्वे समवायेनैवसा-
स्नायाइहहेतुत्वं गोपदञ्चपृथिवीपरं तथाचव्याप्तेर्गोत्वत्वघटकत्वान्नि-
रावाधमितिनासङ्गतिरितिकेचित् । परेतु साध्यवदन्यावृत्तित्वरूप-
व्याप्तिपरामर्षस्यतादृशव्याप्त्यवच्छिन्नप्रकारताशालिनिश्चयत्वेनैव-
कारणत्व न्नतत्रव्याप्तिधर्मितावच्छेदकतात्मकविषयत्वस्यप्रवेशो ऽना-
वश्यकत्वात् । तथाचगवेतरासमवेतत्वोपस्थितौ तदवच्छिन्नगोरू-
पादेः रूपत्वमविषयीकृत्य परमर्षा दनुमिते र्गोत्वविधेयकत्वसम्भवा-
न्नासङ्गतिः । अतएव तद्विशिष्टस्यन यत्र पक्षधर्म्मताधीरित्येववक्ष्यति
नतु तद्विशिष्टस्यसास्नादेरितीति प्राहुः ॥ ० ॥

व्यापकत्वंवाच्यमित्याशयइति । इदमुपलक्षणं गोत्वत्वानुपस्थि-
तावपिनिरवच्छिन्नगोत्वनिष्ठावच्छेदकताकविधेयताशाल्यनुमितेस्सा-
ध्यविशेष्यकहेतुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्या-
पकत्वज्ञानादपिसम्भवोवोध्यः नचैवंव्यापकत्वज्ञानकारणत्वपक्षे स्व-
रूपतोज्ञानत्वादिप्रकारकानुमित्यनुपपत्तिरूपदोषप्रतिपादककेवलान्व-
यिग्रन्थविरोधइतिवाच्य मुक्तव्यापकत्वस्यावच्छेदकतानवच्छेदक-
धर्मावच्छेदेनावच्छेदकत्वाभावस्यसत्वएवतत्तत्साध्यवद्भेदप्रतियो-
गितावच्छेदकेनिर्वाह्यतया प्रतियोगितानवच्छेदकधर्म्मावच्छेदेनप्रति-
तियोगित्वाभावस्येवावच्छेदकत्वाभावस्याप्यनभ्युपगमे तद्व्याप-
कत्वस्यासम्भवेन तदभिप्रायकत्वात्केवलान्वयिग्रन्थस्येत्यसङ्गतेर-
भावादिति ।

तच्चिन्त्यमिति, सम्बन्धधर्मिकव्यापकताग्रहस्य सम्बन्धिविधेय-
कानुमितेरपिहेतुत्वे कदागोतादात्म्यवानित्यनुमितिः कदायङ्गौरित्यनु-
मितिरितिनियमाभावप्रसङ्गेन तस्याकारणत्वे तदवलम्बनेन व्या-
ख्यानस्यानुचितत्वमिहाचिन्तावीजम् ।

इत्यापिवदन्तीति, धर्म्मिभेदधर्मात्यन्ताभावयोरैकतयाभेदबुद्धेरिवात्यन्ताभावबुद्धेरपिविरोधित्वमानुभविकमिति गोत्वत्वावच्छिन्नाभावनिश्चयदशायां तादृशानुमित्यसम्भवएवास्वरसोऽपिनासूचितइति। क्वचित्पुस्तकेप्रतियोगिताधर्म्मिकोभयाभावघटितलक्षणाभिप्रायेण गोत्वत्वाद्यग्रहदशायामित्यादिग्रन्थव्याख्यानमस्ति तस्यायमाशयः अनुव्यवसायानुरोधेनोल्लेखमानस्यापिजातेर्निरूपितत्वादिसम्बन्धेनस्वरूपतोभाने प्रकारित्वइवावच्छेद्यत्वेपिनिरूपितत्वसम्बन्धेनस्वरूपतोभानंस्वीक्रियत इतिगोत्वत्वाद्यनुपस्थितावपि गोविधेयकानुमित्युपयोगिव्याप्तिग्रहस्यसम्भवइति नचैवंकेवलान्वयिग्रन्थेस्वरूपतोज्ञानत्वादिप्रकारकानुमित्यनुपपत्तेर्व्यापकताज्ञानकारणत्वपक्षउद्भावितायाअसङ्गतिरितिवाच्य मवच्छेद्यत्वेनिरूपितत्वसंबन्धेनस्वरूपतोभानानभ्युपगमेनतदुक्तेस्सङ्गतत्वसम्भवादिति।

वस्त्वन्तरइति, विभुरूपइत्यर्थः। विभुद्वयसंयोगस्यानङ्गीकारादितिभावः। गगनासंयुक्तपृथिव्युत्पत्तौ पृथिवीत्वादीत्यत्रगगनसंयुक्तमात्रवृत्तिधर्म्मोपग्रहायादीत्युक्तमिति।

दीधितौकिमपिव्यापकन्नस्यादिति,। अथात्रमहाकालत्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वाभावः कालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकआपाद्यते। आपादकश्च महाकालवृत्तिभेदप्रतियोगितावच्छेदकाधिकरणतानिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तावच्छेदकत्वम्महाकालवृत्तिभेदीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्प्रतियोगितानवच्छेदकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकत्वम्वा सचनसम्भवति आपाद्याप्रसिद्धेः। नचस्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताकमहाकालत्वाभावआपाद्यः उक्तसम्बन्धस्यतत्क्रियात्वादेःप्रसिद्धत्वेनतेनमहाकालत्वाभावोनाप्रसिद्धइतिवाच्यमिष्टापत्तेः। नचप्रतियोगिवैयधिकरण्यपदार्थत्वेनप्रवेशेनेष्टापत्तिरितिवाच्यं तथापीदानीम्प्रतियोगिवैयधिकरण्यान्तरस्याज्ञायमानतया पाद्यव्यतिरेकनिष्ठस्यासम्भवेना पत्तिकारणस्याभावादिति चेन्न व्यापकत्वशब्दार्थतामपक्षीकृत्य साध्यतावच्छेदकसम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वादिरूपप्रातियोगिवैय-

धिकरण्यघटितवृत्तित्वेनापादके नोक्तनिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावद्वृत्यवृत्तित्वमेवह्यापाद्यते घटादिसाध्यकमहाकालत्वादेःसद्धेतुत्वनिश्चयादेव घटादौमहाकालत्वव्यापकत्वस्यनिश्चयेनापाद्यव्यतिरेकनिश्चयसम्भवात् । उत्तरग्रन्थेनप्रतियोगिवैयधिकरण्यान्तरस्यव्यापकत्वघटकस्यप्रतिपादनेनापादकासत्वप्रतिपादनमेवकरिष्यतइति । यद्वामहाकालत्वलिङ्गकघटादिविधेयकानुमितिर्यदि निरूप्यनिरूपकभावापन्नविषयताकमहाकालत्वसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकघटत्वावच्छिन्नसमानाधिकरणमहाकालत्ववानयमितिपरामर्षजन्यास्या दभ्रान्तपुरुषवृत्तिर्नस्यादित्यापादनेतात्पर्यं । उत्तरग्रन्थेप्रतियोगिवैयधिकरण्यान्तरप्रतिपादनेन तद्घटितव्यापकताज्ञानस्यकारणत्वप्रतिपादनापादकासत्वसूचनेनापत्तिर्निराकरिष्यतइति । केचित्तु विधेयतावच्छेदकत्वस्यव्यापकतावच्छेदकत्वनियतत्वेन तदभावप्रतिपादनेनोक्तनिरूपकतानवच्छेदककालिकसम्बन्धावच्छिन्नाव्याप्यवृत्तितावच्छेदकघटत्वेमहाकालत्वलिङ्गकप्रमानुमितीयकालिकसम्बन्धावच्छिन्नविधेयतावच्छेदकत्वाभावएवोक्तानुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकव्यापकत्वविषयतानिरूपितविषयत्वस्यप्रमीयविषयत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावेनापादकेनापाद्यते व्यापकतावच्छेदकत्वविषयताच निरूप्यनिरूपकभावापन्नाग्राह्येतिनाप्रसिद्धिः उत्तरग्रन्थेनकारणीभूतज्ञानस्यविषयसिद्धिद्वाराप्रमात्वप्रतिपादनेनापत्तिनिराकरिष्यतइतिवदन्ति ।

तदनधिकरणदेशेति, देशपदोपादाना दधिकरणत्वस्यावच्छेदको दैशिकसाक्षात्सम्बन्धोलभ्यते तेनदेशस्यकालिकेनाधिकरणत्वेपि नक्षति र्नवा देशपदवैयर्थ्यमिति ।

देशाप्रसिद्ध्यातदवच्छेदेनेति, वाच्यत्ववत्वंयतोनाकिञ्चिन्निष्ठाधिकरणतानिरूपकतानवच्छेदक मतोनमहाकालनिष्ठाभावप्रतियोगितावच्छेदकमितितात्पर्य्यार्थः तेनाप्रसिद्धस्यावच्छेदकत्वासम्भवेपि नक्षतिः ।

महाकालान्यत्वविशिष्टघटाभावेति, ननुघटवान्महाकालत्वादित्यत्राव्याप्तेरेवपूर्वमुक्ततया तत्स्थलएवाव्याप्तिवारणाशंकायुक्ता सा चासम्भाविनी उक्तप्रतियोगित्वे साध्यतावच्छेदकतदितराभया-

नवच्छिन्नत्वरूपविशेषणाविरहात् तस्यलक्षणघटकत्वेच तदवच्छेद-
दकत्वस्यैवसाध्यतावच्छेदकेसत्वादितिचेन्न कालोघटवान्महाका-
लत्वादित्यादावित्यत्रादिपदस्यप्रागुक्ततया महाकालान्यत्वविशिष्ट-
घटाद्यभावेत्यत्राप्यादिपदस्योक्ततयाच घटसाध्यकेमहाकालान्यत्व-
विशिष्टपटाभावं पटसाध्यकेमहाकालान्यत्वविशिष्टघटाभावञ्चादा-
याव्याप्तिवारणएवग्रन्थतात्पर्य्यात् । पृथिवीत्वव्याप्यघटत्वविशिष्ट-
साध्यके महाकालान्यत्वविशिष्टतेजस्त्वव्याप्यघटत्वविशिष्टाभाव-
मादायाव्याप्तिवारणेवाग्रन्थतात्पर्य्यादिति ।

सुलभइति, नचमहाकालान्यत्वविशिष्टघटस्य महाकालावृत्तित्व-
एवा भावःप्रतियोगिव्यधिकरण स्तस्यचतत्वे महाकालस्य जग-
दाधारत्वप्रवादव्याकोपइतिवाच्यम् विशिष्टस्यानतिरिक्ततया कालि-
केनविशेषणविशेष्योभयाधिकरणतयैवसर्वाधारत्वोपपत्तेरितिभावः ।

तथासतिकालमात्रवृत्तिधर्म्मस्येति, मात्रपदोपादानात् काल-
वृत्युभयावृत्तिधर्म्मस्यहेतुत्वं धर्म्मपदोपादानाच्च येनसम्बन्धेनतन्मा-
त्रवृत्तित्वं तेनैवसम्बन्धेनहेतुत्वञ्च लभ्यते तथाचकालवृत्युभयावृ-
त्तिधर्म्ममात्रस्यैवविशेषणताविशेषणस्वाश्रयनिरूपितविशेषणतया-
किमपिव्यापकन्नस्यादित्यर्थः तत्रधर्म्मस्यविशेषणताविशेषेणेत्युक्तौ
विशेषणतानिष्ठस्यप्रकृतहेत्वाश्रयनिरूपितत्वरूपस्य विशेषणस्यैवला-
भेन कालत्वाश्रयनिरूपितविशेषणतया घटादिसाध्यककालत्वादि-
हेतोरप्युद्देश्यतया तत्राव्याप्तिविरहेणन्यूनतास्यादितिकालमात्रवृत्ती-
ति । प्रकृतहेत्वाश्रयनिरूपितत्वपरिशेषस्यैवविवक्षितत्वे ऽष्टद्रव्याति-
रिक्तद्रव्यात्मककालमात्रवृत्तिधर्म्मस्यहेतुतायां महाकालनिरूपितवि-
शेषणत्वमेवलभ्यत इत्याशयेनविशेषणताविशेषपदेनमहाकालीय-
विशेषणतोक्ता । एवञ्चमहाकालीयविशेषणतयाऽव्याप्यवृत्तिकिमपि-
व्यापकन्नस्यादिति कथन्नोक्तमित्याशङ्काप्यपास्ता, महाकालीयविशे-
षणतात्वेनशब्दानुपादेयत्वेनयथाश्रुतेवैयर्थ्याभावादित्याशयः ।

सन्दर्भविरोधापत्तेरिति, तथाचाविशेषरूपेणसंसर्गत्वानभ्युपगमा-
भिप्रायकत्वमनुसृत्य विशेषणतानिष्ठस्यकालिकत्वस्यैवविशेषपदार्थ-
तायावाच्यतया कालिकविशेषणतयासाध्यतायांनाव्याप्तिरितिभावः ।

अष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्म्मेत्यन्तं विशेषपद-
स्यमहाकालीयत्वरूपाविशेषेतात्पर्य्यग्राहकामितिनवैयर्थ्यसम्भवइतिय-

दिभूया त्तदाप्याह स्वरूपसम्बन्धेनेति।

पूर्वपक्षस्यैवेति, सम्बन्धधार्म्मिकोभयाभावघटितकल्पस्यैवेत्यर्थः।

स्वरसतइति, महाकलत्वावच्छिन्नविषयकत्वेनानुव्यवसीयमानतयेत्यर्थः।

पटध्वंसविशिष्टइ ति, इदानींपटध्वंसइतिप्रतीते स्तत्तत्क्रियाविशिष्टमहाकालेऽधिकरणत्वावगाहिन्याविशेषणेऽधिकरणत्वानवगाहित्वइत्यादिः।

एकव्यक्तिमात्रवृत्तिसाध्यकेऽप्यव्याप्तिंग्राहयितुमाह उभयत्वेनेति, यत्तु महानसीयत्वस्यमहानसवृत्तित्वरूपतया तदवच्छिन्नप्रतियोगितायां साध्यतावच्छेदकताघटकसम्बन्धानवच्छिन्न.वच्छेदकत्वानिरूपितत्वविरहेण लक्षणाघटकत्वादाह वह्निघटोभयत्वेनेति, नचोभयत्वमपिपर्य्याप्तिसम्बन्धेनैवावच्छेदक मितितदवच्छिन्नाभावोनलक्षणघटकइतिवाच्यं धर्म्मत्रयस्यावच्छेदकत्वस्थले समवायेनोभयत्वस्यावच्छेदकत्वेपि क्षत्यभावादिति तत्तुच्छं महानससंयोगविशिष्टवह्न्यभावस्यापिमहानसीयवह्न्यभावत्वेनतदवारणादिति।

यत्रसमवायेनघटत्वादिविशिष्टस्येति; इदञ्चाकिमपिव्यापकन्नस्यादित्यत्र किंशब्दस्य समवायादिसम्बन्धेनधर्म्मविशिष्टार्थतामभ्युपेत्य तेनस्वरूपसम्बन्धेनाकिञ्चिद्विशिष्टसाध्यकस्थलेऽव्याप्त्यभावेपिनक्षतिः॥

स्वरूपसमवायाभ्यामेवतथात्वादिति; अथमहाकालान्यत्वाविशिष्टघटत्वावच्छिन्नानिरूपकताया अपि साध्यतावच्छेदकताघटकसमवायसम्बन्धावच्छिन्नघटत्वानिष्ठावच्छेदकताकतयाकथन्तद्वारणमितिचे दत्रकोचि द्वह्नित्वनिष्ठावच्छेदकतानिरूपितासती महानसीयत्वनिष्ठावच्छेदकताकनिरूपकताया वह्न्यभावप्रतियोगितावच्छेदकावच्छिन्नतया तद्वारणाय साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वानिष्ठावच्छेदकतानिरूपितासती प्रतियोगितावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपिता या वच्छेदकता तद्भिन्ननिरूपकत्वानिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपितत्वेन भेदः प्रतियोगितानिरूपितनिरूपकत्वानिष्ठावच्छेदकताया उपादेयतया महाकालान्यत्वनिष्ठावच्छेदकताया अधिकावच्छेदकत्वेन' तादृशानिरूपकताकाधिकरणतावच्छेदस्य लक्षणाघटकत्वात्।

न्वनिरूपकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकताप्रतियोगितावच्छे-
दकताघटकसम्बन्धावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदक-
ताभिन्नत्वेनाप्युपादेया तथाचमहाकालान्यत्वनिष्ठावच्छेदकतानि-
ष्ठावच्छेदकतायाउक्तभेदवत्वविरहेणमहाकालान्यत्वविशिष्टघटत्वाव-
च्छिन्ननिरूपकताकाधिकरणतावच्छेदस्यलक्षणघटकत्वसम्भवः ॥
यद्वा साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिष्ठावच्छेदक-
तानिरूपितावच्छेदकतानिरूपितत्वं स्वातन्त्र्येणैवनिरूपकत्वनिष्ठा-
वच्छेदकताविशेषणत्वेनोपदेय न्नतु प्रतियोगितावच्छेदकतानिष्ठाव-
च्छेदकतायां भेदप्रतियोगित्वेनोपात्ताया मितिमहाकालान्यत्ववि-
शिष्टघटत्वावच्छिन्ननिरूपकताकाधिकरणतावच्छेदस्य लक्षणघटक-
त्वसम्भवइति वाच्यम्। कालिकेनरूपत्वविशिष्टसाध्यकपृथिवीत्वे
विषयितयारूपत्वविशिष्टाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपक-
तायाः कालिकसम्बन्धावच्छिन्नरूपत्वनिष्ठावच्छेदकतानिरूपितविष-
यित्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपिताया हेत्वधिकरणवृत्त्युक्त-
भेदप्रतियोगितावच्छेदकत्वेनाव्याप्तेः। अथ प्रतियोगितावच्छेदकता-
त्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकतायां सा-
ध्यतावच्छेदकताविशिष्टान्यसाध्यतावच्छेदकनिष्ठावच्छेदकत्वानि-
रूपितत्वं विशेषणम्वाच्य मन्यथा घटान्यत्वविशिष्टवाच्यत्वसा-
ध्यकद्रव्यत्वे साध्याभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतात्व-
स्य सामानाधिकरण्यसम्बन्धावच्छिन्नवाच्यत्वत्वनिष्ठावच्छेदकता-
निरूपितस्वरूपसम्बन्धावच्छिन्नघटान्यत्वनिष्ठावच्छेदकतानिरूपितनि-
रूपकतायामपिसत्वेन तादृशनिरूपकताकाधिकरणतावच्छेदस्य हे-
त्वधिकरणेसत्वायोगादतिव्याप्त्यापत्तेः। नचोक्तरूपवृत्तित्वनिष्ठाव-
च्छेदकतानिरूपितासती साध्यतावच्छेदकताघटकसम्बन्धावच्छि-
न्नावच्छेदकताकत्वनिष्ठावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेद-
कताभिन्नावच्छेदकत्वानिरूपिताधिकरणत्वनिष्ठावच्छेदकताभिन्नाव
च्छेदकत्वानिरूपितप्रतियोगिताकत्वेनैव भेद उपादेयः।
तथाचोक्तरूपवृत्तिसामानाधिकरण्यसम्बन्धावच्छिन्नघटभेदनिष्ठाव-
च्छेदकतानिरूपितस्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वनिष्ठावच्छेदक-
तानिरूपितनिरूपकताकाधिकरणतावच्छेदस्याप्युक्तभेदत्वावच्छिन्न-
तयाहेत्वधिकरणवृत्तित्वान्नातिव्याप्तिरिति वाच्यम्। स्वरूपेणघट-

भेदविशिष्टत्वेसति सामानाधिकरण्यसम्बन्धेनावाच्यत्वत्वविशिष्ट-साध्यकद्रव्येत्वेसद्धेतौ साध्याभावप्रतियोगितावच्छेदकगतरूपवृत्तिसामानाधिकरण्यसम्बन्धावच्छिन्नघटभेदनिष्ठावच्छेदकतानिरूपितस्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वनिष्ठावच्छेदकताकनिरूपकताकाधिकरणतावच्छेदस्यहेत्वधिकरणेसत्वेनाव्याप्त्यापत्तेः। एवञ्च कालिकेनरूपत्वविशिष्टसाध्यकसद्धेतौ कालिकसम्बन्धावच्छिन्नरूपत्वनिष्ठावच्छेदकतानिरूपितविषयित्वसम्बन्धावच्छिन्नरूपत्वनिष्ठावच्छेदकतानिरूपितनिरूपकतायाः साध्यतावच्छेदकताविशिष्टान्यविषयित्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितत्वेनाताद्दशतयाऽव्याप्तिविरहेण साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वंनिरूपकतावच्छेदकताया-न्निरूपकतायाम्वा ननिवेश्यम् तथाच घटवान् महाकालत्वादित्यत्र-नाव्याप्तिसम्भवः। यत्तु समवायेनवह्नित्वविशिष्टत्वेसति कालिकेन-वह्नित्वविशिष्टस्य प्रकारितया साध्यतायां समवायेन वह्नित्वविशिष्टविषयकज्ञानत्वे व्यभिचारिणि समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकनिरूपकत्वमादायातिव्याप्तिवारणायो क्तरूपवृत्तित्वमेवावश्यन्निवेशनीयमेव नतु भेदप्रतियोग्यवच्छेदकतायां विशेषणत्वेन प्रागुक्तं साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितत्वपीति तन्न उक्तातिव्याप्तिवारणायताद्दशरूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकसंसर्गताकत्वमात्रस्योपादेयत्वा न्नचकालिकसम्बन्धावच्छिन्नावच्छेदकताकसमवायसम्बन्धावच्छिन्नावच्छेदकताकनिरूपकतावच्छेदकतायाअपिनोक्तसंसर्गताकत्वसम्भव इति वाच्यं ताद्दशरूपवृत्तित्वस्यावच्छेदकतायांमेव-विशेषणत्वात् वृत्तित्वञ्च स्वनिरूपितसंसर्गतावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनेति चेन्न साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वस्य निरूपकत्वविशेषणत्वाननुसन्धानेनैव समवायेनघटत्वविशिष्टसाध्यकमहाकालत्वेऽव्याप्त्यभिधानात् तथासति समवायेनवह्नित्वविशिष्टस्य प्रकारितया साध्यतायां समवायेनवह्नित्वविशिष्टत्वेसति कालिकेनवह्नित्वविशिष्टविषयकज्ञानत्वहेतौ साध्याभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतात्वस्य कालिकसम्बन्धावच्छिन्न-

समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकनिरूपकतायामपि-सत्त्वेना तिव्याप्तिवारणाय साध्यतावच्छेदकताकसंसर्गताव—च्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वस्यवि—वक्षणीयत्वात् वृत्तित्वञ्च व्यासज्यवृत्त्यवच्छेदकतापक्षे स्व-निरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदक-त्वसम्बन्धावच्छिन्नमवच्छेदकत्वनिष्ठ मितरथा स्वावच्छेदकताघ-टकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्ब-न्धावच्छिन्न न्निरूपकत्वनिष्ठमेवबोध्यम्। यत्तु समवायेनवह्नित्ववि-शिष्टसाध्यके तत्तद्व्यक्त्यनुयोगिकसमवायेन वह्नित्वविशिष्टविषयक-ज्ञानत्वहेतौ तद्व्यक्त्यनुयोगिकसमवायेनवह्नित्वविशिष्टनिरूपकत्वमादा-यातिव्याप्तिवारणाय रूपवृत्तित्वन्निवेशनीयमिति तन्न एतत्कल्पेवि-शेषरूपेणसंसर्गत्वास्वीकारा दन्यथा वह्नित्वप्रतियोगिकसमवायेन-वह्नित्वविशिष्टसाध्यकसद्धेतौ प्रतियोगिव्यधिकरणाभावाप्रसिद्धे र-व्याप्त्यापत्तेः। नचैवं घटान्यत्वविशिष्टवाच्यत्वसाध्यकेप्रागुक्ताति-व्याप्तेः कागतिरितिवाच्यं प्रतियोगिताविशिष्टनिरूपकत्वस्यैवप्रति-योगितावच्छेदकगतरूपवृत्तित्वम्विहायविवक्षितत्वात् वैशिष्ट्यञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्व स्ववृ-त्तित्वोभयसम्बन्धेन वृत्तित्वञ्च स्वनिरूपितावच्छेदकताविशिष्टान्या-वच्छेदकत्वानिरूपितत्वोभयसम्बन्धेन वैशिष्ट्यञ्चोभयत्र स्ववृत्ति-त्वविकलचतुष्टयसम्बन्धेन तत्रचकालिकेनरूपत्वविशिष्टसाध्यके वि-षयितयारूपत्वेविशिष्टत्वेसति कालिकेनरूपत्वविशिष्टाभावमादायाव्या-प्तिवारणाय साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकतात्वावच्छि-न्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वम्विवक्षणीयम्। एतेन म-हाकालान्यत्वविशिष्टघटत्वावच्छिन्ननिरूपकतायां समवायेनवह्नित्व-विशिष्टस्य विषयितयासाध्यतायांसद्धेतौ तद्व्यक्त्यनुयोगिकसमवा-येनवह्नित्वविशिष्टाभावमादायाव्याप्तिवारणाय विवक्षितस्यरूपवृत्ति-त्वस्यसम्पत्तये स्वनिरूपितसाध्यतावच्छेदकताघटकसम्बन्धाव-च्छिन्नावच्छेदकतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्य-नुयोगितावच्छेदकत्वसम्बन्धेनैवतद्वाच्यं निरूपकतावच्छेदकताया-मेववातद्विशेषणम्। घटकञ्चसाध्यतावच्छेदकताघटकसम्बन्धाव-च्छिन्नत्वन्नपर्य्याप्तिगर्भमितिनिरस्त मुक्तदोषतादवस्थ्यात् विशेषरूपे-

णसंसर्गत्वानभ्युपगमात् । ऽयासज्यवृत्त्यवच्छेदकत्वपक्षे महाकाला-
न्यत्वघटत्वोभयवृत्त्येकावच्छेदकतायाः सम्बन्धद्वयावच्छिन्नतया नि-
रूपकत्वेरूपवृत्तित्वासम्भवाच्च साध्यतानिरूपितावच्छेदकताविशि-
ष्टान्यावच्छेदकत्वानिरूपितत्वस्यैवविशेषणत्वेच कालिकेनघटत्ववि-
शिष्टसाध्यकमहाकालत्वेऽव्याप्तिर्बोध्या तत्रतादृशप्रतियोगितावच्छे-
दकावच्छिन्ननिरूपकतात्वस्य कालिकसम्बन्धावच्छिन्नमहाकाला-
न्यत्वनिष्ठावच्छेदकतानिरूपितकालिकसम्बन्धावच्छिन्नघटत्वनिष्ठा-
वच्छेदकतानिरूपितनिरूपकत्वेऽपिसत्वेन तादृशानिरूपकताकाधिक-
रणतावच्छेदस्य हेत्वधिकरणेविरहादिति ॥ इदन्तुचिन्तनीयम् महा-
कालान्यत्वविशिष्टघटाभावस्यलक्षणघटकत्वसंपत्त्यर्थमत्र प्रतियोगि-
तावच्छेदकावच्छिन्नत्वंप्रतियोगितावच्छेदकताघटकसम्बन्धेनवाच्यं
प्रतियोगितावच्छेदकतायाः पारिभाषिकंसाध्यतावच्छेदकताघटक-
सम्बन्धावच्छिन्नत्वंच निवेशनीयं नचसाध्यतावच्छेदकताघटकस-
म्बन्धावच्छिन्नत्व मपारिभाषिकं निरूपकतावच्छेदकतायामेवनिवे-
शनीयं लाघवादितिवाच्यं फलमुखगौरवस्यादोषत्वात् विशेषरूपे-
णसंसर्गत्वास्वीकारे पारिभाषिकतन्निवेशप्रयोजनाभावाच्च अतए-
वानुपदमेवाविशिष्टसाध्यकेऽपिकालोघटवान् महाकालत्वादित्यत्रा-
व्याप्तिवारणार्थमेव गुरुभूतस्यप्रतियोगितावच्छेदकाविशिष्टाधिकर-
णत्वस्य प्रतियोगिवैयधिकरण्यघटकतयानिवेशनंवक्ष्यति नचसाध्य-
तावच्छेदकताघटकसम्बन्धेनप्रतियोगितावच्छेदकावच्छिन्नत्वघटित-
कल्पाभिप्रायेणैवाव्याप्त्यनुधावनमितिवाच्यं तथापिप्रतियोगिताव-
च्छेदकताघटकसम्बन्धेनप्रतियोगितावच्छेदकावाच्छिन्नत्वाविवक्ष-
याऽव्याप्तिवारणसम्भवेप्रयासान्तरस्यसन्दर्भविरोधास्कन्दितत्वापत्ते-
रित्यलम् ॥

विशिष्टनिरूपितसमवायानभ्युपगमादिति, तादृशप्रतियोगिताव-
च्छेदकताघटकतयेत्यादिः तथाचमहाकालान्यत्वविशिष्टपटाद्यभाव-
प्रतियोगितावच्छेदकंयदि सामानाधिकरण्यघटितसामानाधिकरण्य-
सम्बन्धेनमहाकालान्यत्वविशिष्टपटत्वंस्या त्स्यादेवसमवायः प्रतियो-
गितावच्छेदकताघटकः सचाविशिष्टनिरूपितएव विशिष्टस्यप्रतियो-
गितावच्छेदकत्वात् संसर्गताचतस्य विशिष्टनिरूपितसमवायत्वेन
समवायत्वमात्रेणवेत्यन्यदेतत् परन्तु विशिष्टस्यप्रतियोगितावच्छे-

दकत्वमेवनस्वीक्रियते गौरवात् तदनुपस्थितावच्यभावप्रत्य-याच्च। तथासतिनकेवलस्समवायः प्रतियोगितावच्छेदकताघट-कः स्वरूपस्यसमवायस्यचतथात्वादित्याशयः। ऋजवस्तु विशिष्ट-स्यप्रतियोगितावच्छेदकत्वे तन्निरूपितसमवायएवप्रतियोगितावच्छे-दकताघटकस्संसर्ग स्सचनस्वीक्रियते इतिमहाकालान्यत्वविशिष्ट-पटत्ववदभावमादायनप्रसिद्धिसम्भवइतिवदन्ति तन्न सिद्धान्तभूतो-भयाभावघटितकल्पेविशिष्टप्रतियोगिकसमवायाभ्युपगमस्यप्रतियमा-नत्वात् तादृशाभावपदेनमहाकालान्यत्वविशिष्टपटत्ववदभावस्यवि-वक्षितत्व अतइत्यस्यानन्वयापत्तेश्च अनभ्युपगमादित्यस्यैवप्रसिद्धि-सम्भवे हेतुत्वसम्भवा त्पूर्वव्याख्यानेऽनभ्युदगमादित्यन्तस्य स्वरू-पसमवायाभ्यामेवे त्यत्रहेतुत्वा दतइत्यस्योपसंहारार्थत्वा च्चासंग-तिरिति॥०॥

गौरवस्याकिञ्चित्करत्वादिति, नचाविशिष्टसाध्यके प्रतियोगि-तावच्छेदकावच्छिन्नवैयधिकरण्यप्रवेशे घटवृत्तित्वोपलक्षितसत्ता-साध्यकसद्धेतौ विशिष्टाभावमादायाव्याप्तिर्दोषइतिवाच्यं पृथिवी-समवेतत्वासमनियतस्यापीत्याद्यवच्छेदकत्वनिरुक्तिग्रन्थव्याख्याना-वसरेप्रसंगात्तद्वारणस्यवक्ष्यमाणत्वादिति॥०॥०॥

संयोगसामान्यस्यचेतीति, नचसत्त्वाधिकरणनित्यगुणेसंयोग-स्यवृत्तिनियामकेनसम्बन्धेनसत्वायोगात् कथमतिव्याप्तिरितिवाच्य मेकार्थसमवायेनतत्रापिसत्वा देकार्थसमवायस्यवृत्तिनियामकतायाः प्रागेवाङ्गीकृतत्वात्। यत्तु नित्यान्यत्वविशिष्टसत्व आदिपदग्राह्येति-व्याप्तौतात्पर्य्यात्तत्रकालिकेनसर्वत्रैवहेत्वधिकरणेसंयोगस्यसत्वादिति तन्न तथासति ज्ञानसाध्यकेऽपितथातिव्याप्तेस्संभवेन तत्परित्याग-स्यानौचित्यात् यदिचाव्याप्यवृत्तिसाध्यकेषु संयोगसाध्यकस्यप्रसि-द्धत्वेन तत्रातिव्याप्तेस्संभविन्या अनुपादानेन्यूनतास्यादितितदुक्त-रीतिर्विभाव्यते तदैतस्यैवावतरणत्वेनप्रतिपादयितुमुचितत्वादिति॥

खण्डनादिति, द्वित्वावच्छिन्नप्रतियोगित्वस्यव्यासज्यवृत्तित्वाद्वे त्यपिद्रष्टव्यम नचपूर्वंविशिष्टसाध्यकस्थलातिव्याप्तिपरिभवंमनसिनि-धायविशिष्टसाध्यकस्थलोत्तरमुभयसाध्यकस्थलोत्कीर्तन मिदानी-न्तदूविपरीतमितिसंदर्भविरोधइतिवाच्यं शिष्यबुद्धिवैशद्यायमतभेदे-नतथोक्तेरदुष्टत्वादिति यद्वाद्वाचार्येणद्वन्द्वस्थलेऽल्पाचः पूर्वं निपा-

तन्नियमेनोभयसाध्यकस्थलातिव्याप्तौ प्राधान्यसत्त्वेऽप्युत्तराभिधानस्याशक्यत्वादुपेक्षणमित्युक्तम् तत्संदर्भसौष्ठवातिलोभादितिवेदितव्यम् तत्रासमासेनसंदर्भशुद्ध्यर्थमुभयसाध्यकस्थलस्यपश्चादुक्तेरेवन्याय्यत्वमस्वरसोऽभिमतस्तत्कालङ्कारस्येति ध्येयम् ॥ ० ॥

विशिष्टधर्म्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वेऽति, तथा च विशिष्टसत्वसत्वयोरनतिरिक्तत्वेन गुणनिरूपिताधेयत्वस्य सत्तात्वावच्छेदेनतत्रसत्वेऽपि गुणनिरूपिताधेयत्वस्य विशिष्टसत्तात्वावच्छिन्नाधेयत्वातिरिक्ततया नवच्छेदकविशिष्टसत्तात्त्वावच्छेदेन तदभावस्तत्रवर्ततएव तयोरतिक्तत्वे मानञ्च सत्वंगुणवृत्तिनविशिष्टसत्वमितिप्रतीतिरिति प्रतियोगितावच्छेदकीभूतधर्म्मावच्छेदेनस्वप्रतियोगित्वसमानाधिकरणाभावाप्रतियोगियत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तित्वाभावकत्वरूपानुपदोक्तप्रतियोगिवैयधिकरण्यपर्यवसितार्थघटितलक्षणेनातिव्याप्तिसंभवो नवाग्रन्थासङ्गतिरित्याशयः। नचप्रतियोगितावच्छेदकावच्छेदेनेत्यनुक्तौ सत्तावान् जातेरित्यत्रविशिष्टसत्तात्वावच्छेदनसत्ताभावप्रतियोगिनिगुणवृत्तित्वाभावसत्वेनतस्यलक्षणघटकत्वाव्याप्तिसम्भवेतत्परित्यागोनोचितइति वाच्यम्, स्वप्रतियोगिवृत्तित्वस्यनिरवच्छिन्नविशेषणतयाविवक्षायांफलाभावेनव्यापकत्वासंभवात् भेदगर्भव्यापकतायाआदरेऽव्याप्तिपरिहारायवृत्तिभिन्नत्वस्यैव व्याप्यतयाविवक्षितत्वादिति। केचित्तुविशिष्टधर्म्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वोक्त्या स्वप्रतियोगितावच्छेदकावच्छिन्नवृत्तित्वसामान्ये हेत्वधिकरणयत्किञ्चिद्व्यक्तिनिरूपितत्वाभावस्य लक्षणघटकत्वमभिमतमितिवदन्ति, तदसत् जात्यादिसाध्यकातिव्याप्तेर्वक्ष्यमाणाया अलग्नकत्वापत्तेः। यत्तु यत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तित्वसामान्यं स्वप्रतियोगितावच्छेदकानवच्छिन्नमिति तद्यथाश्रुतानतुगुणं तत्रसामान्यपदस्य प्रतियोगिनासम्बन्धाव्याख्यानेतु रमणीयमेवेति ॥ ० ॥

विशिष्टनिरूपितेति, 'विशिष्टधर्म्मावच्छिन्नेत्यर्थः, गुणेविशिष्टसत्वन्नेतिप्रतीतेः गुणेऽसमवायित्व भ्रमकालोत्पन्नायाः विशिष्टसत्वाभावविषयकत्वावश्यकत्वे भ्रमविगमदशायामपि तदभावविषयकत्वस्यैवयुक्तत्वा द्विशिष्टसत्वन्नगुणवृत्तीत्यत्रापिहि विशिष्टसत्तात्वावच्छेदेनगुणनिरूपितवृत्तित्वाभावस्याविषयत्वा द्विशेष्यवृत्तित्वेविशिष्टावृ-

तित्वस्य गुणवृत्तित्वेऽसम्भवाद् गुणवृत्तित्वन्नविशिष्टसत्त्वावृत्तीतिप्र-
त्ययविरहा स्नचकपिसंयोगोवृक्षावृत्तिरितिप्रत्ययाविरहेऽपि प्रतियो-
ग्यनवच्छेदकदेशावच्छेदेनयथातदभाव स्तथाप्रकृतेऽप्यास्त्विति-
वाच्यम् विशिष्टसत्तात्वस्यान्यूनानतिप्रसक्ततया सत्तात्ववदवच्छे-
दकत्वेनानवच्छेदकत्वविरहा स्नचाविशिष्टसत्वन्नगुणवृत्तीत्यस्यका-
गतिरिति वाच्य मस्वीकारस्यैवगतित्वा स्नअर्थात्यन्ताभावस्यगुण-
वृत्तिनासहाभेदान्वयस्य वा व्युत्पत्तिवैचित्र्येणाङ्गीकारात् प्रत्यक्षादा-
वनियन्त्रितविषयताकेस्वतरामेव सम्भवात्।

समवायेन कोऽपिनजातिवृत्तिरितिप्रतीत्यनुरोधेनोक्तविषयकत्व-
रीतेरङ्गीकरणीयत्वात्। विशिष्टसत्वंयदिगुणवृत्तिस्याद् गुणवृत्ति-
सत्वभिन्नं स्यादिति सत्वाभेदेनगुणवृत्तित्वस्यैवप्रत्युतासिद्धेः
विशिष्टसत्तावान्जातेरित्यत्रातिव्याप्तिरितिभावः विशेष्यवृत्तेर्विशि-
ष्टानुयोगिकाभावमनभ्युपेत्यविशिष्टधर्म्मावच्छिन्नाधेयत्वस्यातिरि-
क्तत्वमभ्युपेत्यचो क्तप्रतीतेर्विशिष्टसतात्वानवच्छिन्नगुणवृत्तित्ववि-
षयकत्वेनोपपत्तिंविधाय विशिष्टस्यानतिरिक्तत्वादितिग्रन्थो यद्व-
द्धाचार्य्येणऋजुमार्गेणव्याख्यात स्तदनेनविशेष्यवृत्तेर्विशिष्टानुयोगि-
काभावानभ्युपगमस्यायुक्तिकस्याङ्गीकारानर्हत्वमालोवाच्य तर्का-
लंकारेणतत्परित्यक्त स्तत्रयुक्त्यनुसरणे विशिष्टधर्म्मावच्छिन्नाधे-
यत्वस्यानतिरिक्ततायामेवपर्यवसानमितिगृहाण ॥ ० ॥

अतिरिक्तत्वोपगमइति,। इदमुपलण मनतिरिक्तत्वेऽपि हेत्वधि-
करणयत्किञ्चिद्व्यक्तिनिष्ठाधिकरणत्वसामान्यउभयाभावविवक्षाया-
न्दोषाभावइति। अथयत्किञ्चिद्धेत्वधिकरणनिरूपितसामान्यइत्येवो-
च्यतामलंवृत्तितात्वनिवेशनेनेतिचेन्न संयोगेनघटसाध्यकसंयोगस-
म्बन्धावच्छिन्नघटाभावत्वहेतुकव्यभिचारिण्यतिव्याप्ते घटाभाव-
निरूपितप्रतियोगित्वे घटाभावप्रतियोगितावच्छेदकावच्छिन्नत्व सं-
योगसम्बन्धावच्छिन्नत्वयोस्सत्वा स्नचावच्छिन्नत्वस्याविलक्षणत्वेन
वृत्तितानिष्ठस्यैवप्रवेश्यतयाप्रतियोगित्वेतदभावोक्षतएवेतिवाच्यं प्र-
तियोगित्वाधेयत्वादेः प्रतियोग्याधेयस्वरूपत्वे ऽवच्छेदकरूपत्वेवा-
घटत्वावच्छिन्नप्रतियोगित्वाधेयत्वयोरैक्येना धेयतानिष्ठयोरपितयो-
र्नाभावः प्रतियोगित्वइत्यतिव्याप्ते राधेयतात्वोपादानेचा धेयतात्वा-
वच्छिन्ननिरूप्यतायाएवनिविष्टत्वेन प्रतियोगित्वेतादृशहान्यातिव्या-

प्तिरिति ॥ ० ॥

ननु वृत्त्यनियामकसम्बन्धेनसाध्यतायांसद्धेतौ हेत्वधिकरणनिरूपितवृत्तित्वसामान्ये साध्याभावप्रतियोगितावच्छेदकावच्छिन्नत्व साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वयोरभावसत्वेनाव्याप्तेरेतत्कल्पेसम्भवितया तदुपेक्षायानिर्बीजत्वापत्ति र्यदिचसम्बन्धित्वन्निवेश्यते तदाप्रतियोगितावच्छेदकावच्छिन्नयत्किञ्चिद्धेत्वधिकरणनिरूपितसम्बन्धित्वसामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाभावस्यैवास्तुलक्षणत्वमिति चेन्न विभिन्नकालीनयोः स्ववृत्तिवाच्यत्वादिनामपिसम्बन्धत्वाभावे तद्घटवा न्तत्क्रियात्वादित्यत्रातिव्याप्तेः तेषांतत्सम्बन्धत्वे त्वेतस्यलक्षणान्तरत्वमेवावसेयमिति ॥

नचोभयाभावमुपेक्ष्यविशिष्टाभाववचनमेवोचितमितिवाच्यं व्यधिकरणसम्बन्धेनंव्यापकत्वापत्ते रुभयोरेकत्राधेयत्वेविरहेण वैशिष्ट्यासम्भवेन साध्याभावस्यलक्षणाघटकत्वात् वह्नीयसंयोगेनसाध्यतायां प्रतियोगितावच्छेकावच्छिन्नत्व साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वयोरेकत्राधेयत्वेविरहेण वैशिष्ट्याप्रसिद्ध्याभावाप्रसिद्धेरव्याप्तेरिति ॥ ० ॥

अत्रसध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वसामान्ये हेत्वधिकरणयत्किंचिद्व्यक्तिनिरूपितत्व यादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वोभयाभावस्य यादृशाभावप्रतियोगितावच्छेदकावच्छिन्ननिरूपकत्वसामान्ये हेत्वधिकरणयत्किंचिन्निष्ठसम्बन्धितानिरूपितत्व साध्यतावच्छेदकसंम्बन्धावच्छिन्नत्वोभयाभावस्यच लक्षणान्तरत्वं बोध्यम् ॥ ० ॥

एवंहेत्वधिकरणयत्किंचिद्व्यक्तिनिरूपितवृतित्वनिरूपितवृत्तितानवच्छेदकत्वं यादृशप्रतियोगितावच्छेकावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयत्वे लक्षणान्तरघटकतयावगन्तव्यमिति॥०॥

नव्यास्तु साध्यतावच्छेदकसम्बन्धेनेत्यादि, अत्रहेत्वधिकरणत्वव्यापकाधिकरणतानिरूपकतावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताभिन्नत्वेन प्रतियोगितानिवेशःपर्यवसितः स्वावच्छेदकधर्म्मावच्छिन्नाधिकरणतावत्त्वसम्बन्धेन हेत्वधिकरणत्वव्यापकप्रतियोगिताभिन्नत्वेनवा संयोगादिसम्बन्धेन रूपादीनां पृथिवीत्वव्यापकत्ववारणायच तादृक्प्रतियोगितानवच्छेदके साध्यतावच्छेदकसम्बधावच्छिन्न-

सम्बन्धितावच्छेदकत्वं विशेषणंवाच्यं यद्यपिहेत्वधिकरणत्वसमाना-धिकरणावच्छेदकतानिरूपितवृत्तितात्वावच्छिन्नप्रतियोगिताकाभाव-वान्नेतिप्रतीतिसिद्धसामान्यभेदवत्त्वस्य यादृशप्रतियोगितावच्छेद-कावच्छिन्नाधिकरणत्वे निवेशो नकोऽपिदोष स्तथापिहेत्वधिकरण-त्वव्यापकत्वनिवेशापेक्षया नपर्यवसाने लाघवमितिबोध्यम् ॥

नचैवमिति, एवमित्यस्य यथाश्रुतार्थत्यागइत्यर्थः।

समवायेन घटाद्यभावोऽपिप्रतियोगिव्यधिकरण इति, नचैत लक्षणस्याभावाघटितत्वेयदमसंगत मितिवाच्य मेतस्योदक्षरत्ववार-णाय स्वप्रतियोगितावच्छेदकसम्बन्धेन यत्प्रतियोगितावच्छेदकाव-च्छिन्नाधिकरणंहेत्वधिकरणं तत्प्रतियोगितावच्छेदकसम्बन्धान्य सा-ध्यतावच्छेदकसम्बन्धेन तत्प्रतियोगितावच्छेदकसाध्यतावच्छे-दकावच्छिन्नसामानाधिकरण्ये तात्पर्यस्यवाच्यतया प्रतियोगिव्यधि-करणाभावघटितत्वेनासङ्गत्यभावात् प्रतियोगिवैयधिकरण्यकोटौ प्र-तियोगितावच्छेदकत्वेनसाध्यतावच्छेदकस्यानुपादानत्वेन तत्त्वरूप-प्रतियोगिव्यधिकरणाभावत्वस्य पटाद्यभावेसम्भवेन घटाभावोऽपीत्य-स्यनासङ्गतिः यत्पदन्तत्पदञ्चाभावपरंबोध्यम् यत्प्रतियोगित्वप्रवेशस्य-वैयर्थ्यंतुनाशंकनीयम् यथाश्रुतेऽपियद्धर्म्मावच्छिन्नानाधिकरणं हेत्व-धिकरणं तद्भिन्नत्वस्यलक्षणत्वसम्भवे धर्म्मस्याभावप्रतियोगितावच्छे-दकत्वेनोपादाने वैयर्थ्यशङ्कायादुर्निवारत्वात्। अनुगमस्त्वभावविशिष्टा-भाववदन्यसाध्यतावच्छेदकसम्बन्धधर्म्मावच्छिन्ननिरूपकताकाधिक-रणतावद्वृत्तित्वनिवेशेन वैशिष्ट्यञ्च स्वतादात्म्य स्वप्रतियोगिताव-च्छेदकावच्छिन्नत्व प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वोभयस-म्बन्धेन स्वविशिष्टनिरूपकताकाधिकरणतावदन्यहेत्वधिकरणवृत्ति-त्वोभयसम्बन्धेना भाववत्ताच स्वप्रतियोगितावच्छेदक सम्बन्धाव-च्छिन्नत्व स्वप्रतियोगितावच्छेदकधर्म्मावच्छिन्नत्वोभयसम्बन्धेन। य-द्वासम्बन्धवदन्यसाध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकाव-च्छिन्नसामानाधिकरण्यमनुगतव्याप्तिः सम्बन्धवत्ताच स्वतादा-त्म्य स्ववृत्त्यभावीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदक-त्वोभयसम्बन्धेन स्ववृत्तित्वञ्च हेत्वधिकरणवृत्तिभेदप्रतियोगिताव-च्छेदकतावच्छेदकस्वप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतावच्छे-दकत्वसम्बन्धेनेति। केचित्तुसम्पातायातंघटाभावःप्रतियोगिव्य-

धिकरणइतिवदन्ति । अन्येत्वेतल्लक्षणस्यनलक्षणान्तरत्व मपितु प्रतियोगिव्यधिकरणाभावघटितलक्षणस्यैवतात्पर्य्यार्थत्वमितिसूचयितु म्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणम्महाकालइतिवक्तव्ये घटाभावोऽपिप्रतियोगिव्यधिकरणइत्युक्तमितिप्राहुः । परेतुघटत्वावच्छिन्नानधिकरणम्महाकालइत्येवयुक्तः सचपाठः क्वचित्पुस्तकेऽस्त्यपीत्याहुः ॥

घटवृत्तित्वविशिष्टद्रव्यत्वेति, घटपदन्तद्घटपर न्तेनविशेषरूपेण संसर्गत्वाभ्युपगमेऽपिनाव्याप्त्यसम्भवः तद्घटवृत्तित्ववैशिष्ट्यमपि विशेषरूपेणससंर्गत्वाभ्युपगमएव सार्थकम् ॥ तादात्म्यस्यसंसर्गत्वे सम्बन्धित्वप्रवेशेच तद्वाधिवृत्तित्वविशिष्टप्रमेयवान्तद्वधित्वादित्यत्राव्याप्तिः तद्वाधिवृत्तिताच तादात्म्यसंयोगाद्यन्यतरसम्बन्धावच्छिन्ना साध्यतापि तदन्यतरैरेवबोध्या । इदञ्च तत्सम्बन्धावच्छिन्न वृत्तित्वविशिष्टस्य तेनैवसम्बन्धेनतत्रैवसत्वन्नान्येनतादात्म्यभिन्नेन नान्यत्रच विषयित्वादीनान्तुनसंसर्गत्वमितिमतेन तेनमहाकालानुयोगिककालिकादिना विषयित्वादिनाच साध्यानधिकरणत्वस्य हेत्वधिकरणेप्रसिद्धिमादाय नाव्याप्त्यसम्भवइति । वस्तुतोविशेषरूपेणसंसर्गतामनभ्युपेत्य विषयित्वादीनाञ्चसंसर्गतामङ्गीकृत्य पटत्वान्यप्रमेयवान्घटत्वादित्यादावेवाव्याप्तिर्दातुमुचितेतिबोध्यम् ॥ ० ॥

यद्यपिस्ववृत्तिवाच्यत्वादीनांसंसर्गत्वे संयोगादिनावह्न्यादिसाध्यकसद्धेतुमात्रेऽभावाप्रसिद्ध्याऽसम्भवएवसम्भवति तथापिसाध्यतावच्छदेकत्वोपादानेऽपि स्ववृत्तिवाच्यत्वादिसम्बन्धेनंसाध्यकसद्धेतौ दोषस्यदुरुद्धरतया तेषामिदानींसंसर्गत्वानभ्युपगमस्यैवयुक्तत्वा दसम्भवम्विहाय धूमवान्वह्नेरित्यादावतिव्याप्तीति, नचस्ववृत्तिवाच्यत्वादीनांसंसर्गत्वेऽपि तत्सम्बन्धसाध्यकस्थलस्य व्याप्यवृत्तिसाध्यकतया प्रतियोगिवैयधिकरण्यघटितलक्षणालक्ष्यत्वा न्नदोष इतिवाच्यं तथापितेषांसंसर्गत्वमनुपगम्यातिव्याप्तिरुक्तेत्युक्तेरसम्भवादिति ॥

इतितुफलितार्थइति, साध्यताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपविशिष्टावच्छिन्न सामान्य संसर्गतावच्छेदकभेदमात्रेणैव संसर्गताभेदे साध्यताघटकसंसर्ग-

ताविशिष्टसंसर्गतासामान्यवेतिविवक्षणीय न्तेनपर्वतीयसंयोगेनव- ह्निस्साध्यतायां धूमेऽव्यभिचारिणि कालिकसंयोगोभयसम्बन्धेनधू- मसाध्यकवन्हौचव्यभिचारिणि साध्यतानिरूपितसंसर्गतावच्छेदक- संयोगत्वावच्छिन्नत्वस्य महानसानुयोगिकसंयोगेकालिकेऽपिचस- त्वेन वह्न्यभावस्यलक्षणाघटकत्वेननातिव्याप्तिः ॥

प्रथमंसामान्यपदमिति, अत्रसाध्यतावच्छेदकसम्बन्धनिरूपितवृ- त्तितानवच्छेदकत्वमेवतादृशोभयत्वेविवक्षणीय म्नतुतादृशोभयाभावे साध्यतावच्छेदकसम्बन्धत्वव्यापकत्व ङ्गौरवादितितुचिन्त्यम् ॥

तथैवाव्याप्तिरतइति, नचसर्वत्रासम्भवसम्भवेऽव्याप्तिदानमनु- चितमितिवाच्यं विशिष्टधीनियामकस्यैवसंसर्गत्वे संयोगसम- वायदैशिककालिकदिक्कृताविशिषणतानामेवसंसर्गत्वेन तत्सम्ब- न्धावच्छिन्नवृत्तिताविशिष्टस्यतेनैवसत्वाभ्युपगमेनच सत्तावृत्तित्व- विशिष्टप्रमेयत्वसाध्यकसत्तात्वेऽव्याप्त्यभावात् । सत्वानुयोगिकत्व- स्यसाध्याभावप्रतियोगिकत्वस्यच स्वरूपमात्रएवसत्वेन तन्निष्ठत- दुभयाभावस्य स्वरूपेविरहात् । केचित्तुवह्निधूमोभयवान्धूमादि त्यत्राव्याप्तेर्नप्रसक्ति रुभयत्वावच्छिन्नप्रतियोगिकत्वस्य सम्बधनिष्ठ- स्याप्रसिद्धेरितिवदन्ति ।

वह्निधूमोभयसाध्यकसद्धेतावव्याप्त्यभावम्मनसिनिधायाह, स- द्धेतौनाव्याप्तिरिति-सद्धेतुत्वरूपलक्ष्यतावच्छेदकसामानाधिकरण्ये- न लक्षणासत्वमत्र नाव्याप्तिपदार्थ स्सद्धेतावित्यस्यानन्वयापत्ते रपितुलक्षणासत्व न्तत्रसद्धेतावित्यस्यावच्छेदकावच्छेदेनान्वयो ऽसतिबाधकेऽवच्छेदकावच्छेदेनान्वयस्यैवव्युत्पन्नत्वादित्यसम्भवप- रतैववोक्तग्रन्थस्येत्यपिकाश्चित् ॥

अभावान्तरेति, तद्धटाभावेत्यर्थः तद्धटप्रतियोगिकत्व तद्घटानु योगिकत्वयोस्तादात्म्यसम्बन्धेसत्वेन विशिष्टप्रसिद्धेरितिभावः ॥७॥

प्रकृताव्याप्तिवारणासंभवः स्यादिति, ॥ नचमहाकालाभावमा- दायैवाव्याप्तिवारणंसम्भवति महाकालप्रतियोगिकत्व महाकालानु योगिकत्वोभयोस्तादात्म्येसत्वेन तयोर्वैशिष्टचप्रसिद्धेरितिवाच्यं कालिक तादात्म्यान्यतरसम्बन्धेनसाध्यतास्थले ऽभावस्यतादृश स्याप्रसिद्धिरिति ।

सामान्याभावमपहायेति, ननूभयाभावापेक्षयायदिविशिष्टाभा-

वेलाघवंस्या त्स्याद्पितस्योपादेयत्वं मव्याप्त्याहेयत्वञ्च तदेवना-
स्ति सामानाधिकरण्यात्मकगुरुसम्बन्धस्यावच्छेदकताघटकत्वा त्प्र-
तियोगिकत्वस्यावच्छेदकत्वे नाधिकावच्छेदकत्वस्य द्वित्वेविरहा-
च्चेतिचेन्न अद्रव्येद्वित्वस्यापेक्षाबुद्धिविशेषविषयत्वरूपतया तस्या-
वच्छेदकत्वे वहुष्ववच्छेदकत्वप्रसङ्गेन गौरवा दवच्छेदकत्ववाहु-
ल्ये संसर्गतायाअपिवाहुल्येन सामानाधिकरण्यत्वावच्छिन्नैकगु-
रुसंसर्गताप्रवेशस्यगौरवसम्पादकत्वादिति ॥

द्वित्वस्यप्रतियोगितावच्छेदकतयाऽप्रवेशेनलाघवमनुसृत्याशङ्कते
नचेति, नचाभावलाघवमनुसृत्योक्तमितिवाच्यं सिद्धान्तेव्यापकस्व-
रूपाभावस्य पूर्वपक्षेव्यापकतारूपाभावस्य प्रतियोगितावच्छेदक-
कोटौ तादृशप्रतियोगिकत्वत्वस्यप्रवेशेनसाम्यादिति ॥

धूमवान्वन्हेरित्यादावतिव्याप्तिरिति,—ननु कालिकसंयोगाभ्यां
घटस्य तादात्म्येन च महाकालस्य साध्यतायाम्महाकालत्वे गगना-
दिप्रतियोगिकेसंयोगे तादात्म्येवा कालिकेनमहाकालवृत्तित्वसत्त्वेना
भावाप्रसिद्ध्याऽव्याप्तिसम्भवेऽति व्याप्त्यभिधानमनुचितमितिचेत्सत्य
मतिव्याप्तेःप्रकारान्तरेणावार्यत्वमालोच्याभिधान मव्याप्तिस्तु साध्य-
तावच्छेदकसम्बन्धस्य संसर्गतानियामकोयस्संसर्गः तदतिरिक्त-
सम्बन्धावच्छिन्नत्वस्य साध्यवन्निरूपितत्वोभयाभावस्य वृत्तित्वनिष्ठ-
स्य विवक्षयापिवारयितुं शक्यत इत्येतद्विशेषमालोच्यतदनभिधान-
मितिनसन्दर्भविरोधः। यद्वातिव्याप्तेस्साध्यतावच्छेदकावच्छिन्नप्रति-
योगिक साध्यतावच्छेदकसम्बन्धधर्म्मिकोभयाभावघटितकल्पेऽपि
सम्भवोऽव्याप्तेस्तुनेत्येतद्विशेषमालोच्यातिव्याप्त्यभिधाने न सन्दर्भ-
विरोध इति।

संसर्गतानियामकइति, ॥ साध्यतावच्छेदकसम्बन्धावच्छिन्नप्र-
कारतानिरूपितविशेष्यतासम्बन्धावच्छिन्नप्रमात्वावच्छिन्नकार्यतानि-
रूपितसाध्यतावच्छेदकसम्बन्धनिष्ठकारणतावच्छेदकइत्यर्थः। यद्वा-
साध्यतावच्छेदकसम्बन्धनिष्ठसंसर्गताप्रयोजकवृत्तितावच्छेदकइत्य-
र्थः। सचसमवायस्स्वरूपश्चेतिबोध्यम ॥

ननुपर्वतानुयोगिकस्वरूपाभावस्य स्वरूपेणसाध्यातायां पर्वतत्वे
साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गते पर्वतानुयोगिकसम्बन्धत्व-
वतिस्वरूपेसाध्याभावात्मकत्वेनतत्प्रतियोगितावच्छेदकीभूतधर्म्माव-

च्छिन्नप्रतियोगितानिरूपकेतदुभयस्यैवसत्त्वेन साध्याभावस्यलक्षणाघटकतया ऽभावान्तरमादायातिव्याप्तिः एवंप्रतियोगितायाश्चप्रतियोगिस्वरूपत्वे संयोगेनवह्निसाध्यके संयोगाभावत्वेऽव्यभिचारिणि वह्निप्रतियोगिकसम्बन्धत्ववातसंयोगे संयोगाभावनिष्ठानुयोगितानिरूपितत्वस्य सत्त्वेनाभावान्तरमादायातिव्याप्ति एनुयोगितायाअनुयोगिस्वरूपत्वे संयोगेनवह्निसाध्यकसंयोगनिरूपिताधेयतात्वेऽपिव्यभिचारिण्यतिव्याप्ति एतआहनिरुक्तप्रतियोगिकसम्बन्धत्वहेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकसम्बन्धत्वोभयेति।

यत्रैकसंयोगव्यक्त्येति,। यत्रोपर्यधोभावेनसंयुक्तौघटपटावुपर्यधोभावविनिमयेनान्योन्यमाधाराधेयभावम्भजेते तत्रोभयत्रैवोभयोर्विशिष्टबुद्धेश्चप्रमाणिकतया तस्यैकस्यापिसंयोगस्योभयानुयोगिकत्वमुभयप्रतियोगिकत्वञ्चाङ्गीकरणीयमिति तयोरेकस्यसंयोगेनसाध्यत्वे तदुभयान्यतरत्वेव्यभिचारिण्यतिव्याप्तिरत्रबोध्या न तूपर्यधोभावविरहेणसंयुक्ताङ्गुल्याद्युभयघटकैकसाध्यकतदुभयान्यतरत्वे तादृशसंयोगे प्रतिगित्वानुयोगित्वनिरूपकत्वाविरहा दाधाराधेयभावस्थलएवतत्त्वस्यभट्टाचार्यादिभिश्चप्रदर्शितत्वादितिभावः॥ अत्रयद्यपिसंयोगेनस्वस्यस्वास्मिन्विशिष्टबुद्ध्यनुत्पत्त्या स्वनिष्ठप्रतियोगित्व स्वनिष्ठानुयोगित्वयोःनिरूप्यनिरूपकभावासंभवात्साध्यतावच्छेदकसंसर्गतावच्छेदकधर्म्मावच्छिन्नसंसर्गताकानुयोगित्वेन यादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वहेत्वधिकरणयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावविवक्षणे संसर्गस्यैक्येऽपि संसर्गतायानिरूपकभेदेनाभिन्नत्वे संसर्गताधर्म्मिकोभयाभावविवक्षणेवानातिव्याप्ति एतथाप्यतएवेत्यादिग्रन्थासंगते एसाविवक्षानादृता।अतएवानुपदमेवाधिकरणताधर्म्मिकोभयाभावआशङ्क्यपरित्यक्तः। यदिचसमवायसम्बन्धसाध्यकेवक्ष्यमाणातिव्याप्तियथाश्रुताभिप्रायेण। तएवैतदस्वरसादुभयसाध्यकातिव्याप्तिम्वक्ष्यतीतियद्युच्यते तदाविवक्षणीयमेवतदिति॥

तादृशसम्बन्धेनघटादेर्व्याप्यवृत्तित्वेति, इदमत्रावधेयम्—यद्यपिनित्यज्ञानानुयोगिकविषयितयाघटादेर्व्याप्यवृत्तित्वमस्ति तथापिविषयितयाघटादेः प्रागुक्तपारिभाषिक व्याप्यवृत्तित्वन्नास्तीतिभवत्येवप्रतियोगिवैयधिकरण्यघटितलक्षणलक्ष्यत्वमिति नचैवमव्याप्तेः कागतिरितिवाच्यं स्वरूपसम्बन्धेनगगनादेर्वृत्तित्वपक्षे घटसाध्य-

कमहाकालत्वेहेतुकाव्याप्तिसमत्वेनेदानीमिष्टत्वात्—वारणीयत्वेतु स्वप्रतियोगितावच्छेदकसम्बन्धसामान्ये तादृशोभयाभाववत्वस्य प्रतियोगिताया स्पारिभाषिकसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य च विवक्षणीयत्वात् । तस्य च प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकसाध्यतावच्छेकावच्छिन्नसामानाधिकरण्यम्पर्यवसितार्थः वैशिष्ट्यञ्च स्वतादात्म्य स्वावच्छेदकसम्बन्धत्वव्यापकाभावप्रतियोगितानिरूपितपरम्परावच्छेदकत्वोभयसम्बन्धेन, तथाचपारिभाषिकसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्ववत्समवायादिसम्बन्धावच्छिन्नपटत्वावच्छिन्नप्रतियोगितैव प्रतियोगिताविशिष्टाभवतीति काव्याप्तिशंकापीति, एवंयथाश्रुतार्थपरित्यागेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये तादृशोभयाभाववत्वस्य वक्ष्यमाणतया तत्रैतद्दोषस्यापिनसम्भवइति ।

अप्रवेशादिति, ननुप्रतियोगिवैयधिकरण्याघटितलक्षणे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगिताविशेषणतयोक्तस्थले तादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरितिचेन्न पारिभाषिकस्यतस्यप्रवेश्यत्वात्—हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य विवक्षणीयत्वाद्वा, स्ववृत्तिवाच्यत्वादीनांससंर्गत्वे तेनसम्बन्धेनसाध्यतायामत्रा व्याप्तिर्दुरुद्धरैवेति बोध्यम् ॥

प्राचांमतेप्रकारित्वादेरिति, अयमाशयः यस्यचसम्बन्धत्वं तेन विशिष्टबुद्धिरवश्यंजन्यते सचमत्वार्थीयैरभिलप्यते—यथावह्निमान् पर्वतोरूपवान्घटइत्यादि, नहिवह्निमज्ज्ञान स्वह्निमानभावइत्यादिप्रामाणिकानामभिलापइति विषयित्वप्रतियोगित्वादिः संसर्गोऽपिनास्तीतिज्ञायते दृश्यतेचवह्निंजानामिवह्निर्नास्तीत्याद्यभिलापः नचतेनतेषां सम्बन्धत्वसिद्धि द्वितीयाप्रथमयोः सम्बन्धाभिलापकत्वाभावात् ज्ञानाभावादिप्रत्यक्षादिकञ्च विषयित्वप्रतियोगित्वादिकं प्रकारतयैव गृह्णातीति ॥

प्राचामित्यस्वरससूचनाय, सचविषयित्वप्रतियोगित्वाद्यनुपस्थिति दशायामपि विषयविशिष्टज्ञान प्रतियोगिविशिष्टाभावादिप्रत्यक्षाद्युत्पत्तेरनिर्वाहः तेषांसंसर्गत्वेच कार्यकारणभावादिलाघव मन्यथा-

वह्नित्वेतरधर्मानवच्छिन्नप्रकारताकज्ञानस्व मणित्वमात्रावच्छिन्नप्रतियोगिताकाभावत्वादिना कारणत्व इतरधर्मानवच्छिन्नत्वस्याधिकस्यप्रवेशाद्वैवरं दुर्वचत्वंच स्यात् संसर्गत्वेच विलक्षणस्यैवसंसर्गत्वात् , शुद्धवह्नित्वविशिष्टस्य तन्निनिरूपितविषयितैव शुद्धमणित्वविशिष्टस्यच तन्निरूपितानुयोगितातदवच्छिन्नप्रतियोगितैवहि संसर्गः-उक्तञ्चैतत् सिद्धान्तलक्षणव्याख्यानेभट्टाचार्येणापीति ॥ ० ॥

यद्यपिसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्ननिरूपितसाध्यवन्निष्ठाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वस्य मूलोक्तसामानाधिकरण्यान्तार्थतास्वीकारे नकोपिदोष स्तथाप्येतदर्थस्य सर्वथामूलाक्षरालभ्यत्वमालोच्य विशेषरूपेणसंसर्गतामभ्युपेत्याप्याह अत्रब्रूमः साध्यतावच्छेदकसम्बन्धावच्छिन्नेत्यादि, अत्रसाध्यतावच्छेदकावच्छिन्नत्वं पर्याप्तिघटित म्प्रतियोगितावच्छेदकावच्छिन्नत्वञ्च प्रतियोगितानिरूपितावच्छेदकता विशिष्टावच्छेदकतानिरूपितत्वमात्रं-वैशिष्ट्यञ्च, प्रसिद्धचतुष्टयेषुयस्ययस्योपादेयत्वंतेनसंबन्धेन एवंचमहानसीयवह्निमान्महानसीयवह्न्यभावत्वादित्यत्र वह्न्यभावमहानसीयाभावौ वह्निमहानसीयाभावश्चादायनाव्याप्तिः नवामहानसीयवह्न्यभावमादायवह्निमान्धूमादित्यादावव्याप्तिः न च गोत्ववान्कालत्वादित्यत्र सृष्टिकालवृत्तित्वविशिष्टघटत्वाद्यभावस्य लक्षणाघटकत्वसंभवोयेनप्रतियोगितावच्छेदकावच्छिन्नत्वंपर्याप्तिसहितंनिवेश्यंस्यादितिबोध्यम् । इदमुपलक्षणम् प्रतियोगितावच्छेदकसम्बन्धेनप्रतियोगिवैयधिकरण्यं प्रतियोगितावच्छेदकत्वाभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक इतिविवक्षायामपि कालोघटवान्महाकालत्वादित्यत्रनाव्याप्तिरिति ।

एवंयादृशप्रतियोगितावच्छेदकावच्छिन्नेत्यादि, अत्रसमवायिनस्संयोगेनसाध्यतायांजातिमत्वेव्यभिचारिणि साध्याभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसमवाये साध्यतावच्छेदकत्व हेत्वधिकरणीभूतयत्किञ्चिद्द्रव्यत्त्यनुयोगिकत्वोभयोस्सत्वेनातिव्याप्तिःस्यादिति साध्यतावच्छेदकसम्बन्धत्वेतिकथंनोक्तेति । नन्वत्रयथाश्रुतोभयाभावानिवेशापेक्षया किंलाघवमस्ति येनतादृशप्रतियोगिताकथंनोक्तेत्युक्तमितिचे दत्रब्रूमः यद्यपिप्रकृतसाध्यतावच्छेदकसम्बन्धवृ-

त्तिभेदप्रतियोगितावच्छेदकत्वाभावरूपव्यापकत्वापेक्षया यादृशप्र-
तियोगितावच्छेदकावच्छिन्नप्रतियोगिकसम्बन्धवृत्तिभेदप्रतियोगिता-
वच्छेदकत्वाभावरूपव्यापकत्वे यथाश्रुते गौरवमेव तथापिप्रकृतानु-
मितिविधेयतानिरूपितसंसर्गतावच्छेदकावच्छिन्नवृत्तिभेदप्रतियोगि-
तावच्छेदकतात्वस्य संयोगवृत्तिभेदप्रतियोगितावच्छेदकतात्वापेक्ष-
या गुरुत्वेन द्रव्यानुयोगिकसंयोगेनसाध्यतास्थले द्रव्यानुयोगिक-
संयोगवृत्तिभेदप्रतियोगितावच्छेदकतात्वस्यच संयोगवृत्तिभेदप्रति-
योगितावच्छेदकतात्वापेक्षया गुरुत्वेन तत्तदवच्छिन्नाभावाप्रसिद्ध्या-
ऽव्याप्तेर्वारणाय तादृशप्रतियोगितावच्छेदकंयद्यत्तत्तद्व्यक्तिभेदकूट-
एवयथाश्रुतलक्षणेप्रवेश्यः अत्रचप्रमेयवान् भावत्वादित्यत्र विषयित्वा-
दीनामसंसर्गत्वे प्रमेयाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि-
कसम्बन्धवृत्तिभेदप्रतियोगितावच्छेदकतात्वस्य सम्बन्धवृत्तिभेदप्र-
तियोगितावच्छेदकतात्वापेक्षयागुरुत्वेन घटाद्यभावप्रतियोगिताव-
च्छेदकावच्छिन्नप्रतियोगिकसम्बन्धवृत्यभावप्रतियोगितावच्छेदकता-
त्वस्यच घटत्वावच्छिन्नप्रतियोगिकसम्बन्धवृत्यभावप्रतियोगिताव-
च्छेदकतात्वापेक्षयागुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्या दोषवारणाय
तादृशावच्छेदकभेदकूटः प्रवेश्यः तत्रयथाश्रुतलक्षणे यादृशप्रतियो-
गितावच्छेदकावच्छिन्नप्रतियोगिकत्वभेदस्यप्रविष्टत्वेनगौरवम् एव-
मुभयाभावोयथाश्रुते यादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रति-
योगिकत्वावच्छिन्नप्रतियोगिताको ऽत्रसांसर्गिकाविषयताविशेषव्य-
क्तित्वावच्छिन्नप्रतियोगिताक इतिस्फुटमेवयथाश्रुतलक्षणेयथाश्रुत-
एवतदंशेगौरवम् घटाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि-
कत्वघटितत्वोभयत्वस्य घटत्वावच्छिन्नप्रतियोगिकत्वघटितोभयत्वाप-
क्षयागुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्यादोषः स्यादिति तादृशाभा-
वप्रतियोगितावच्छेदकंयत्तदवच्छिन्नप्रतियोगिकत्वंनिवेश्य न्तत्रवह्नेः
साध्यतावच्छेदकतास्थले साध्याभावस्यलक्षणघटकत्वापत्त्याऽव्याप्तिः
स्या त्प्रतियोगिकत्वस्याविशिष्योपादाने समवायनिष्ठप्रतियोगिक-
त्वमादायवह्निमान्धूमादित्यत्राव्याप्तिस्स्यादिति प्रतियोगितावच्छेदका-
वच्छिन्नप्रतियोगिकंयद्यत्तावदन्यान्यत्वमेवप्रतियोगितयोपादेय न्तत्र-
स्वतरांगौरवम् । एतेनहेत्वाधिकरणीभूतयात्किञ्चिद्व्यक्त्यनुयोगिकस-
म्बन्धसामान्ये साध्यतावच्छेदकसम्बन्धत्व यादृशाभावप्रतियोगि-

तावच्छेदकावच्छिन्नप्रतियोगिकसम्बन्धत्वोभयाभाव स्तादृशप्रति-योगितोपादेयेत्येवकुतोनोक्तमितिकथन्नोक्तमित्याशंकानिरस्ता । एवं-यथाश्रुतोभयाभावत्वस्यै तादृशोभयाभावत्वापेक्षयागुरुत्वेन व्याप-कताशरीरे तादृशोभयाभावत्व तदितरोभयानवच्छिन्नत्वप्रवेशेनापि दीधित्युक्तलक्षणे गौरवम्बोध्यमित्यलम् ॥ ० ॥

प्रवादमनुसृत्याहेति, गगनस्यकालासम्बन्धित्वेतुच्छत्वंस्यात्, कालसम्बन्धस्यैवसत्वरूपत्वात् एवंशब्दादिकंप्रत्यकारणत्वमपिस्या त्कालासम्बन्धित्वेतस्यपूर्वकालसम्बन्धघटितत्वा दित्याद्यपियद्यपि-गगनस्यकालसम्बन्धसाधकमस्ति तथापिप्रामाणिकत्वमेवसत्वं य-स्यचव्यतिरेकेयस्याभावस्तत्वमेवचकारणत्वमितिपक्षे तस्यासम्भवा त्प्रवादानुसरणङ्कृतमितिबोध्यम् ॥

धर्मसम्बन्धयोरुपादानमिति, अथधर्मविधयायत्साध्यतावच्छेद-दकन्धर्मविधयातदवच्छिन्नत्वस्य संसर्गविधयायदवच्छेदकंसंसर्गवि-धयातदवच्छिन्नत्वस्यचनिवेशनमभिमत न्तत्रसमवायिनस्संयोगेन-साध्यतायांसद्धेतावव्याप्तिवारण मेकतरनिवेशेनापिसम्भवा दपर-निवेशनम्व्यर्थमिचेन्न, विषयितयाघटसाध्यकतज्ज्ञानत्वहेतुकसद्धेतौ विषयितयाविषय्यभावीयप्रतियोगितायां संसर्गविधयायदवच्छेदकंय-द्विषयित्वंसंसर्गविधयातदवच्छिन्नत्वस्य साध्यतावच्छेदकविषयित्वा-वच्छिन्नत्वस्यच द्वयोः सत्वेनाव्याप्तेर्धर्मविधयायदवच्छेदकमित्य-स्यविवक्षणीयत्वात् विषयिणस्तादात्म्येनसाध्यतायां घटज्ञानत्वे वि-षयिणो विषयित्वसम्बन्धावच्छिन्नप्रतियोगिताकतादृशाभावप्रतियो-गितायां धर्मविधयासाध्यतावच्छेदकंयद्विषयित्वन्धर्मविधयातदवच्छि-न्नत्वस्य साध्यतावच्छेदकविषयित्वावच्छिन्नत्वस्यच द्वयोःसत्वेनाव्या-प्तेर्वारणाय संसर्गविधयायदवच्छेदकमित्यस्यचप्रवेश्यत्वात् एवञ्च समवायिनस्संयोगेनसाध्यतायांसद्धेतौ संयोगिनः समवायेनाभाव-मादाव्याप्तिवारणाय धर्मविधयातदवच्छिन्नत्वं संसर्गविधयातदव-च्छिन्नत्वम्वाप्रवेश्यमित्यत्र विनिगमकाभावेनोभयोरेवप्रवेश्यत्वा द्य-दिचसंसर्गविधयावच्छिन्नत्वं सम्बन्धानवच्छिन्नावच्छेदकत्वं धर्म-विधयावच्छेदकत्वं सम्बन्धावच्छिन्नावच्छेदकताकत्वं तथाचलाघव-मेवविनिगमकं निर्वचनसम्भवंवैलक्षण्यस्याखण्डस्याप्रामाणिकत्वा त्तदा तदेकमेवानिवेश्यताम् । वस्तुतस्तु वह्निमान्धूमादित्यत्रमहानसी-

यवह्न्यभावं संयोगसमवायोभयसम्बन्धेनवह्न्यभावश्चादायातिवारणाय साध्यतावच्छेदकधर्मातिरिक्तधर्मानवच्छिन्नत्व साध्यातावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वोभयाभावस्य प्रवेशनयितया तत्रसम्बन्धत्वधर्म्मत्वयोःसार्थक्यस्यातिसुलभत्वमेवेति यदिचमहानसीयवह्न्यभावप्रतियोगितावारणाय साध्यतावच्छेदकतादितरोभयानवच्छिन्नत्वमेवप्रतियोगिताविशेषण न्तदापिसमवायिनःसंयोगसमवायोभयसम्बन्धेनसाध्यतायां घटत्वे संयोगिनउभयसम्बन्धेनाभावमादायाव्याप्तिवारणाय धर्म्मविधयावच्छिन्नत्वंप्रवेशनीयमेव एवं समवायिनःसंयोगविशिष्टस्यसंयोगेनसाध्यतायां घटत्वे साध्यस्यसमवायेनाभावमादायाव्याप्तिवारणाय सम्बन्धविधयावच्छिन्नत्वस्याप्यापाततःसार्थक्यंबोध्यमितिध्येयम् ॥ ० ॥

दधित्वविशिष्टप्रमेयवान् स्थूलदधित्वादिति, दधित्वविशिष्टेत्यव्याप्यवृत्तित्वसम्पत्त्यर्थं साध्यतावच्छेदक तादात्म्येनप्रमेयस्यव्याप्यवृत्तित्वा द्वैशिष्ट्यश्च दधित्वाधिकरणेसमवायेनवृत्तित्वरूप मेवञ्चस्थूलपदन्दध्यणुकेव्यभिचारवारणार्थं। घटवृत्तित्वविशिष्टेति सम्पातायातं पूर्वंतादृशद्रव्यत्वसाध्यकस्थललिखनात् अन्यथा विशेषरूपेणसंसर्गत्वमन्तरेण तत्सार्थक्यस्यासम्भवेन तदभ्युपगमे दधित्वविशिष्टप्रमेयवान् स्थूलदधित्वादित्यत्राव्याप्तेरनुत्थानप्रसङ्गात्।

विभावनीयमिति, भावनावीजन्तु विशेषरूपेणसंसर्गत्वाभ्युपगमेऽपि स्थलविशेषेऽव्याप्तिः साचयद्यत्सम्बन्धेनयद्धर्म्मावच्छिन्नानधिकरणमित्यादिलक्षणखण्डनव्याख्यानावसरेऽभिहितैवेति ॥ ० ॥

व्यापकतालक्षणातिव्याप्तिमपिपरिहरति यद्धर्म्मेत्रेत्येति, नचसाध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तितावच्छेदकत्वमेवलघुभूतम्विशेषणमस्त्विति वाच्यम्। विशिष्टधर्मावच्छिन्नाधेयत्वस्यानतिरिक्तत्वेगुणानुयोगिकसमवायेनगुणान्यत्वविशिष्टसत्वस्यद्रव्यत्वव्यापकत्वापत्तेरिति ॥

यद्वास्वावच्छेदकताघटकसम्बन्धेनेत्यादि, अथतादृशप्रतियोगितानिरूपितावच्छेदकतासामान्ये यत्सम्बन्धावच्छिन्नत्व यद्धर्म्मावच्छिन्नत्वोभयाभावइत्येवलाघवाद्विवक्षणीयमितिचे न्नैवं विशिष्टसत्तावान्जातेरित्यत्र विशिष्टसत्तावदभावस्यप्रतियोगिवैयधिकरण्यसम्पत्त्यर्थं स्वावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्य-

नुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणतावदन्य-त्वस्यैव-विवक्षणीयतया वह्निमत्पर्वतत्ववदभावस्यलक्षणघटकत्वेन त-दीयप्रतियोगितानिरूपितवन्हित्वावच्छिन्नावच्छेदकतायामुभयोःसत्वे-नाव्याप्त्यापत्तेः। नचवह्निमत्पर्वतत्ववदभावप्रतियोगितावच्छेदकता-त्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकत्वाप्रसिद्धिः वह्नित्वपर्वतत्वत्वोभयधर्म्मावच्छिन्ननिरूपकताया उभयत्वानवच्छिन्ना-या अलीकत्वादिति वाच्यम् वह्निमत्पर्वतीयवदभावमादायाव्याप्तेः व-ह्नित्वपर्वतीयत्वोभयधर्म्मावच्छिन्नानिरूपकत्वस्यप्रसिद्धत्वा नचप्र-तियोगिताधर्म्मिकोभयाभावविवक्षायामपितद्दोषतादवस्थ्यम् वह्नित्व-गतैकत्ववृत्त्यवच्छेदकताकताकत्वस्यतत्प्रतियोगितायां सत्त्वादिति वाच्यम् साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदक-रूपवृत्तित्वस्यैवोभयाभावप्रतियोगित्वेनविवक्षितत्वात् वृत्तित्वञ्च स्वावच्छेदकतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदक-त्वसम्बन्धेन वह्निमत्पर्वताभावीयप्रतियोगिताया मुक्तरूपवृत्तित्वस्य-सत्वेऽपि तदभावस्यनिरुक्तप्रतियोगिवैयधिकरण्यविरहान्नाव्याप्तिः। अतएवप्रतियोगिवैयधिकरण्यमत्रस्वप्रतियोगिभिन्नत्वमेवलाघवाद्वि-वक्षणियमित्यापिनिरस्तम् वह्निमत्पर्वताभावस्य स्वप्रतियोगिभिन्न-हेत्वधिकरणकतया तमादायाव्याप्तेः। किञ्च समवायेनद्रव्यत्वसा-ध्यकगगनत्वहेतौ समवायेनद्रव्यत्ववतस्समवायेनाभावस्यापिलक्ष-णघटकत्वा तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्यतत्सम्बन्धप्रतियो-गिन्येवाभ्युपगमपक्षे तत्प्रतियोगिभिन्नत्वस्यगगनेसत्वादव्याप्तेः। अ-थस्वनिरूपितावच्छेदकतावदन्यत्वमेवप्रतियोगिवैयधिकरण्यघटकम्वा-च्यमवच्छेदकतावत्ताच स्वावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगिता-वच्छेदकरूपवृत्तिनिरूपकताकाधिकरवणतावत्वसम्बन्धेन। यद्वा स्व-प्रतियोगितावच्छेदकताविशिष्टनिरूपकताकाधिकरणतावदन्यत्वं वि-वक्षणीयं वैशिष्ट्यंच स्वावच्छेदकावच्छिन्नत्व स्वावच्छेदकसम्बन्धाव-च्छिन्नत्वोभयसम्बन्धेन एवञ्च वह्निमत्पर्वतीयवदभावस्यलक्षणा-घटकत्वेनाव्याप्त्यभावेनावच्छेदकताधर्मिकोभयाभावपरित्यागोनोचि-तः नचोक्तपरम्परायाःसंसर्गत्वाभावेचोक्तनिवेशासम्भवः स्वनिरूपि-तयत्किञ्चिदवच्छेदकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छे-दकरूपवृत्तिनिरूपकताकाधिकरणतावदन्यत्वं पर्वतीयत्वावच्छिन्नाव-

च्छेदकतामादायहेत्वधिकरणमहानसादावस्त्येवेतिवाच्यम् स्वनिरूपितावच्छेदकतात्वसमानाधिकरणानिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतात्वनिष्ठावच्छेदकताकप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणतावच्छेदस्यैव निवेशनीयत्वात् एवञ्चवह्नित्वगतैकत्वस्यापिताद्दशरूपत्वेन तद्वृत्तिनिरूपकताकाधिकरणतावत्वसत्त्वउक्तभेदासत्वा न्नचस्वावच्छेदकताघटकसंबन्धावच्छिन्नत्वप्रवेशादननुगमइतिवाच्य मुक्तपरम्परयाः संसर्गत्वाभावेतस्यतुल्यत्वात् इतिचेन्नैवं महानसीयवह्निमान्धूमादित्यादौ महानसीयवह्निमदभावप्रतियोगितावच्छेदकनिष्ठां रूपितत्वसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितवृत्तित्वविशिष्टमहानसीयवह्निमदभावप्रतियोगितावच्छेदकताविशिष्टावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपितामवच्छेदकता मादायवह्नित्वगतैकत्वस्यताद्दशावच्छेदकरूपत्ववत्वेन तद्वृत्तिनिरूपकताकाधिकरणत्वसत्वेनो क्तभेदस्यहेत्वधिकरणेविरहेणा तिव्याप्तिवारणाय स्वनिरूपितावच्छेदकताकत्व समानाधिकरणोभयावृत्तिधर्म्ममात्रावाच्छिन्ननिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितत्वेन प्रतियोगितायाः प्रवेशनीयतया प्रतियोगिताधर्म्मिकोभयाभावकल्पे ऽवच्छेदकत्वैकाधिकरणप्रवेशापेक्षया वच्छेदकताधर्म्मिकोभयाभावकल्पे प्रतियोगिवैयधिकरण्यशरीरउभयावृत्तित्वप्रवेशएवगौरवस्यापत्तेः। यत्तु गुरुधर्मस्यप्रतियोगितानवच्छेदकत्वे ताद्दशाधिकरणत्वावच्छिन्नसामान्यभेदस्यनिवेशयितुमशक्यत्वमिति तन्न भवत्कल्पइवात्रापि ताद्दशाधिकरणसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदत्वत्वेना नुयोगितावच्छेदकमनुगमय्य तदवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वावच्छिन्ननिवेशे दोषाभावादिति अत्रोक्तपरम्परायास्संसर्गत्वमभ्युपेत्य ताद्दशप्रतियोगितावच्छेदकतावदन्यत्वादे स्कुटत्वाद्यघटितत्वेनलघुभूतस्य प्रतियोगिवैयधिकण्यघटकताम्मनसिनिधायभट्टाचार्य्येणावच्छेदकताधर्म्मिकउभयाभावआद्दतः वह्निमत्पर्वतीयवदभावमादायव्याप्तेरेव यत्सम्बन्धावच्छिन्नावच्छेदकताकत्वविवक्षापिनिरस्ता उक्ताव्याप्तिवारणाय साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वस्य स्वनिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकतावच्छेदक-

तात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वस्यविवक्षणेपि पर्वतानुयोगिकसंयोगेनपर्वतीयवद्वह्निमदभावमादायाव्याप्तेर्दुरुद्धरतया साध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकताकत्वस्यपृथगेवनिवेशनीयत्वादिति — ॥ केचित्तुगुरुधर्मस्यप्रतियोगितानवच्छेदकत्वे प्रमेयवह्निमान् धूमादित्यादौसंयोगेनप्रमेयवह्निमदभावप्रतियोगितावच्छेदकत्वस्यवह्नावेवकल्पनीयतया प्रमेयवह्नित्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिध्याऽव्याप्त्यापत्तेः सिद्धान्तेच विषयितयाप्रमेयवह्निमदभावप्रतियोगितावच्छेदकतायां तत्प्रसिद्धिरितिवदन्ति–तन्नातिसमञ्जसम् गुरुधर्मसाध्यकव्यभिचारिण्यतिव्याप्तिवारणाय यद्धर्मत्वस्यपारिभाषिकस्यैवविवक्षणीयतया दोषाभावादिति यद्यप्यत्रोक्तरीत्याप्रतियोगिवैयधिकरण्यस्यपरिष्कारउभयावृत्तित्वस्यप्रवेशेऽपि प्रतियोगितावच्छेदकतयो भयत्वस्याप्रवेशेन गौरवाभाव स्तथापि यथाश्रुतेवह्निमत्पर्वतीयवदभावमादायाव्याप्तिवारणायो भयाभावनिवेशसार्थक्यं तत्रोभयावृत्तित्वप्रवेशे तेनोभयाभावनिवेशपक्षस्यागुरुत्वेऽपि पूर्वपक्षबीजस्यलाघवस्याभावश्चेति ॥ वस्तुतस्तु स्वरूपसंयोगसमवायान्यतमसंबन्धेनप्रमेयस्यसाध्यत्वेवाच्यत्वहेतौ साध्यतावच्छेदकसंबन्धेनप्रमेयवद्भेदस्याप्रसिद्धत्वात् प्रमेयवतः संयोगेनसमवायेनवाभावस्यप्रतियोगितावच्छेदकताया द्रव्यत्वेसत्वेवाकल्पनीयत्वात् स्वरूपेणतदभावस्याप्रसिद्धत्वात् प्रमेयवद्घटाद्यभावप्रतियोगितावच्छेदकत्वस्यघटत्वादिष्वेवकल्पनात् प्रमेयावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्धेः केवलान्वय्यतिरिक्तेपारिभाषिकयद्धर्म्मत्वस्यापि विरहात् साध्यवन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकतावच्छेदकत्वा त्केवलान्वयिधर्म्ममात्रस्यचप्रमेयतुल्यत्वाद व्याप्तिस्यादित्युभयाभावनिवेशआवश्यकः। अतएवयद्धर्मावच्छिन्नावच्छेदकताकत्वविशिष्टयत्सम्बन्धावच्छिन्नावच्छेदकताकत्वाभावनिवेशो ऽप्यपास्तः॥ केचित्तुभेदप्रतियोगितानिष्ठतदुभयस्यैवलाघवेनाभावप्रतियोगित्वेनप्रविष्टतया तत्रविशिष्टाभावप्रवेशे प्रमेयसाध्यकेऽव्याप्तिस्स्यादित्याहुः। ऋजवस्तुयत्सम्बन्धावच्छिन्नयद्धर्म्मावच्छिन्नावच्छेदकत्वाभावनिवेशपवतात्पर्य मन्यथाधूमवान्वह्नेरित्यत्रातिव्याप्ते धूमवदभावप्रति-

योगितायामवच्छेदकतानिरूपितत्वद्वयविरहादितिवदन्ति तदसत् धूमवत्संयोगेनघटवदभावादिप्रतियोगिताया मुभयस्ययथाश्रुतस्यापिसत्वा द्विवक्षितस्यरूपवृत्तित्वद्वयस्य धूमवदभावप्रतियोगितायामपी त्यतिव्याप्तिविरहा दुक्तयुक्त्याप्रमेयसाध्यकाव्याप्तेश्चेतिदिक्। अत्रापिस्वप्रतियोगितावच्छेदकसम्बन्धेनयत्प्रतियोगितावच्छेदकानधिकरणत्वंहेतुमतो यद्धर्म्मावच्छिन्नावच्छेदकताकतत्प्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नावच्छेदकत्वाभावविवक्षाऽपि दधित्वविशिष्टप्रमेयादिसाध्यकस्थलाव्याप्त्या पूर्ववदेवनिरस्तावेदितव्या ॥ ० ॥ ० ॥

अन्यथादण्डिमानित्यादाविति, सर्वेषांदण्डानां हेतुमन्निष्ठतत्तद्दण्डावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेन तदभावस्य तत्तद्दण्डानधिके शुद्धदण्डे सत्वायोगा दव्याप्तिप्रसंगेपि तत्ताविशिष्टदण्डावच्छिन्नत्वस्य शुद्धदण्डावच्छिन्नत्वस्यच विलक्षणत्वेन साध्यतावच्छेकशुद्धदण्डावच्छिन्नत्वघटितोभयाभावस्य प्रतियोगित्वसामान्येसत्वेन नाव्याप्तिसम्भव इत्याशयः नचैवंतद्दण्डवतः साध्यतायांव्यभिचारिण्यतिव्याप्तिः प्रतियोगित्वसामान्ये शुद्धदण्डावच्छिन्नत्वघटितोभयाभावसत्वेन परम्परयातदवच्छेदकत्वस्य शुद्धदण्डे सत्वे विशिष्टेपिसत्वादितिवाच्यम्। यादृशधर्म्मावच्छिन्नविधेयकानुमितिः फलं तादृशधर्म्मावच्छेद्यत्वघटिताभावस्यैव व्याप्तिघटकत्वेन तद्दण्डावच्छेद्यत्वघटितोभयाभावस्य प्रतियोगित्वसामान्येविरहा दतिव्याप्त्यभावात्। यद्यप्यवच्छेदकताघटितलक्षणेपि यादृशधर्म्मेऽनवच्छेदकत्वविवक्षायांनदोषः तथापिपर्य्याप्तेरव्याप्यवृत्तितायानिराकृतत्वेन साध्यतावच्छेदकधर्म्मिक व्यापकतावच्छेदकत्वग्रहस्य प्रमात्वासम्भवा द्व्यापकतावच्छेदकतावच्छेदकत्वग्रहस्येदानीमनुमित्यजनकत्वस्याभ्युपगमा दवच्छेदकत्वगर्भनिरुक्तिपरित्यागः। तस्यानुमितिजनकत्वेच यद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमित्यादिविशेषव्याप्तौवक्ष्यति। अवच्छेद्यतागर्भेतु तत्तद्दण्डावच्छिन्नविधेयकानुमितौ तादृशप्रतियोगितात्वव्यापकतद्दण्डावच्छिन्नत्वघटिताभावप्रतियोगितानिरूपितपरम्पराऽवच्छेदकत्वरूपव्यापकतावच्छेदकत्वग्रहस्य भ्रमत्वात् शुद्धदण्डावच्छेद्यत्वघटितोभयाभावस्य प्रतियोगित्वसामान्यनिष्ठस्य प्रतियोगितावच्छेदकत्वरूपव्यापकतावच्छेदकत्वग्रहस्यच प्रमात्वा-

मदोषइतिध्येयम्॥

ननुसाध्यतावच्छेदकताघटकसम्बन्धेनप्रतियोगितावच्छेदकवैशिष्ट्योक्तौ तद्यक्तित्वविशिष्टप्रमेयत्वप्रतियोगिकस्वरूपेण तादृशप्रमेयत्वविशिष्टसाध्यकतद्वधित्वेऽव्याप्त्यापत्त्या प्रतियोगितावच्छेदकताघटकसम्बन्धेनैवतद्वाच्यम् तथासति रूपत्वविशिष्टाभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नयद्धर्म्मनिष्ठावच्छेदकताकत्वमेव यद्धर्म्मावच्छिन्नत्वम्विवक्षणीयमिति घटाभावाद्यनुयोगिकस्वरूपेण प्रमेयत्वविशिष्टस्य साध्यतावच्छेदकसम्बन्धेनाभावप्रतियोगितायां प्रमेयत्वावच्छिन्नत्वस्य तादृशस्य न प्रसिद्धिसम्भवः। न च तादृशाभावोगुरुधर्म्मावच्छिन्नाभाव इत्यप्रसिद्ध इति वाच्यम् समवायसम्बन्धेनाभावप्रतियोगिताया म्प्रमेयत्वावच्छिन्न प्रसिद्धिम्वदता गुरुधर्म्मस्यावच्छेदकताभ्युपगमस्येदानींदर्शितत्वा देवञ्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितायामेव प्रमेयत्वावच्छिन्नत्वप्रासिद्धिसम्भवे सम्बन्धान्तरावच्छिन्नप्रतियोगिताया स्तत्प्रसिध्यनुधावनम्वृथेत्यपिनिरस्तमित्याशयेनाह प्रमेयत्वावच्छिन्नत्वाप्रासिद्धेरिति। अत्र विषयित्वप्रतियोगित्वादीनांसंसर्गत्वे साध्यतावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकवैशिष्ट्योक्तौ दोषाभावा द्यद्धर्म्मनिष्ठावच्छेदकतायां सम्बन्धविशेषावच्छिन्नत्वप्रवेशस्यानावश्यकतया साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वेऽपिप्रसिद्धिम्भवत्येवेत्यवधेयम्।

उभयसाधारणैकेति, ज्ञाननिरूपितत्वाभावानिरूपितत्वाभ्यां वैलक्षण्यनेत्यादिः॥

प्रकृतसाध्यीयसाध्यतावच्छेदकसम्बन्धसामान्येति; इदमुपलक्षणं साध्यतावच्छेदकसम्बन्धसामान्ये साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वघटितत्रितयाभावोपि निवेशयितुंयोग्यइति॥ अत्र विषयित्वादिसम्बन्धेनव्याप्यव्यापकभावस्याभ्युपगमे तेनप्रमेयसाध्यकस्थलस्याव्याप्यवृत्तिसाध्यकस्थलत्वेपिच नप्रमेयवन्नित्यत्वादित्यत्राव्याप्तिसम्भवः प्रमेयत्वावच्छिन्नप्रतियोगिताकविषयितातो घटत्वाद्यवच्छिन्नप्रतियोगिताकविषयित्वस्यवैलक्षण्याद न्यथाघटइतिज्ञानात् प्रमेयइतिज्ञानस्यापिवैलक्षण्यानुपपत्ते रितिप्रमेयत्वावच्छिन्नप्रतियोगिकविषयित्वे घटत्वावच्छिन्नप्रतियोगिकत्वविरहेण

घटाभावस्यलक्षणघटकत्वात् । यत्त्वत्रनित्यज्ञानानुयोगिकप्रमेयघटत्वाच्छिन्नविषयित्वे घटत्वावच्छिन्नप्रतियोगिताकत्वसत्वान्नातिव्याप्तिवारणम् नचप्रतियोगितावच्छेदकमात्रावच्छिन्नप्रतियोगिताकत्वंविवक्षणीयमितिवाच्यम् केवलघटत्वविशिष्टसाध्यक प्रमेयघटज्ञानत्वेसद्धेतौ हेत्वधिकरणानुयोगिकविषयित्वे साध्याभावप्रतियोगितावच्छेदकघटत्वमात्रावच्छिन्नप्रतियोगिताकत्वविरहेण साध्याभावस्यलक्षणघटकतया व्याप्तेः। नचहेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसम्बन्धस्य साध्यतावच्छेदककेवलघटत्वावच्छिन्नप्रतियोगिताकत्वविरहे कथंसद्धेतुत्वं सद्धेतुत्वे कथमव्याप्तिरिति वाच्यम् विषयित्वरूपसंसर्गप्रतियोगित्वस्यैव विषयतारूपतया प्रमेयघटज्ञाने केवलघटत्वविशिष्टस्याविषयत्वे तज्ज्ञानानुयोगिकविषयित्वस्य केवलघटत्वावच्छिन्नप्रतियोगिताकत्वविरहात् तद्धर्म्मविशिष्टस्य तद्धर्म्मविशिष्टप्रतियोगिकविषयित्वादिसंसर्गानुयोगिन्यपिसत्वाभ्युपगमात् तद्धर्म्ममात्रविशिष्टप्रतियोगिकत्वं नहितन्त्रं गौरवा दिति सद्धेतुत्वस्यापिनिर्वाहा दिति भट्टाचार्य्यैरुक्तम् तन्नातियुक्तम् तादृशधर्म्मावच्छिन्नप्रतियोगिताकेनैवसंसर्गेण तादृशधर्म्मावच्छिन्नसत्वस्य युक्तत्वात यदिविशिष्टधर्म्मावच्छिन्नप्रतियोगिकसंसर्गशुद्धधर्मविशिष्टबोधेभासेत भवेदपिसंशुद्धस्यसंसर्ग स्तथात्वेतद्बोधस्य विशिष्टधर्म्मविशिष्टवैशिष्ट्यावगाहित्वापत्तेः प्रकारतावच्छेदकधर्मन्यूनाधिकस्यभासमानसंसर्गप्रतियोगितावच्छेदकत्वे ऽतिप्रसङ्गपाताच्च अत एव यद्रूपाविशिष्टेत्युक्तेः फलप्रपञ्चे भट्टाचार्य्येणाविशिष्टसत्तात्वावच्छिन्नप्रतियोगिकसमवायस्य हेतुतावच्छेदकसम्बन्धत्वे तेनसत्तात्वावच्छिन्नस्यासत्तया यद्रूपविशिष्टपदस्यवैयर्थ्यमाशङ्कितंप्राक् अन्यथाविशिष्टसत्तात्वावच्छिप्रतियोगिकसंसर्गस्य सत्तात्वावच्छिन्नप्रतियोगिकतया तेनसम्बन्धेन सत्तात्वावच्छिन्नस्यापिसत्वप्रसङ्ग तद्ग्रन्थासङ्गतेः नचविषयित्वादिष्वेवेदृशनियमइति वाच्यम्। नियमभेदकल्पनायामतिगौरवात् — अन्यथाघटत्वावच्छिन्नप्रतियोगिताकविषयित्व प्रमेयत्वावच्छिन्नप्रतियोगिकविषयित्वयो वैलक्षण्येऽपि प्रमेयविषयकज्ञाने घटस्यापिसत्वंस्या द्विषयित्वसंसर्गस्थले तद्धर्म्मविशिष्टस्य तदाश्रयप्रतियोगिकसम्बन्धेनसत्वमित्यस्यैव लाघवेनाभ्युपेयत्वात्। नचप्रमेत्वावच्छिन्नप्रतियोगिकविषयित्वस्य घटत्ववि-

शिष्टसंसर्गत्वे प्रमेयज्ञानानन्तरं घटं जानामीत्यनुव्यवसायापत्तिरि-
तिवाच्यम् तुल्यन्यायेनघटत्वमात्रविशिष्टविषयकज्ञानसाधकानुव्य-
वसायस्य घटंजानामीत्येतद्भिन्नस्याभावा त्तस्य च केवलघटत्वविशि-
ष्टविषयकज्ञान प्रमेयघटत्वविशिष्टविषयकज्ञानयोः शुद्धघटत्वविशिष्ट-
वैशिष्ट्यावगाहित्वेऽपि प्रमात्व प्रमेयघटज्ञानविलक्षणशुद्धघटज्ञान-
ग्राहकत्वानुपपत्ते स्तस्यचतदभावे ग्राहकान्तराभावेन तज्ज्ञान-
स्यैवालीकत्वापत्ते रितिविशिष्टघटज्ञानेशुद्धघटत्वविशिष्टस्याप्यसत्व-
मभ्युपेयंस्यात्—भवतिचेत्सत्व म्विशेष्यविधयाशुद्धघटत्वविशिष्टस्य
तत्राविषयत्वादेवेतिगृहाणे त्यलमप्रस्तुतजल्पनेन ॥

व्याप्यवृत्तितयेति, । ननु तत्क्षणान्यवृत्तित्वविशिष्टप्रमेयस्य वि-
भुत्वविशिष्टप्रमेयस्यवा नधिकरणदेशस्य प्रसिद्धतया तस्याव्याप्य-
वृत्तित्वेन तत्साधकस्यै तल्लक्षणलक्ष्यतया तत्राव्याप्तिस्सम्भवत्येवेति-
चेन्न तत्सम्बन्धावच्छिन्नवृत्तिताविशिष्टस्य तेनैवसत्व न्नान्येनेतिम-
ते स्वरूपसम्बन्धावच्छिन्नवृत्तित्वस्य साध्यविशेषणत्वे कालिकेन-
साध्यत्वासम्भवा त्कालिकसम्बन्धावच्छिन्नवृत्तित्वस्यतथात्वेच स्व-
रूपेणतदनधिकरणत्वस्य वस्तुमात्रेसत्वेन तादृशानधिकरणस्य का-
लनिष्ठाभावावच्छेदकत्वासम्भवा दन्यथासंयोगेनरूपानधिकरणघटा-
देरपि कालनिष्ठावच्छेदकत्वापत्तेः-कालस्यचकालनिष्ठाभावाधिकर-
णतायामवच्छेदकत्वानभ्युपगमेन तत्क्षणस्यतत्क्षणान्यवृत्तित्ववि-
ष्टप्रमेयाभावावच्छेदकत्वासम्भवादित्याशयः । यद्वायादृशप्रतियोगि-
तावच्छेदकावच्छिन्नप्रतियोगित्वसामान्ये साध्यतावच्छेदकावच्छिन्न-
त्व साध्यतानिरूपितसंसर्गतावच्छेदकधर्म्मावच्छिन्ननिरूपितत्व हे-
त्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसंसर्गनिरूपितत्वैतत्त्रितया-
भाव स्तादृशप्रातियोगित्वस्य लक्षणघटकत्वमभिमत इति घटत्वा-
वच्छिन्नप्रतियोगित्वस्य प्रमेयत्वाद्यनवच्छिन्नतया घटाभावप्रतियो-
गित्वस्य लक्षणघटकत्वसम्भवइतिभावः ॥

अतएवेतीति, ननुसमवायस्यभिन्नत्वेऽपि कालिकसमवायोभय-
सम्बन्धेनसत्तासाध्यके समवायेनव्यभिचारिणिसत्वेऽतिव्याप्तिः सा-
ध्यतावच्छेकसम्बन्धसामान्यान्तर्गतसमवायउभयाभावविरहा दि-
तिसमवायैक्यमतानुसरणान्निर्वीजमितिचेन्न संसर्गतावच्छेदकमा-
त्रभेदेनसंसर्गताभेदे संसर्गताधर्मिकोभयाभावविवक्षायान्दोषाभा-

वात् । यद्वासाध्यतावच्छेदकसम्बन्धेनसाध्यवदनुयोगिकसाध्यताव-च्छेदकसम्बन्धसामान्य उभयाभावोविवक्षणीयः-तथाचजन्यानुयो-गिकसमवाये कालिकेवा गगनादियत्किञ्चिद्व्यक्त्यनुयोगिकत्वघटि-तोभयाभावसत्वा न्नसमवायभेदमतेऽतिव्याप्तिरिति—अत्रवह्निधू-मोभयवान्वह्नेरित्यादावित्यादिग्रन्थस्यो भयसाध्यकाव्याप्तिवारणाय प्रतियोगितावच्छेदकाश्रयप्रतियोगिकत्वे विवक्षितेऽतिव्याप्तिरित्येत-त्परतया व्याख्यान न सम्भवतीत्यवगन्तव्य मिति भावः ॥ ० ॥

अथवह्निधूमोभयवान् वह्नेरित्यादावित्यादिग्रन्थेन दीधितिका-रोक्तदोषस्य कृतोभट्टाचार्येणपरिहार स्संक्षेपादिहप्रदर्श्यते तथाहि घटद्वयवानितीयंबुद्धि र्द्वित्वेनोपलक्षितवैशिष्ट्यावगाहिनी विशिष्ट-वैशिष्ट्यावगाहिनीवा नाद्यः, एकघटवत्यपितत्प्रसङ्गात् । नचोपल-क्षितवैशिष्ट्यावगाहित्वेऽप्यु भयवैशिष्ट्यावगाहित्वमेवेति वाच्यम्, प्रविरलशाखे एकस्मिन्नपिवृक्षे दूराद्भेदभ्रमे द्वित्वप्रकारेणबुद्धिदर्शना त्तदभावबुद्ध्यविरोधित्वप्रसङ्गाच्च द्वितीयेऽपि संयोगस्यसंसर्गत्वे तस्यभिन्नत्वेनोभयप्रतियोगिकत्वासम्भवेन तद्बुद्धेः प्रमात्वानुपप-त्तिः ।प्रकारतावच्छेदकीभूतधर्म्मावच्छिन्नप्रतियोगिकसंसर्गानुयोगि-न्येव तेनसम्बन्धेनबुद्धेः प्रमात्वात्, तस्मादुभयत्वावच्छिन्नैकनिरू-पकतानिरूपित संयोगावच्छिन्नाधारतैव संसर्ग स्तस्यचोभयत्वा-वच्छिन्नप्रतियोगिकतया प्रमात्वनिर्वाहः । एवञ्चोभयसाध्यकस्थले तस्यैवसाध्यतावच्छेदकसम्बन्धत्वेन नदोषसम्भवः । वस्तुतस्तु कु-त्रापिनसंयोगस्यसंसर्गता ऽपितु तदवच्छिन्नाधारत्वाधेयत्वयोरेव, अन्यथापर्वतोवह्निमानित्यत्रसंयोगः पर्वतेवह्निरित्यत्राधेयत्व म्पर्वते-वह्निरित्यत्रसंयोगः पर्वतोवह्निमानित्याधारत्व मित्यत्रविनिगमकाभा-वा दुभयत्रैवसंयोगस्यसंसर्गतायावाच्यतया तद्बुद्ध्योरविशेषप्रस-ङ्गः । नचैकसंसर्गावगाहित्वेऽपि प्रकारविशेष्यभावभेदाद्भेदइति वा-च्यम् पर्वतोवह्निमान् वन्हौपर्वतइत्येतयोः पर्वतेवह्निः पर्वतान् वह्नि-रित्येतयो स्तथाऽप्यविशेषप्रसङ्गात् । नचसंयोगएवाधारता अनु-योगित्वन्तुतन्नियामकमिति संयोगस्यद्विनिष्ठत्वेऽपिनाधेये, आधार-त्वप्रसङ्गेनवापर्वतवान् वह्निरित्येतस्यप्रमात्वप्रसङ्गः पर्वते वह्निरित्यत्र-च स्वनिष्ठसंयोगप्रतियोगित्वंसंसर्गइतिवाच्य माधाराधेयोभयनिष्ठ-संयोगसमवायातिरिक्ताश्रयव्यावृत्तानुयोगित्वस्वीकारे तस्यैवसं-

योगिप्रतियोगिकत्वेन संयोगातिरिक्ताधारत्वरूपसंसर्गत्वोपगमा द-न्यथाऽऽधेयएवसंयोगआधारस्यसंसर्गः प्रतियोगित्वंनियामकं वह्नि-मान् पर्वतइत्यत्रस्वनिष्ठसंयोगानुयोगित्वंसंसर्गइतिवास्वीकरणीयं प्रा-गुक्तस्वेत्यत्रविनिगमकाभावा दुभयत्रसतः संयोगस्यबुद्धिवैलक्ष-ण्यायकल्पनीयत्वे ऽनुयोगित्वप्रतियोगित्वयोराधेये ऽनुयोगित्वमाधा-रे प्रतियोगित्वमाधेयविशेष्यकबुद्धौसंयोगस्संसर्गानुयोगित्वन्नियाम-क माधारविशेष्यकबुद्धौच स्वनिष्ठसंयोगप्रतियोगित्व मित्येतस्या-पि विनिगमकाभावेनवक्तुंशक्यत्वाच्च। नचैवं समवायस्यापिसंसर्ग-त्वानुपपत्तिरितिवाच्य माधारत्वस्यसमवायानतिरेका न्नचघटेरूप-मित्यस्यरूपवान् घटइत्यतोवैलक्षण्यायाधेयत्वरूपातिरिक्तसंसर्ग-विषयत्वं रूपवान्घटइत्यस्यततोवैलक्षण्यायवा ऽतिरिक्ताधारत्वसं-सर्गविषयकत्वमित्यत्रविनिगमनाविरह इति वाच्य मुक्तबुद्ध्योर्वैलक्ष-ण्यायह्यवश्यं विलक्षणसंसर्गविषयकत्वं तत्राधारमात्रनिष्ठआधारवि-विशेष्यकबुद्धिविषयस्समवायत्वेनपरिभाष्यते नत्वाधेयनिष्ठसतुस-मवेतत्वत्वेनैवेतिपरिभाषायां कः पर्यनुयोगावसरइत्यलम्॥ यद्वासंयो-गस्यभिन्नत्वेनतत्प्रतियोगितायाः प्रत्येकमुभयत्वावच्छिन्नत्वासम्भवे-ऽपि प्रतियोगिताद्वयत्वावच्छेदेनो भयत्वावच्छिन्नस्यसम्भवा द्य-त्रनुयोगिन्युभयसंयोगस्तदनुयोगिकएवप्रत्येकेऽपि तादृशप्रतियो-गिताकत्वाभ्युपगमाच्च नोभयसाध्यकस्थलीयदोषसम्भव इति॥

सम्बन्धधर्मिकोभयाभावघटितकल्पे लौहित्यस्ययत्रस्वसमवायि-संयोगेनसाध्यता जपासंयुक्तस्फटिकव्यक्तित्वस्यहेतुता तत्राव्याप्तिः स्फटिकानुयोगिकसंयोगस्यलौहित्यप्रतियोगिकत्वविरहा त्परम्परास-म्बन्धस्थलेसम्बन्धघटकस्यविशेषणस्यप्रतियोगित्वा द्विशेष्यस्यचानु-योगित्वादेव सम्बन्धत्वोपपत्तौ विशिष्टप्रतियोगित्वानुयोगित्वयोर्म्मा-नाभावात्॥ साक्षात्परम्परासाधारणप्रतियोगिताकत्वस्यदुर्वचत्वा द्योगोलकानुयोगिकसंयोगस्यापिधूमीयपरम्परासम्बन्धघटकत्वस-म्भवेन धूमप्रतियोगिकतया धूमवान्वह्नेरित्यत्रातिव्याप्तिः। नचस-म्बन्धभेदेनापिभिन्नमेवव्यापकत्वं तत्रपरम्परासम्बन्धस्थले स्वप्रति-योगिकसमवायवत्प्रतियोगिकत्वमेवनिवेश्यते नतुप्रतियोगिकत्व मिति-नाव्याप्तिरितिवाच्यं यत्रकालिकघटितसामानाधिकरण्येनघटादेः साध्यता महाकालवृत्तित्वस्यहेतुत्वं तत्रगगनाभावस्यापिलक्षणघट-

कत्वानुपपत्तिः गगनप्रतियोगिककालिकविशेषणत्वाप्रसिद्ध्या तद्घ-
त्प्रतियोगिकत्वाप्रसिद्धेः, नचपरम्परघटकविशेषणस्य स्वप्रतियोगि-
कसम्बन्धत्वेनैवोपादेयतया गगनप्रतियोगिकविषयित्वादिप्रसिद्ध्या
तद्घत्प्रतियोगिकत्वप्रसिद्धे नाव्याप्तिरितिवाच्यं स्वसमवायिसमवेत-
त्वसम्बन्धेनघटसाध्यकघटसंयुक्तजलरूपत्वेव्यभिचारिणि रूपानुयो-
गिकसमवेतत्वे घटप्रतियोगिकसंयोगात्मकसम्बन्धवज्जलप्रतियोगिक-
त्वसत्वेनातिव्याप्तेः, एवमेवानुयोगिकत्वस्य परम्परात्मकस्य परम्प-
रासम्बन्धघटकविशेषणनिष्ठाभावप्रतियोगितयाविवक्षणेऽपिदोषउह्यः,
संसर्गताऽपिपरम्परासम्बन्धस्थलेऽनेकैवेति संसर्गताधर्मिकोभयाभा-
वविवक्षाऽप्यशक्या नचसंयोगत्वेनसंयोगस्यलौहित्यप्रतियोगिकत्ववि-
रहेऽपि स्वसमवायिसंयोगत्वेन लौहित्यप्रतियोगिकत्वस्वीकारान्नदो-
षइतिवाच्यं स्वत्वस्यसंसर्गानिविशिष्टतया किञ्चित्समवायिसंयोगा-
त्मकेन साक्षात्सम्बन्धेन लौहित्यबुद्धेः प्रमात्वापत्तेः तत्सम्बन्ध-
स्यपरम्परात्मकत्वेन लौहित्यप्रतियोगिकत्वात् प्रकारप्रतियोगिक-
विशेष्यानुयोगिकसम्बन्धावगाहिबुद्धेरेवप्रमात्वादित्यवधेयम् । प्रति-
योगिताधर्मिकोभयाभावघटितकल्पेतुनदोषः समवायिसंयोगात्मक-
परम्परासम्बन्धेन लौहित्याभावस्य समवायिसंयोगात्मकसाक्षात्स-
म्बन्धेन लौहित्याभावस्यच परस्परं वैलक्षण्योपपत्तये परम्परास-
म्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य परम्पराघटकनिखिलपदा-
र्थेपर्याप्तिः साक्षात्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकतायाश्च वि-
शेषणमात्रेतद्विशेषणस्यावच्छेदकतावच्छेदकत्वमित्यस्यस्वीकरणीय-
तया साक्षात्सम्बन्धावच्छिन्नलौहित्याभावप्रतियोगित्वे साध्यताव-
च्छेदकतापर्याप्त्यधिकरणपरम्परासम्बन्धघटकाशेषपर्याप्तावच्छेदक-
ताकत्वविरहेणोभयाभावस्याविद्यमानतया प्रागुक्तलौहित्यादिसा-
ध्यकस्थलेसद्धेतौनाव्याप्तिः नवापरम्परासम्बन्धसाध्यकेव्यभिचा-
रिण्यतिव्याप्तिः साध्यतावच्छेदकसम्बन्धपर्याप्तावच्छेदकताकनिरू-
पकताकाधिकरणत्वस्यहेत्वधिकरणेविरहेण परम्परासम्बन्धावच्छि-
न्नप्रतियोगित्वस्यलक्षणघटकत्वादिति ॥ ० ॥

सम्बन्धित्वस्यावश्यमित्यादि, इदमुपलक्षणम् साध्यवत्संयुक्त-
त्वस्यव्याप्तित्वे तस्यसाध्यवदनुयोगिकसंयोगप्रतियोगित्वरूपत्वेन सं-
योगत्वेनतत्प्रवेशा द्गौरवमिति तदपेक्षया साध्यवदनुयोगिकत्वेनप्र-

वेशो लाघवादुचितो विरोधस्यहेत्वाभासताच साक्षादनुमितिविरो-
धित्वादेव सम्बन्धत्वमपि तदनुयोगिकत्वप्रतियोगिकत्वविशेषएवे-
त्यपि बोध्यम् ॥

प्रकारताविशेष्यताभिन्नविषयत्वेति,इदञ्चतज्ज्ञानभासमानसम्ब-
न्धलक्षणं तादात्म्येनसम्बन्धत्वसामान्यलक्षणम्वा तत्प्रतियोगिकसम्ब-
न्धत्वञ्चनेद न्तथासतिसंयोगेनद्रव्यत्वप्रकारकज्ञानीयताद्दशविषयता-
श्रयस्य संयोगस्य द्रव्यत्वसम्बन्धत्वापत्तेः, नचप्रमीयत्वम्विषयतावि-
शेषणं प्रमात्वस्यतत्सम्बन्धानुयोगिकविशष्यकत्वावच्छेद्यतत्प्रकारक-
त्वरूपत्वेत्र सम्बन्धत्वघटिततया त्माश्रयप्रसंगात् प्रमात्वस्यनिश्चय-
त्ववदव्याप्यवृत्तिजातिविशेषत्वे तत्सम्बन्धत्वलक्षणत्वमपि तस्यस-
म्भवत्येन । यद्वातद्व्यक्तिनिरूपितताद्दशविषयताविशिष्टविषयत्वम्प-
रम्परायाः संसर्गत्वमंगीकृत्यविवक्षणीयं वैशिष्ट्यञ्च स्वावच्छेदकाव-
च्छिन्नत्वसम्बन्धेनेत्यपिबोध्यम् ।

दीधितौस्वरूपसम्बन्धविशेष इति, अभावस्वरूपसम्बन्धविशेष-
इत्यर्थः । नचाभावत्वस्यस्वरूपसम्बन्धत्वेऽ ननुगततयाऽनुगतप्रत्य-
यानुपपत्तिरितिवाच्यं तद्गतधर्मान्तरस्यानुयोगितात्वरूपस्या नुग-
तस्य स्वीकाराद तिरिक्तानुयोगित्वस्वीकारेऽपि निरूपकभेदेन-
सम्बन्धान्तरव त्तद्भेदस्यावश्यकतया ऽनुगमकधर्मान्तरस्यस्वीकर-
णीयत्वादितिभावः ।

दीधितावतिरिक्तएवपदार्थाइति, यथाचविषयत्वादीनामतिरिक्त-
त्वन्तदालोचनीयंभट्टाचार्यकृतविषयतावादइति ॥ ० ॥ ० ॥

गुरूणामुपदेशेन ग्रन्थार्थानाम्विचारणात् ॥
तर्कसाराभिधग्रन्थे पूर्णः सिद्धान्तसारकः ॥ १ ॥

श्रीधर्मदत्त(१)कृतिनारचितेनयत्ना देतेनमामुदमुपैतुजनोऽपिविद्वान् ।
बालोपकारकृतमेनमवैत्वसूया तीतोमुदम्भजतुचाच्छमयूखचूडः ॥२॥
स्वश्चारिचञ्चलदृगञ्चलचञ्चरीक सञ्चारिचारुचरणाब्जरसञ्चरन्तु ॥
चेतोमधुप्रणयिनःपरिचिन्तनैक लभ्यम्विनिन्दितसुधारसमद्रितुन्याः३॥

इति सर्वतन्त्रस्वतन्त्रमिथिलामण्डलमण्डनपण्डितकुलपतिझोपा-
ख्यधर्मदत्त (बच्चा) सूरिविरचितंसिद्धान्तलक्षणजागदीश्या-
क्रोड़पत्रंसमाप्तम् ॥

---

(१) प्रसिद्धझोपाख्यश्रीबच्चाशर्म्मणा ।



1136

अतः परं तु वैराग्यं कथाध्याये निरूप्यते ।
तेनैव पूर्णतां याति निरोधः सकलोपि हि ॥ ४३ ॥
कृष्णे विरक्तः किं वाच्यं तत्संबन्धात् स्त्रियोपि हि ।
कामैकरसपूर्णाश्च विरक्ताः सर्वथा मताः ॥ ४४ ॥
एतावदर्थनिर्धारे कथा यावत्य ईरिताः ।
तासां चात्रोपसंहारः क्रीडया विनिरूप्यते ॥ ४५ ॥
एवं सर्वान्समुद्धृत्य क्रीडत्यस्माकमीश्वरः ।
क्रीडायां प्राप्तसंसारः स्त्रीणामपि निवार्यत ॥ ४६ ॥
कुरर्यादिदशार्थास्तु निर्गुणेन युता गुणाः ।
महिषीहृदयापन्नाः संदेहं वारयन्ति हि ॥ ४७ ॥
मनसा तु तिरोधानाद्विह्वलास्ता निरूपिताः ।
तेन कृष्णार्थता प्रोक्ता तासां सर्वक्रियासु हि ॥ ४८ ॥
स्कन्धार्थस्तु निरोधो हि ततस्तेनोपसंहृतिः ।
अग्रेऽपि ये भविष्यन्ति कीर्तनात्तेपि तादृशाः ॥ ४९ ॥
प्रकरणमिह पूर्यतेऽनवद्यं त्रयमपि विश्वजयाय मादृशानाम् ।
निजपदसमवाप्तये च नित्यं निजगुरुणा हरिणैव लोकवन्द्यम् ॥ ५० ॥

इति श्रीवल्लभदीक्षितविरचिते तत्त्वदीपनिबन्धे श्रीभागवतार्थप्रकरणे दशमस्कन्धान्तर्गतगुणप्रकरणविवरणं समाप्तम् ।

योजना ।

प्रोक्ता । स्फुटमन्यत् । सप्तभिर्वैराग्याध्यायं विचारयन्ति **अतःपरमि**त्यादिभिः । स्कन्धसमाप्तौ वैराग्यनिरूपणप्रयोजनमाहुः **तेनैवे**ति इतरनैरपेक्ष्येण । नन्वत्र कथं भगवद्वैराग्यबोधः इत्यत आहुः **कृष्ण** इत्यादि । अत्र वैराग्ये निरूप्ये क्रीडानिरूपणस्य किं प्रयोजनमत आहुः **एतावदि**त्यादि । **एतावदर्थनिर्धार** इति करणात्मकव्यापारात्मकफलात्मकनिरोधस्य सपरिकरस्य निर्धारे । तथा च निरोधोपसंहारं बोधयितुं तदुक्तिरित्यर्थः । ननु संसारनिवृत्तौ किं गमकमित्यत आहुः **कुररी**त्यादि । **संदेह**मिति संसारसंदेहम् । यदि संसारः स्यादेवं भगवदासक्ता न स्युः । आसक्तौ गमकमाहुः **मनसे**त्यादिः । समाप्त्यध्याय एतन्निरूपणप्रयोजनमाहुः **स्कन्धार्थ** इति । उपसंहारप्रकारसूचितमर्थमाहुः **अग्रेपी**त्यादि । **त्रय**मिति इतः प्राक्तनं प्रकरणत्रयम् । **विश्वजयाये**ति 'भूयश्चान्ते विश्वमायानिवृत्तिः' इति श्रुत्युक्तविश्वमायानिवृत्तये ।

इति श्रीमत्प्रभुचरणैः पुरुषोत्तमस्य दर्शिता दशमस्कन्धान्तर्गतगुणप्रकरणनिबन्धयोजना संपूर्णा ।

श्रीघनश्यामभट्टकृतश्रीभागवतदशमस्कन्धगुणप्रकरणविभागसूचिका ।

अतःपरं येनैतादृशं चरित्रं कृतं स कृष्णः परो भगवानिति निरूपयितुं षड्भिरध्यायैर्गुणनिरूपणं क्रियते । तत्र **प्रथमे** वसुदेवस्तुतिः उपदेशदेवकीपुत्रनयनादिरैश्वर्यम् । **द्वितीये** वीर्यं द्विविधं बुद्धिक्रियाभेदेन तत्रार्जुनेन सुभद्राहरणादिकं कृतं तत्र प्रतिबन्धाभावो अनिन्द्यत्वं च भगवद्बुद्धिवीर्यं, श्रुतदेवजनकयोर्मुक्तिदानमेककालावच्छेदेनैकस्वरूप एव तद्दृष्ट्या द्विरूपोभूदिति क्रियावीर्यम् । **तृतीये** श्रुतिगीतायां यशः स्फुटमेव । **चतुर्थे** श्रीकार्यं शंकरापन्निवारकत्वात् । **पञ्चमे** भृगुपरीक्षायां लत्ताप्रहारानन्तरं क्षमैव ज्ञानकार्यम् । **षष्ठे** वैराग्यकार्यं स्फुटमेव । स्त्रीभिः सह जलक्रीडायां मनस्तिरोधानं लोकशिक्षार्थमेतावद्रहस्यधर्माचरणं वैराग्यम् । एवं सप्ताशीतिभिरध्यायैर्दशमस्कन्धप्रकरणविभागः ।

श्रीभागवतदशमस्कन्धोत्तरार्धगुणप्रकरणस्थभगवन्नामानि ।

वसुदेवज्ञानदाता देवकीपुत्रदायकः ।
अर्जुनस्त्रीप्रदाता च बहुलाश्वस्वरूपदः ॥ १ ॥
श्रुतदेवेष्टदाता च सर्वश्रुतिनिरूपितः ।
महादेवाद्यतिश्रेष्ठो भक्तिलक्षणनिर्णयः ॥ २ ॥
वृकग्रस्तशिवत्राता नानावाक्यविशारदः ।
नरगर्वविनाशार्थहृतब्राह्मणबालकः ॥ ३ ॥
लोकालोकपरस्थानस्थितबालकदायकः ।
द्वारकास्थमहाभोगनानास्त्रीरतिवर्द्धनः ॥ ४ ॥
मनस्तिरोधानकृतव्यग्रस्त्रीचित्तभावितः ।

त्रिविधनामावलिस्थगुणप्रकरणनामानि ।

वसुदेवज्ञानबोधकाय नमः । देवकीमनःपीडापनोदकाय नमः । देवादिभक्तशापादिदोषनाशकाय नमः । देवकीमृतापत्यदात्रे नमः । देवकीस्तनंधयाय नमः । भक्ताचिन्त्यसुखहेतवे नमः । सुभद्राविवाहहेतवे नमः । जनकादिज्ञानिमनोरथपूरकाय नमः । श्रुतदेवाद्युपासकसन्मार्गबोधकाय नमः । निखिलनिगमनिजजनसंस्तुताय नमः । सर्वागम्यस्वरूपाय नमः । ऐश्वर्यादिषड्धर्मस्थापकाय नमः । भक्तदुष्टवैभवनाशकाय नमः । भक्तसंकटनिवारकाय नमः । वृकादिदुष्टघातकाय नमः । ब्रह्मशिवादिवन्दितचरणाय नमः । सर्वोत्कर्षबोधकाय नमः । विप्रमृतापत्यदात्रे नमः । अर्जुनादिगर्वापहारकाय नमः । नानाविलासविलसन्मुखाय नमः । निखिलनिजजनप्रपञ्चविस्मारकाय नमः ।

इत्येवं राजलीलाया नाम्नामष्टोत्तरं शतम् ।
निरोधलीलामाश्रित्य भक्त्यै भक्तेन रूपितम् ॥
बाललीलानामपाठात् श्रीकृष्णे प्रेम जायते ।
आसक्तिप्रौढलीलाया नाम्नां पाठाद्भविष्यति ॥
व्यसनं कृष्णचरणे राजलीलाविधानतः ।
तस्मान्नामत्रयं जाप्यं भक्तिप्राप्तीच्छुभिः सदा ॥

॥ इति श्रीवल्लभाचार्यविरचिता त्रिविधलीलानामावली संपूर्णा ॥

श्रीभागवतदशमस्कन्धोत्तरार्धगुणप्रकरणानुक्रमणिका ।

वसुदेवस्य विज्ञानं देवक्याः षट्सुतागमे ।
बलिकृष्णस्तुतिकथा षण्णां गमननिर्गमे ॥
सुभद्राविजयोद्वाहो मिथिलागमनं हरेः ।
मैथिलश्रुतदेवाभ्यां पूजनं गतिरेतयोः ॥
वेदस्तुतिर्हरेर्भक्त्या दारिद्र्यविनिरूपणम् ।
आशुतोषकथा शंभोरनर्थोऽस्य वरस्य च ॥
वृकासुरवधे बुद्धेर्मोचनं गिरिजापतेः ।
मृतपुत्रप्रदानं च विप्रस्य स्वालयाद्धरेः ॥
हरेरेवास्ति देवत्वं भृगुवाक्यैश्च निश्चयः ।
क्रीडा स्त्रीभिर्हरेः पूजा विरहात् स्त्रीविभाषणम् ॥
महारथानां नामानि हरेर्वंशावलिस्तथा ।
यादवानंत्यमित्येवमुत्तरार्द्धे निरूपितम् ॥

॥ इति श्रीमद्वल्लभदीक्षितविरचिता श्रीमद्भागवतदशमस्कन्धार्थानुक्रमणिका समाप्ता ॥

गोकुलरायभट्टकृतदशमस्कन्धगुणप्रकरणाध्यायार्थः ।

निरोधकर्तुः कृष्णस्य परत्वभगवत्त्वज्ञापकगुणप्रकरणे ज्ञानाधिकाररहितस्यापि पितुर्वसुदेवस्य निजैश्वर्यबलादेवान्तरानन्ददायकसर्ववेदार्थज्ञानदानेन भक्तिसिद्ध्यर्थं वैदिकैश्वर्यप्रकटनात्, देवक्या मातुर्बाह्यानन्ददायकपुत्रदानेन भक्तिसिद्ध्यर्थं लौकिकैश्वर्यप्रकटनात्, कालग्रस्तानां स्वस्पर्शमात्रेणात्मदर्शनोत्पादनरूपमोचनक्रियया जन्मान्तरमन्तरेणैव तद्देहस्यासुरयोनिनिवृत्तिपूर्वकं मातृस्नेहोत्पादकयथावस्थितपूर्वरूपसंपादनक्रियया च समग्रैश्वर्यबोधनादैश्वर्यनिरूपणं द्व्यशीतितमेऽध्याये ।

निरोधकर्तुः कृष्णस्य परत्वभगवत्त्वज्ञापकगुणप्रकरणे सुभद्राया आधिदैविकमायात्वेन जीवभोग्यत्वाभावात् मायातो वेदानां भीतत्वेन तस्यां वैवाहिकविध्ययोगेन

विवाहस्यापि दुर्घटत्वात् भगवतश्च भ्रातृत्वेन तद्भोक्तृत्वाभावात् लोकदोषेण सर्वदा कन्यात्वेनैवस्थितेरयुक्तत्वात् पाषण्डसन्न्यासवेषिण्यर्जुने नरे स्वावेशं विधाय चौर्येण तत्प्रदाने बुद्धिवीर्यप्रकटनात् स्वस्य मुनीनां चैकेनैव रूपेण जनकश्रुतदेवयोर्गेहे एकस्मिन्नेव काले प्रवेशात् मिथिलानरयोषितां कल्याणार्थं जनकगेहे बहुकालवासे श्रुतदेवे सन्मार्गोपदेशार्थं तद्गृहे एकदिनवासेप्यग्रे कालद्वयस्य तुल्यत्वेन स्वप्नदर्शनवज्जातविस्मयेषु मुनिषु स्वक्रियावीर्यं प्रदर्श्य सहनीतप्रदर्शितवीर्यं मुनिद्वारा अन्येषामपि वीर्यवेदित्वकरणाद् वीर्यनिरूपणं त्र्यशीतितमेध्याये ।

निरोधकर्तुः कृष्णस्य परत्वभगवत्त्वज्ञापकगुणप्रकरणे पूर्वसृष्टं सर्वमापीय सुप्तस्य सर्वतत्त्वरूपस्य भगवतः शयनान्ते प्रबोधसमये तत्त्वनिरूपणप्रकारेणाष्टाविंशतिविधानां वेदानां ब्रह्मपरत्वनिर्णयार्थं तत्तत्प्रकरणसंदेहनिवारकैर्वाक्यशेषरूपैरष्टाविंशतिवेदवाक्यैरेव स्तुत्या प्रबोधने लौकिकयुक्त्यगोचरस्यालौकिकस्य कर्तृत्वादिरूपस्य यशसो निरूपणात् यशोनिरूपणं चतुरशीतितमेध्याये ।

निरोधकर्तुः कृष्णस्य परत्वभगवत्त्वज्ञापकगुणप्रकरणे भगवत एव श्रीपतित्वेन श्रीभोक्तृत्वान्मोहेन जीवैः श्रीभोगे अवश्यं दुःखसंभवात् भगवतश्च विचार्यदातृत्वाद् भक्तेभ्यो दुःखहेतुश्रियोऽदानाद्भक्तानुग्रहार्थं भक्तेषु विद्यमानाया अपि श्रियो हरणाद् भगवतः सकाशादेव प्राप्तश्रीणामविचार्यदातॄणां शंकरादिदेवानां दानेनैव संकटागमे तत्संकटस्य भगवतैव निवारणात् श्रीनिरूपणं पञ्चाशीतितमेध्याये ।

निरोधकर्तुः कृष्णस्य परत्वभगवत्त्वगुणज्ञापकगुणप्रकरणे वैकुण्ठे श्रिय उत्संगे शयाने भगवति सत्त्वपरीक्षार्थं भृगुणा लत्ताप्रहाररूपे क्रियापराधे उत्थाय नमनादिना ज्ञानचिह्नरूपायाः क्षमायाः निरूपणात् सर्वगीतार्थवेदिनापि ज्ञानरहितेन स्वस्मिन् रक्षकत्वाभिमानवतार्जुनेन द्वारकायां मृतापत्यविप्रप्रसङ्गे सर्वयादवसंनिधौ सकृष्णानां यादवानां ब्राह्मणत्वनटत्वासुंभरत्वकथनरूपवचनापराधेपि कृतनिजात्यंतपुरुषकारस्यापि विप्रापत्यरक्षणाशक्तस्य परिभ्रान्तसर्वलोकस्याप्यलब्धद्विजसुतस्यानिस्तीर्णप्रतिज्ञस्याग्निं विवक्षोः प्रतिषेधेन क्षमाया ज्ञानचिह्नरूपाया निरूपणाद् ज्ञानवतः समर्थस्यैव क्षमाज्ञानचिह्नत्वेन भूषणमिति ज्ञापयितुं सर्वागम्यादनिरुद्धस्थानादपि विप्रापत्यानयनेन सामर्थ्यज्ञानयोरपि निरूपणाद् ज्ञाननिरूपणं षडशीतितमेध्याये ।

निरोधकर्तुः कृष्णस्य परत्वभगवत्त्वज्ञापकगुणप्रकरणे सर्वसंपत्समृद्धायां द्वारकायां सर्वभोगयुक्तकृष्णस्त्रीणां भगवता मानसतिरोधाने विरहव्याकुलानां कुरर्यादिदशार्थनिरूपणमुखेन भगवदतिरिक्तेऽनासक्तिरूपवैराग्यनिरूपणात् कृष्णे कैमुत्येन वैराग्यबोधनाद् वैराग्यनिरूपणं सप्ताशीतितमेध्याये ।

॥ इति निरोधनिरूपणे दशमस्कन्धः ॥

उत्तरार्धसूचनिका ।

षट्त्रिंशोऽध्यायः । एवं कालवेदोल्लङ्घनं श्लो० ४-५-६ सर्वेषु प्रकारेषु भगवानेव कर्तेत्यादि । श्लोकः ९ स्फोटः ब्रह्मवादे दिग्धर्मः आकाश इत्यादि 'नादो वर्णस्त्वमोंकारः वर्णोत्पत्तिः । श्लोकः १० कार्यतारूपत्वम् । श्लो० २४।२५।२६।२७ अखण्डबोधः । श्लोकः २९ तथापि लोको न जानाति इति साधनान्तरेण यतनेन हि चिन्तामणिं प्राप्य पुनरन्यत्साधनमङ्गीकरोति । श्लोकः ३४ अष्टाविंशतितत्त्वेभ्योऽधस्ताद् योगमाया । श्लोकः ४४ न लौकिका न वैदिका निषिद्धभावनयाधःपतिताः । श्लोकः ४५ युष्मत्पादारविन्दे धिषणा येषां तेभ्यो ये अन्ये तेषामेव गृहं तदन्धकारवद्भवतीत्यादि । श्लोकः ४६ ननु शास्त्रीयमेव कर्तव्यं 'पुमान् यच्छ्रद्धया तिष्ठन् विधिनियोगान्निवर्तते' । श्लोकः ५५ पीतशेषं गदाभृत इत्यत्र देवैरमृतं तत्र स्थापितमिति यदैव भगवन्तं स्मरति तदामृतं भगवान् पिबति । **सप्तत्रिंशोऽध्यायः** । श्लोकः १४ अभिमानाभावे इतराश्रमेभ्योपि गृहस्थाश्रम एव मुख्य इत्यादि, अत एवायं कर्ममार्गानुसारी भक्तः निर्वर्तितनिजक्रियः मूलं । श्लोकः १६ यथा कर्मनिष्ठः प्रियः इत्यादि । श्लोकः १९ निरीक्षणेनार्घ्यं गृह्णात्यपि । श्लोकः २० फलरूपेणापि भजन इत्यादि । श्लोकः २१ तेन कीर्तनीयत्वं निरूपितम् । श्लोकः २२।२३ कायिकं ऐन्द्रिकं भजनम् । श्लोकः २४ नमनमेव कर्तव्यम् । श्लोकः २८ तदपो लोकपावनीः मूर्ध्नि बिभ्रत्ततः पूजायोग्यो भूत्वा इत्यादि । श्लोकः ३१।३२ तथापि भक्तिमार्गेण स्मरताम् । ननु दर्शनस्य क्वोपयोगः न हि दर्शनार्थमित्यादि । श्लोकः ३३ ब्रह्मात्मभावे साधनत्रयमित्यादि । श्लोकः ३४ पापवशतः बहिर्मुखतादि सर्वे दोषाः संसर्गिदोषाद्वा । श्लोकः ३९ सिंहासनापेक्षया तान्येव प्रियाणि । श्लोकः ४२ मानसीपूजार्थं तस्यालोचनमाह । श्लोकः ४६ पञ्चविधभक्तयः । श्लोकः ५० यत्कर्तव्यं तदेवोपदेक्ष्यति न तु सेवककृत्यं स्वस्य सेवां निरूपयति सेवायां दुर्लभत्वं द्योतितम् । श्लोकः ५५ अर्चा ब्राह्मणयोर्व्यवस्थयैवार्चा । श्लोकः ५८ एकान्तभावेन अनन्यभक्त्या नान्यथात्रास्मत्त्वम् भेदप्रतियोगि न प्रतिमा अन्यथा महता प्रपञ्चेन निरूपितस्यैकादशे भगवद्भजनस्य विरोधः । श्लोकः ५९ तस्मै सन्मार्गमादिश्येति सतां गतिर्भगवांस्तत्र मार्गभूता ब्राह्मणा इति तेषां भजनमादिश्य । **अष्टत्रिंशोऽध्यायः** । 'प्रमेयमपि वै बृहत् स एव भगवान् कृष्णः ततो भजनमीरितम्' । 'मतान्तरोक्तिरेषा हि सिद्धान्ते वैदिके तथा । अनन्तगुणपूर्णो हि हरिर्ब्रह्म श्रुतिस्तथा' । 'फलप्रमेयमानत्वं सच्चिदानन्दतां गतम्' । 'कर्म सदिति चोच्यते' इति गीता । त्रयमेकं आत्मा तु स्वाश्रयाश्रयः स्वशक्तिं त्रेधा स्वस्मिन्नाश्रये निधाय हि । श्लोकः २ अनेन वेदानामपि खण्डशोऽर्थप्रतिपादकानां बुद्ध्या महावाक्यार्थज्ञानं भवतीति तात्पर्यतो ब्रह्मप्रतिपादकत्वं सेत्स्यति । आत्मने आत्मनिष्ठां भगवत्सेवां च कुर्वन्ति । श्लोकः ३ उपनिषदर्थः उपनिषद्विचारेणैव संदेहा निराकर्तव्याः । श्लोकः ५ क्व भगवतो माहात्म्यज्ञानं भविष्यतीति पर्यटन् । श्लोकः ९ ब्रह्मसत्रलक्षणम् ।

श्लोकः १२ अष्टाविंशतितत्त्ववाक्यशेषाः अष्टाविंशतिश्लोकाः नैतावता सर्ववेदसंदेहनिवृत्तिः । श्लोकः १६ 'शान्त उपासीत' 'शान्तो दान्तः' इत्यादि श्रुतितात्पर्यं पुष्टिविचारेण कृतार्था अपि मर्यादायामकृतार्था उच्यन्ते । श्लोकः १७ अथ च ये भगवत्सेवकाः तेषां सर्वभावेन भजनं युक्तमिति च भगवच्छेषतया देवतान्तरभजन इत्यादि कृष्ण एव सदा सेव्यः इति । श्लोकः १८ तस्यैवाधिभौतिकरूपं ब्रह्मलोक इति । श्लो० १९ अनुप्रवेशश्रुतिनिर्णयः । यत्र प्रविशति तत्र तत्समो भूत्वा प्रविशति । श्लोकः २० वेदानां प्रतिपाद्यो भगवदङ्गैरेव यागा अपि चरणरूपाः सर्गोऽपि इति मुख्यः सिद्धान्तः । अतः पण्डिता इममर्थं ज्ञात्वा भगवदङ्गमेवोपासते आनन्दनिधिं भूमौ भगवति विश्वसिताः । 'गुप्तानन्दा यतो जीवा निरानन्दं यतो जगत् । पूर्णानन्दो हरिस्तस्माज्जीवैः सेव्यः सुखार्थिभिः' । श्लोकः २१ मोक्षापेक्षया कथाश्रवणरसोऽधिकः । श्लोकः २२ कदाचिद्भजनीयो भगवान् प्रतिबन्धं कुर्यात् तदा का गतिरित्यादि 'असत्सङ्गो न कर्तव्यो भक्तिमार्गस्य बाधकः । देहे ह्यनुगुणे कृष्णे नेन्द्रियाणां प्रियं चरेत्' । श्लोकः २३ एवं भगवद्भजनमेव जीवानामवश्यकर्तव्यं 'तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्' इति भगवच्चरणपरतैव प्रयोजिका न तु प्रकारविशेषः प्रयोजक इत्यादि । 'सर्वे एव हरेर्भक्तास्तुल्या यान् मन्यते हरिः । अतः कृष्णो यथात्मीयान् मन्यते भजनं तथा' । श्लोकः २४ 'ज्ञानमार्गो भ्रान्तिमूलः ततः कृष्णं भजेद्बुधः । प्रवर्तकं ज्ञानकाण्डं चित्तशुद्ध्यै यतो भवेत्' । श्लोकः २५ एवं ज्ञानकाण्डस्यापि भगवद्भजनपरत्वमित्यादि । निर्दुष्टत्वान्मार्गस्य भगवान् सेव्यः 'भ्रान्तिमूलतया सर्वसमयानामयुक्तितः' इत्यादि । श्लोकः २६ 'जीवानां ब्रह्मरूपत्वाद् दोषा अपि च मानसाः' इत्यादि । श्लोकः २७ सेवामात्रेणैव मृत्योर्जयो भवतीत्यादि । ये हि निरन्तरं सेवां कुर्वन्ति ते वैकुण्ठे अपेक्षन्त इत्यादि । वैदिकादिधर्मानुल्लङ्घ्य भगवत्सेवां कुर्वन्तीत्यादि । 'सर्वं मद्धिष्ण्यमीक्षध्वं' इति सगुणभक्तिमार्गनिषेधः । तवेति यथा त्वत्संबन्धिनं यं कंचित्पदार्थं परिचरन्ति भगवत्सेवका एव सेवायां तान्नियोजयन्ति । 'सर्वथा सर्वतः शुद्धा भक्ता एव न चापरे । अतः शुद्धिमभीप्सद्भिः सेव्या भक्ता न चापरे' । श्लोकः २८ स्वभावरक्षका अपि प्रभुसेवां कुर्वन्ति 'सर्वसेव्यो नियन्ता च' सर्वसमर्थं स्वरूपमेव । श्लोकः ३० ॥ जीवा न व्यापका व्यापकत्वे जीवानां दासत्वं न स्यात् । श्लोकः ३१ । ये मायया मुग्धा भविष्यन्ति ते पुनर्भगवन्तं सेवन्ते तेषां पुनर्मायामोह इत्यादि । यदैव सद्बुद्धिस्तदैव भगवद्भावः कर्तव्यः 'नृणां दुर्गतिमालोक्य ये सेवन्ते दृढव्रताः । कृष्णं तद्भ्रुकुटिः कालः' इत्यादि । श्लोकः ३३ योगादिना भजनं न कार्यसाधकं इत्यादि' 'गुरुसेवापरो भूत्वा भक्तिम्' । श्लोकः ३४ 'पुत्रादींश्च परित्यज्य कृष्णः सेव्यः' इत्यादि । श्लो० ३५ भगवद्भजने क्रमः प्रथमं भूमिःतीर्थादिगुरुचरणारविन्दजले न पापक्षयः गुरुहृदयस्थभगवच्चरणारविन्दप्राप्तिरित्यादि । श्लो० ३८ भगवानेव सेव्यो हि न तु जीवाः इत्यादि । श्लोकः ३९ जीवादन्यत्र भगवद्भजने । श्लोकः ४० नित्यकर्मणा भगवता च सर्वपापक्षयात् आनन्दं हरिं भजेत् न तु लौकिकानन्दम् । श्लोकः

४१ भगवदानन्दो देशकालापरिच्छिन्नः वेदानन्दमपि, तेनैकस्यैव ब्रह्माण्डस्य वार्तामेको वेदो वदति इत्यादि श्रुतय एव प्रमाणं परं पर्यवसानतया न तु वृत्त्येति, तस्मादेतादृशः परमानन्दरूपः कृष्णएव सेव्यो नान्यः इति सर्वेषां वेदानां पर्यवसितोर्थः। अत्र मूलभूताः श्रुतयः स्वयं द्रष्टव्याः इति श्रुतिगीतम्। श्लोकः ४३ इत्यशेषसमाम्नायपुराणोपनिषद्रसः। श्लोकः ५० संक्षेपेण श्रुतिगीतार्थः। **एकोनचत्वारिंशोध्यायः** 'एवं कृष्णस्य मूलत्वे संदिहानस्य संशयः। निवारितोतियत्नेन येन कृष्णः परः स्मृतः'। 'भजनीयगुणेत्वत्र संदेहः कश्चिदुद्गतः' इत्यादि भगवद्दोषपरिहाराध्यायारम्भः। श्लोकः १ त्रिविधा जीवा उपासनासमर्थाः। श्लोकः ३ यदि सर्पान्नधारयेत् तदा सेवकाः कुण्डलिनीव्याप्ताः तयैव हताः स्युः। श्लोकः ५ तं भजन्निर्गुणः यथा गजेन्द्राय पूर्वावस्थितेत्यादि उपासकानामात्मा तद्धितमेव करोति न तु तदनुरोधं ततो यदैव यद्विना यत्कार्यं न भवतीत्यादि। श्लोकः ८-९ यस्यानुग्रहमिच्छामीत्यादि। श्लोकः १२ भगवत्सेवैव पुरुषार्थः परमः। श्लोकः २० प्रपत्तिः प्रीतिहेतुः। श्लोकः २६ देवस्थानं वैकुण्ठं यत्र बदरीनाथः। श्लोकः ४० विवेकनिधेर्भगवतः। **चत्वारिंशोध्यायः**। वरोत्र मूलरूपेण निरूप्यते महत्त्वलक्षणज्ञानशक्तिः। क्रिया गुरुपुत्रानयनादि तत्पर्यवसायिनी। श्लोकः १५ एवं षोडशकलो भगवान् मार्गे मार्गरीतिः। श्लो० १६।१७।१८।२० संशयनिवृत्त्यर्थं स्वयं भजनं कृत्वा गन्तुं योग्यं भगवन्तं गताः। श्लोकः ६४ अत्यूर्जितैर्मखैरीजे भगवान् विषयाल्लौकिकाद्वैदिकान्यज्ञान् सर्वे प्राणिनस्तेनैव जीवन्तीत्यादि। **एकचत्वारिंशे** रागलीला स्नेहलीला आनन्दक्रीडा भक्तानां सुखसिद्ध्यै परमोत्सवलीला। श्लोकः २७ प्रेम्णान्तरसंबन्धः पादसंवाहनादिभिरिति बाह्यः अनेन प्रपञ्चविस्मृतिरुक्ता तदासक्तिमाह। श्लोकः ४७ अद्यापि द्वारकायां प्रभुः सेवकैः सह विराजते इति। श्लोकः ५० यस्य श्रवणमात्रमपि राज्यापेक्षयापि सर्वोत्कृष्टम् 'सिद्धान्ताः सत्कर्मागमाश्च वितता लोकेऽधुना सर्वतस्ते प्रायेण निरूपिताः सुबहुशो भक्त्यै मुकुन्दाङ्घ्रये' इत्यादि शुभं सर्वं उत्तरार्धसूचनिकापत्रमत्र निःशेषमभूत्।

स्वतन्त्रलेखः।

॥ श्रीहरये गुरवे नमः॥

नत्वा श्रीवल्लभाचार्यचरणाम्भोजसंश्रयात्। श्रीमद्भागवते पीतशेषपद्यं यथार्थते॥

अथ भगवत्स्वरूपे श्रीभागवते तद्धृदयभूतदशमस्कन्धोत्तरार्द्धे पंचाशीतितमेऽध्याये श्रीदेवकीमातृचरणषट्पुत्रानयनप्रसङ्गे पठ्यते।

पीत्वाऽमृतपयं तस्याः पीतशेषं गदाभृतः। नारायणाङ्गसंस्पर्शप्रतिलब्धात्मदर्शनाः॥ १॥
ते नमस्कृत्य गोविन्दं देवकीं पितरं बलम्। मिषतां सर्वभूतानां ययुर्धाम दिवौकसाम्॥२॥
इति (स्कं. १० उ. ३६.५५-५६)

अत्रहि तस्याः देवकीमातुः अमृतमयं अमृतप्रचुरं 'तान्दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी अपाययत्स्तनं प्रीता' इत्युक्त्या योग्यता बलेन पय इत्युपलभ्यते, पाठान्तरे तु पय इति स्पष्टमेव । गदाभृतो भगवतः श्रीकृष्णस्य पीतशेषं पानोच्छिष्टं पीत्वा नारायणाङ्गसंस्पर्शेन प्रतिलब्धात्मदर्शनाः, गोविन्दं देवकीं पितरं वसुदेवं बलं च नमस्कृत्य सर्वभूतानां मिषतां दिवौकसां धाम ययुरित्यन्वयः । अत्र ब्रह्मशप्तानां मरीचिपुत्राणां स्वर्लोकप्राप्तौ हेतुत्रयं । भगवदुच्छिष्टपानं । 'उच्छिष्टभोजिनो दासास्तवमायां जयेमहि' इति वाक्यात् । तस्य तादृक् प्रभाववत्त्वं न चात्रमुक्तिर्नेतिशङ्क्यं । 'पुनर्यास्यन्ति सद्गतिम्' इति पूर्वोक्त्या गतेर्मोक्षपर्यायत्वात् । लोकान्यास्यन्ति । 'विज्वरान् दिवौकसां धाम'इत्यत्र तथा व्याख्यानं कर्तव्यम् । यदा तु शापाद्विनिर्मुक्ता, इतिश्रुतमङ्गीकृत्य क्रममुक्तिरपेक्षते तदा तु अमृतपानं च हेतुः । 'यज्ञशिष्टामृतभुजो यांति ब्रह्मसनातनम्' इत्युदाहृते । तत्र क्रममुक्तेरेवोपपत्तेः, प्रकृतेपि कारणात्कार्यमनुमेयमिति न्यायात् मुक्तिरावश्यकी । अथ नारायणांगसंस्पर्शश्चापरो हेतुः । 'यन्नामगृह्णन्निखिलांच्छ्रोतृनात्मानमेव च । सद्यः पुनाति किंभूयस्तस्य स्पृष्टपदाहिते' इति उक्तेः । तथा भगवत्प्रसादश्च मुख्यो हेतुः । 'त इमे मत्प्रसादेन' इत्यत्रदर्शितोऽपरो हेतुः, 'यमेवैष वृणुते तेन लभ्यः' इति श्रुतेः । 'मिषतां सर्वभूतानाम्' इत्यत्र षष्ठिः भावलक्षणोऽनादरे वा अभिलषतः सर्वाननादृत्य 'सर्वभूतमयो ब्रह्म'इति ब्रह्मशापमुलङ्घ्येति वा विवक्षितोर्थः । अस्मिन्पूर्वपद्ये 'गदाभृतः पीतशेषम्' इति स्तन्यविशेषणमुक्तं तत् 'देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः' इत्युपक्रम्य 'तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधम्' इतिनिरूप्य 'उपसंहर विश्वात्मन्नदो रूपमलौकिकम्' इति प्रार्थनां प्रदर्श्यालौकिकस्वरूपोपसंहारानन्तरं क्षणमेव 'पित्रोः संपश्यतोरेव बभूव प्राकृतः शिशुः' इति शिशुभवनं निरूप्य 'ततश्च शौरिर्भगवत्प्रचोदितः' इत्यविलम्बेन गोकुलगमनं निरूप्यते । अथ च 'एकादश समास्तत्र गूढार्चिः सबलोवसत्' इत्यनेन एकादशवर्षस्थितिस्तत्रोक्ता । ततः कंसवधानन्तरं पित्रोः समागमे 'सष्वजाते न शङ्कितौ बाल्यपौगण्डकैशोरा पुत्राभ्यामभवन्क्वचित्' इत्याद्युक्तः । तत्र स्तनस्पर्शस्याप्यप्रतीतेः । ततः 'गर्गाद्यदुकुलाचार्याद्गायत्रं व्रतमास्थितौ' इत्युपनयनमुक्तम् । तदनन्तरं च मानुषिस्तन्यपाननिषेधात् भगवतो देवकीमातृस्तनपानमेव न क्वचित्प्रतीयते, दुराग्रहस्वीकृते अपि स्तनपाने तदानीं तदभावाच्च कथं पीतशेषत्वसिद्धिरिति पूर्वग्रन्थानुसंधानस्य 'अलौकिकास्तु ये भावाः न तांस्तर्केणयोजयेत्' इतिश्रुतिः । पराङ्मुखस्य दुर्वासनादूषितस्वान्तस्य शङ्कासमुज्जृम्भते तत्र समादध्मः । तत्र श्रीमहाप्रभुचरणाः सुबोधिन्यामेतत्पद्यव्याख्याने स्तनपानानन्तरं तेषां विवेकाद्युत्पत्त्या स्वर्लोकगतिमाह पीत्वामृतमयमिति द्वाभ्याम् अमृतमयत्वं भगवदर्थदेवैस्तत्रामृतस्थापितमिति । पीतशेषं गदाभृत इति पानं तु पूर्वस्थापितं यदेव भगवन्तं स्मरति तदाद्भुतं भगवानेव पिबतीति । अत एव यदाह वः समागत्य इति अत्र पित्रव्योपनामकश्रीवल्लभचरणैः कृतं व्याख्यानं

दैवैरिति स्तन्योत्पादकैर्भगवद्विषयस्नेहांशैरित्यर्थः । पूर्वं स्थापितमिति निबन्ध इत्यर्थः । तथा च निबन्धे 'नन्दादिवदिदानीं हि देवक्यापि पुरस्थिता । अतः स्नेहदशायां हि स्तन्यं नित्यं हरिः पपौ ॥ १ ॥ पीतशेषमतः प्रोक्तं वैष्णवत्वाय मुक्तये । प्राकृतत्वदशायां च सद्यःपीतं विनिर्गमे ॥ २ ॥ 'उच्छिष्टभोजिनो मायां तरंत्येव न संशयः' इति । अत्रावरणभङ्गे नन्दादिवदिति हि यतो नन्दादिवत्कुरुक्षेत्रस्थदर्शनजन्यदशायां यथानन्दादयो निरोधपूर्णा जातास्तथा देवक्यपि पुरा पूर्वकाले निरोधपूर्णा स्थिताऽतस्तथेति तथोक्तं सुखेन संगच्छत इत्यर्थः । नन्वेवं सति तदैव कृतार्थाः स्यान्नात्रेत्यरुच्यपक्षान्तरमाहुः प्राकृतत्वेत्यादि । अत्रायं समुदितोर्थः । स्तन्यं हि स्नेहप्रस्नुतं भवति नच दंष्ट्रा यमस्नेहकलाद्विजानीत्युक्त्या तत्र प्रकरणोद्दलितसुबोधिन्यादिव्याख्यानेन च 'अभिमानिव्यपदेशात्' इति व्याससूत्रेण च, 'आत्मादिस्तम्बपर्यन्तैः' इति निदर्शनेन च देवतात्वं लक्ष्यते तस्य च 'भवद्भिरंशैर्यदुषूपजन्यताम्'इति ब्रह्मण आज्ञया 'जनिष्यते तत्प्रियार्थं संभवन्तु सुरस्त्रियः' इत्यत्र भवन्तु सुराः तत् स्त्रियश्च भवन्तु इत्यर्थस्य सुरैः सहितास्त्रियः इति समासेन विवक्षणात् प्रियकरणार्थं नियोजितानां 'यद्यद्भगवता दत्तमधिकारं स्वसिद्धये सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप' इति स्वधिकृतेष्टवस्तुसमर्पकाणां देवानां कोप्यन्तःस्थितस्य स्नेहाभिमानी देवतांशभूतैर्मोहादिदेवैर्देवक्यां स्तनयोरमृतं पयसि स्थापितं तस्य च पानं पूर्वग्रन्थे निबन्धे नन्दादिवदित्यादिना साधितं, तथाहि भगवतो गोकुलगमनानन्तरं देवक्या वात्सल्यरसेन तीव्रविरहवेदनायां 'यदाह वः समागत्य कृष्णः सत्यं करोति तत्'इति उद्धवेन भगवद्वचनस्य सत्यकरणे इत्यस्य वर्तमानदशायां प्रतिज्ञानात् प्रतिज्ञातस्य च भगवत्कृत्या 'मयापरोक्षं भजता तिरोहितम्' इत्यनेन दर्शनायोग्यपरोक्षावस्थानस्य तिरोहितपदार्थत्वेनोक्तस्य 'क्वासि क्वासि महाभुज' इत्यत्र वियोगदशायां तत्रत्यव्याख्यानेन परोक्षभुजाधानानुष्ठानस्य प्रदर्शनेन समर्थितस्यापि भक्तानां दृष्ट्या 'दुःसहप्रेष्ठविरहतीव्रतापधुताशया ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः' इत्याद्युक्तदशाविरहाङ्गीभूतध्यानेन सुप्रदर्शनेन चाविर्भावेन च 'द्रक्ष्यथ कृष्णमन्तिके' इत्यज्ञानोपसंहारद्वारा भगवदाज्ञया विषयज्ञापनेन च 'अन्तर्बहिः स भूतानां आस्ते ज्योतिरिवैधसि' इति ब्रह्मदृष्ट्यापि वक्तुं शक्यस्य निरूपितत्वात् । एवं नन्दादिषु विरहे प्राकट्यवत् तुल्यकारणयोः तु कार्यं इति न्यायेनाविर्भावस्य संभवात् । प्रकृतिवचनेन तद्दृढीकरणाच्च देवक्याः स्तन्यपानं तदाविर्भूय कृतमिति पीतशेषत्वसिद्धिरित्येकपक्षः । अथवा यदैव देवकी अत्युत्कण्ठिता मम पुत्रः श्रीकृष्णः कदा श्रीमुखं दर्शयिष्यति स्तन्यं मे पास्यति एवं एवं भगवन्तं स्मरति तदा स्नेहेन स्नुतं पयो भवति तदा तस्य स्नेहाभिमानी देवैर्देवक्या च भगवदर्थं मनसा संकल्पितस्य भगवद्भावत्वाद्भगवतैव ग्रहणमुचितं 'अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् । पत्रं पुष्पं फलम्' इत्यादिवचनैः, 'गोमायुवन्मृगपतेरिव भागमीषे' इत्यादिलोकोक्तिनिदर्शनैः नाभागप्रकरणीययशोदेशकस्वीकाराग्रहविषयकं 'ममेदं वास्तुकं वसु' इति रुद्रादिवाक्यादिदृष्टान्तैः ।

'कृष्णस्तन्यतमं रूपम्' इति स्वस्यापि तथानुष्ठानेन च भगवान् एव पिबतीति पीतशेषत्वसिद्धिरिति द्वितीयपक्षः । अथवा एतद्बालेति । एते षड्बालकाः देवक्याः प्रतियातु कुमारोऽयमित्यादिना कुमारशब्दोपलक्षितषड्वर्षपर्यंतभोजराजेनानुकम्पिता नारदागमनात्पूर्वं यथा स्तन्यं पपुरेवं भगवानपि गोकुलगमनात् प्राक् 'बभूव प्राकृतः शिशुः' इति प्राकृतशिशुभवनदशायां पपुस्तत्प्राकृतैरेव प्राकृत इति 'संबाहुभ्यां धमति' इति श्रुतिलिङ्गाद् द्विभुजत्वावतारणपरव्याख्यानस्य 'जानीत परमं तत्त्वं यशोदोत्संगलालितम्' इति भाष्यात् यशोदायाः स्तनंधयरूपसूचनार्थपरत्वसंभवात् । प्राकृतदशायां हि 'सद्यः पीतं विनिर्गमे' इति निबन्धेन दृढीकरणाच्च मूलत्वं सिध्यतीति पीतशेषता सिद्धिरिति तृतीयपक्षः । अथवा षड्बालाः 'नीतास्ते योगमायया' इति वचनात् बलिगृहगमनानन्तरं समागताः तथा भगवानपि गोकुलगमनानन्तरं समागतः कंसवधानन्तरं प्रथमं मिलितः देवक्याः स्तनं पपौ तत्रापि 'पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमं, मा भूदिति निजां मायां ततान जनमोहिनीम्' इत्यप्राकृतस्वरूपगोपनद्वारा प्राकृतशिशुभवनदशायां संभवाविनिर्गमे इत्यस्य च विगतो निर्गमः विनिर्गम इत्यर्थः । संभवाच्च प्राकृतदशायामिति निबन्धस्यैव प्रमाणत्वमिति सिद्धा पीतशेषतेति चतुर्थः पक्षः । अथवा देवक्या 'चिरान्मृतसुतादाने गुरुणा किल चोदितौ, आनिन्यतु पितृस्थानाद् गुरवे गुरुदक्षिणाम्' 'तथा मे कुरुतं कामं युवां योगेश्वरेश्वरौ भोजराजहतान् पुत्रान् कामये द्रष्टुमागतान्' इति निजपुत्रदर्शनमात्रप्रार्थनायां भगवन्तौ बलिं प्रतिगत्वोचतुः 'इत एतान्प्रणेष्यामो मातृशोकापनुत्तये, त इमे मत्प्रसादेन पुनर्यास्यन्ति सद्गतिम्' इत्यत्र प्रसादशब्देन निजोच्छिष्टनैवेद्यस्य प्रकरणात् प्रसिद्धेष्वसंभवात् 'तान्दृष्ट्वा बालकान्देवी' इत्यत्र तच्छब्देन रामकृष्णविशिष्टमष्टानामेव नारायणाङ्गसंस्पर्शेति हेतुना व्याख्यातुमुचितत्वात् । एत इववेत्यत्रापि बालकवद्रूपं कृत्वा भगवान्प्रथमं श्रेष्ठत्वात्प्रियत्वाच्च समागतः देवक्या उत्सङ्गे बालैः सह स्थित्वा पपौ, ततः भगवतो गदाभृतः पीतशेषं अन्ये पीत्वा कृतार्था जाता इत्यपि प्राकृतत्वदशायामिति निबन्धेन बलिगृहगमने अप्राकृतः । पुनः स्वगृहागमने 'बभूव प्राकृतः शिशुः' इतिवत् प्राकृतशिशुभवनदशायाः संभवात् 'तान् दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी' इत्यत्र तत्पुत्रशब्दयोरसंकुचितवृत्त्या 'मोहिता मायया विष्णोः' इत्यनेन च 'मेने सुविस्मिता मायां कृष्णस्य रचितां नृप' इत्यत्र कृष्णपदमात्रोपादनाच्च दृढीकरणेन ध्वननात् इति पञ्चमपक्षः । एवं विरहदशायामाविर्भूतस्य भगवतः तथा भगवदर्थसंकल्पितस्य भगवत्स्वीकारविषयत्वेन तथा प्राकृतशिशुभवनदशायां शिशुक्रियाप्रकटनेन तथा कंसवधानन्तरं प्रथममिलने स्नेहातिशयेन प्राशनादिसंस्काराङ्गत्वेन वा तथा बलिभवनादागमनानन्तरं स्वकीयजनोद्धारार्थं षड्बालकवत् बालकभवनेन देवक्याः स्तनपानं भगवतः पंचधा समर्थितमिति सुबोधिन्या मतेन पीतशेषत्वसिद्धिः ।

श्रीहरये गुरवे नमः । अथ संदर्भमतेन पीतशेषत्वं साधयामः । तत्र तदर्थसंग्रहश्लोकः ।

वृष्णित्वे पृष्णिगर्भोऽप्यदितिजनुषि यो वामनो देवकीत्वे ।
श्रीकृष्णः प्राकृतः सन् शिशुरथ विरहे भक्तदुःखाऽसहिष्णुः ॥
विष्णुः कंसं निहत्वोक्तकृतिसुमिलने मङ्गलोपक्रमे वा ।
मातुः स्तन्यं जघासैतदमृतरसतो मोचयन् स्वान्पुनातु ॥

अत्रैवं योजना श्रीमद्भागवते दशमोत्तरार्धे श्रीदेवक्या मृतपुत्रदानप्रसङ्गे 'पीत्वामृतं पयस्तस्याः पीतशेषं गदामृतः । नारायणाङ्गसंस्पर्शप्रतिलब्धात्मदर्शना' इति श्रूयते, तत्र देवक्या अमृतं पयः गदाभृतो भगवतः पीतशेषं पानोच्छिष्टं पीत्वा नारायणाङ्गसंस्पर्शेन प्रतिलब्धात्मदर्शना जाता इत्यन्वयः । अत्र यद् गदाभृतः पीतशेषत्वं पयोविशेषणमुक्तम् तत् 'जातो गतः पितृगृहाद्व्रजमेधितार्थः' इत्यादितत्रत्यवाक्यैः पानस्यासंभवात् कथं पीतशेषता सेत्स्यतीति शङ्कायामाह वृष्णित्वे पृष्णिगर्भेति । 'त्वमेव पूर्वसर्गेभूर्वृष्णिः स्वायंभुवे सति तदायं सुतपा नाम प्रजापतिरकल्मषः' इत्युपक्रम्य 'मादृशो वां वृतः सुतः' इत्युक्त्वा 'अहं सुतो वामभवं पृष्णिगर्भ इति श्रुतः' इति तत्रैव भगवदुक्तेः पृष्ण्या देवक्या चैक्यात् वृष्णिजन्मनि पृष्णिगर्भेण भगवता पीतं स्तन्यं देवकीजन्मन्यपि पीतशेषत्वं संपादयतीति भावः । ननु जन्मान्तर्योर्भेदाः कथं तत् सिद्धिरिति चेन्न, 'भवान्नारायणसुतः शम्बरेणाहृतो गृहात् अहं तेधिकृता पत्नी रतिः कामो भवान्प्रभो' इत्यत्र पूर्वजन्मसंबन्धि-भर्तुः पूर्वजन्मस्थाया रत्या अपरजन्मनि कामस्य भर्तृत्वमिवेहापि पृष्ण्या देवकीत्वमवधारय । ननु जीवे तादृक् व्यवहारापत्तौ द्रव्ये साध्यतां 'तत्पादसलिलं यथा' इत्यादौ साधितमेव नच पृष्णिगर्भदशायां पानं कृतमिति कुतो लभ्यते । देवसर्गे मातुरनुग्रहादुत्तैवसंहननांगा इत्यादि पंचमस्कन्धोदाहरणात् स्तनपानाव्यवहाराभावाचेति वाच्यं । 'वरं ब्रूहि वरं ब्रूहि वरं ब्रूहि यथेप्सितम्' इति सुतपसंप्रति भगवद्वचने । 'तनयं देहि तनयं तनयं नौ स्तनं-धयम्'इति पृष्णिसुतपसोः प्रतिवचने पुराणान्तरीयस्तनंधयसुतप्रार्थनाश्रवणात् । नच स्तनंधयपदमार्षेपि लक्षकं श्रुतार्थबाधापत्तेः । किंच 'देशिनी रोदमानाया निदधे स दया-न्वितः'इति मारिषां प्रकृत्य षष्ठस्कन्धात् । स्कन्दस्य षट्कृत्तिकास्तनपानार्थं षड्मुखकरणो-दाहरणात् । देवसर्गेपि स्तनपानस्य व्यवहारस्य दृढीकरणत्वात् । ननु युक्त्या सिद्धेपि वचनमपेक्षितं तत्राह । 'अदितिजनुषि यो वामनः' इति तदधिवामनध्याने साधनरत्नमा-लायां 'स्वात्मनः कामयत्पुत्रमरोगं चिरजीवनम् । ध्यायेददित्या उत्सङ्गे वामनं स्तनपायि-नम्'इति द्रष्टव्यम् । ननु प्रकृतग्रन्थे वामनावतारे तस्य क्व सावकाशः । 'बभूव तेनैव स वामनो बटुः'इत्युक्त्या स्तनपानाख्यसंस्कारार्थ एव सेति ग्रहणम् । नन्वदित्या देवक्या कः संबन्धः 'तयोर्वां पुनरेवाहमदित्यामास कश्यपात्' इति स्वीयत्वमेव । ननु 'बहूनि मे व्यतीतानि जन्मानि तव चार्जुन' इति भगवदुक्तन्यायेन देवकीकृष्णयोः जन्मान्तरस्य वचनानुभवसिद्धत्वात् कथं तत्रत्यस्तनपानेन प्रकृते पीतशेषता साध्यते इति चेत्तत्राह देव-

किंत्व इति । 'तृतीयेस्मिन्भवेहं वै तेनैव वपुषानघे । जातो वां पुनरेवाहं सत्यं मे व्याहृतं सति' इति भगवदुक्तौ तेनैव प्राकृतेनैव वपुषा विद्यमानयोर्वां तृतीयेस्मिन् आविर्भावतिरोभावरूपया अघटितघटनपटीयस्या मच्छक्त्या तृतीयेस्मिन्भवे 'मृत्युरत्यन्तविस्मृतिः' 'जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद, विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथौ' इत्यादि एकादशस्कन्धोक्तरीत्या ज्ञानमात्ररोपिते जन्मनीत्यन्वये देवक्याः पृष्ण्यादितिभ्यामभेदः सिध्यति । अत एव 'तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप' इत्यत्र जन्माजन्मप्रयोजक अज्ञानज्ञाने कारणं तु तयादर्शितेति तदपवादार्थं 'एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे' इति भगवता पृष्ण्यादिस्वरूपसूचनादभेदो विनिर्गमितः । नच तेनैव वपुषेति भगवत्स्वरूपविशेषणं अहमित्युक्त्वैव निर्वाहः 'अजोपि सन्नव्ययात्मा' इत्यादिभिश्च । ननु पृष्ण्यादिदशायां पीतेन स्तन्येन देवकीदशायां पीतशेषता नाङ्गीक्रियते तर्हि षड्बालानां तत्पानस्य संभवात् भोजराजहननात् पूर्वमेव मुक्तिः स्यात् तत्राह श्रीकृष्ण इति ।



एतत्प्रकरणस्थ सुबोधिनीकारिकाणां अकारादिवर्णानुक्रमेण सूची ।

एतत्प्रकरणस्थ मूलश्लोकानामकारादिवर्णानुक्रमेण सूची ।

एतत्प्रकरणीय श्रीमदाचार्यवाङ्मुक्तावलिरकारादिक्रमेण ।

वाक्यम् ।	पृष्ठाङ्कः ।
२४ ब्रह्म च यादृशं वेदान्तेष्ववगतं तादृशमेव मन्तव्यं तत्र मूलभूतं सर्वं व्यवहारातीतमपि स्वयमेव स्वशक्तिरूपेण स्वधर्मरूपेण स्वकार्यरूपेण च जातमिति श्रुतिः प्रतिपादयति स्वयमेव च वक्ति । ...	५१।१९
२५ ब्राह्मणपादरेणुषु सर्वाणि तीर्थानि वसन्ति न केवलमेतावानेवोत्कर्षः किं तु भगवत आश्रयभूताः भूमावेव देवभावं प्राप्ताः ।	४०।२
२६ भगवतोपि देहग्रहणपरित्यागौ इयांस्तु विशेषः उपाधिवशात्तस्य देहग्रहणं भगवतस्तु मायाजवनिकापगमात् ।	१०।२०
२७ भगवदाज्ञया महदादिभिः कृते ब्रह्माण्डे तत्र स्थित्वा तैरेव निष्पादितं शरीरं परिगृह्य तेषां तत्स्वामिको वा येनुविधानं न कुर्वन्ति ते कृतघ्नाः :	७३।५
२८ भगवच्छेषतया देवान्तरभजने न कोपि दोषः ।	७३।९
२९ भगवत्सेवकः यत्र क्वचित्सेवमानो वैकुण्ठ एव सेवते न तु जगतीति ज्ञातव्यम्।	१०८।१०
३० भगवानपि देवकीगृहे प्रादुर्भूतः तत्रत्य मायां दूरीकृत्य प्रादुर्भूतो निश्चल एव । ततः प्रदेशान्तर्गमने पूर्वस्थाने माया संवृत्ता स्थलान्तरस्थानगतेति प्रतिक्षणं रूपान्तराणि भवन्ति । ...	१०।१८
३१ भगवान् गुणाश्चेति कोटिद्वयं सत्त्वादीनामात्मत्वे जडो भवति जडात्मस्वीकारात् । भगवत आत्मत्वग्रहणे चेतनो भवति अतो यैर्जडात्मता स्वीकृता तेषामप्यग्राह्यः ।	४२।१४
३२ भगवानेव, सेव्य एतावानेव एवश्रुतिगीतार्थः ।	१२२।२३
३३ भगवान् सृष्ट्यादौ कालं मायां च सृष्टवान् ये मायया मुग्धा भविष्यन्ति तान् कालो ग्रसिष्यति ये तु लोकान् भगवन्मायाग्रस्तान् ततः कालेन ग्रस्तानालोक्य मायापगमे विस्तारे च भगवद्भजनमेव गतिरिति भगवन्तं सेवन्ते तेषां पुनर्मायामोहः सर्वथा न संगच्छते । ...	१०३।२
३४ मतान्तर एव दोषाणां दोषत्वं ब्रह्मवादे तु ब्रह्मत्वमेवेति सर्वमविरुद्धम् ।	९१।५
३५ ममानुग्रहो ब्रह्मभावः पश्चान्मत्सेवया सर्वं सुखमिति तत्रायं क्रमः प्रथमतः सेवकैः सह मैत्र्या सेवकसमानशीलव्यसनत्वे सेवकतुल्यता ततस्तैर्मैत्र्याऽन्येन वा तस्य ज्ञानोदयः ततो ज्ञानपूर्णः केवल एव मां भजते ।	१३२।२१
३६ महति राजद्रोहे कृते राजकीयास्तन्नाशयेयुरेव स चेद्राजा तमपराधकर्तारं स्वसिंहासने निवेशयेत् तदा बाधकाः सर्वे साधका भूत्वा न पीडां कुर्युः । ...	१४७।५
३७ महत्त्वं सद्गुणैर्भवति इति सद्गुणानां मध्ये सर्वावस्थासु क्षोभाभावो महान् इति ।	१४३।२२
३८ मित्रं हि मित्रं भावयति तस्मिन् प्राप्ते दृष्टे वा तस्य सुखम् । ...	१७६।१४
३९ यतः कुतश्चिदपि श्रुतं भगवच्चरित्रं कार्यं साधयत्येव फलरूपता तु साधारणानामपि भक्तमुखश्रवणादेव भवति ।	१५०।२१
४० यत्र जीवानामेवानन्दस्तिरोहितस्तत्र जडानामानन्दगन्धोपि नास्ति परं मरुमरीचिकावदत्यन्तनिर्जलभूमौ यथा जलप्रतीतिर्भ्रान्तानामेवं स्रक् चन्दनादिष्वपि आनन्दोस्तीति भ्राम्यति लोकः । ...	७९।१८
४१ यत्रांशः प्रकटः भगवांश्च प्रकटस्तत्र तथैवात एव पूर्वं पुरुषेष्वेव भगवदाराधनमुक्तं यत्र पुनः स्वरूपं जडतामापन्नं भगवांश्च सर्वथा न प्रकटस्तत्र किं स्यात्, नहि काष्ठे वह्निरस्तीति शीतनिवृत्त्यर्थं होमार्थं वा काष्ठं सेव्यते तस्मादप्रकटभगवत्स्वरूपाः सर्वथैव न सेव्याः ।	११८।५
४२ यत्रैव पक्षद्वयं विरुद्धं तत्संकटस्थानमिति वदन्ति लोकाः । ...	१४१।१०
४३ यथा कर्मसत्रं सप्तदशावरास्तुल्यफलास्तुल्यसाधनाश्चाहमहमिकया प्रधानगुणभावमाश्रित्य कर्म कुर्वन्ति एवं निःसदिग्धब्रह्मज्ञानार्थं सर्व एव निर्णयार्थं प्रवृत्तास्तेषां विचारो ब्रह्मसत्रम् । ...	५८।१०

वाक्यम् । पृष्ठाङ्कः ।

४४ यथा कामिनां स्त्रीविशेषे सक्तचित्तं तत्सर्वथाननुभूय न निवर्तते तथा स्नेहे जाते भगवद्रसाभिनिवेशे यदा भगवति चित्तं भवति तादृशः कदाचिदपि गृहं न सेवते। १०९।१५

४५ यथा अनन्तवृक्षा भूमौ फलन्ति तत उच्चस्थितान्यपि फलानि भूमावेव पतन्ति एवं सर्वे वेदाः स्वस्वरीत्या स्वशक्यं माहात्म्यं भगवतो वदन्ति तानि ज्ञानानि फलान्युच्यन्ते तेषां क्वापि पर्यवसानाभावात् भगवत्येव पतन्ति पर्यवसिता भवन्ति । ... ... १२१।१९

४६ यथा राज्ञः स्वगृहे रममाणस्यापि तदानन्दोद्रेकात् बहिर्गमनेच्छा भवति तथा भगवतोपि कदाचिद्विहारः (स्वानन्देन क्रीडा) तदा स्थावरजङ्गमभेदाः स्वयमेवोत्पद्यन्ते यथा वर्षाकाले जीवाः । नहि पर्जन्यः वर्षणादधिकं किंचित्कार्यं करोति जीवानामुत्पत्त्यर्थम् । तथा भगवानपि केवल एव विहरति । ततश्चेष्टायामुद्गतायां स काल इति तेन प्रकृत्यादि शक्तयः प्रेरिता भवन्ति यथा राजनि निर्गते सेवकाः अप्रेरिता अपि कार्येषु प्रवर्तन्ते तथा कालो गुणक्षोभं कृतवान् । तथा प्रबलाग्नावुद्गते विस्फुलिङ्गा इव जीवा अपि निःसरन्ति ततः कालेन क्षुब्धा गुणाः साक्षात्परंपरया च सर्वमेव कार्यजातमुत्पादयन्ति । ... ... ९५।११

४७ यदैव भगवति सद्बुद्धिर्भवति तत आरभ्य भगवति भावः कर्तव्यः । १०४।३

४८ ये उत्पद्यन्ते प्रवाहे तेषामुत्पत्तिविरोधित्वाद्भगवद्दर्शनं दुर्लभम् । ... १९।१

४९ वेदकालोल्लङ्घनं न पुरुषोत्तमादन्यस्य शक्यम् । ... ... २।१०

५० स ईश्वरो योऽलौकिकं करोति यो वेदस्याप्यशक्यं करोति । ... २।७

५१ स एव क्षुद्रादि सुखमपेक्षते निद्रालस्यप्रमादोत्थं यस्य स्वरूपानन्दः सात्त्विकानन्दो न संभवति । ... ६४।२

वाक्यम् । पृष्ठाङ्कः ।

५२ स एवेश्वरः यो नित्यानन्दः स एव कृष्णः । ... ... १८।१७

५३ सत्त्वगुणेन वा, पर्यवसानेन वा, इन्द्रियाणां दर्शनसामर्थ्याभावेन वा, शृङ्गारेण वा, कामेन वा, आनन्दस्वभावेन वा, भगवदुच्या वा, लक्ष्मीरुच्या वा, तादृशस्यैव सहजत्वेन वा, नीलरूपो भगवानिति ज्ञातव्यम् । ... ... १६०।१७

५४ सर्वत्र जगति भगवानेव शेते नह्यन्यो निद्रासुखभोक्ता भवति सर्वेषांप्राणिनां सुखार्थं वा। ... ... १७२।१४

५५ सर्वं पापमेकत्र ईश्वरावज्ञा चैकत्र । ... ... १४१।२२

५६ सर्वोहि स्वस्मिन् विद्यमानं प्रयच्छति न त्वविद्यमानमतः पण्डिता इममर्थं ज्ञात्वा भगवत एवाङ्घ्रिमुपासते आनन्दविधिम् । ... ... ७९।२०

५७ सापेक्षा न विरक्ता भवन्ति । १४६।१८

५८ सुवर्णशृङ्खलावत्सात्त्विकमपि गृहमन्धकूपप्रायमेव स्वपरासङ्ग्रहात् तदेव विस्तारकं यच्छेदबुद्धिनिवारकम् । ३९।३०

५९ स्वक्रियया प्राप्यं दुःखेनापि यन्न भवति तद् दुःप्रापम् । ... ... १९।२

६० स्वजनादेर्भगवतश्च तारतम्यं ये न जानन्ति ग्राम्यसुखाय सर्वत्र मिथुनीभूय चरन्ति यथा स्वोपवेशार्थं कश्चित् स्थूलं मञ्चकं नयति पथिकः तथेमे निमेषार्धमात्ररत्यर्थं सर्वथा शृङ्खलाबद्धा इव तया सह चरन्ति नह्यन्तःपीडितं विषयाः सुखयन्ति । १०८।२

६१ स्वभावतः स्मृत्यादिषु सर्वं एवानन्दा निषिद्धाः यथेह साधारणस्त्रियः न सेव्यास्तथाप्सरसोपि यथात्र कालादिनियमव्यतिरेकेण भोगेषु भुज्यमानेषु सर्वश्रुतिस्मृतिविरोधो भवति एवं स्वर्गलोकेष्वपि ज्ञातव्यं यथात्रापकीर्तिः तथा तत्रापि अतः सर्व एव सुखानुभवो निषिद्धः निषिद्धाचरणे सर्वथा दुःखमिति सर्वमेव सुखं दुःखानुविद्धम् । ... ... ११९।१३

उपन्यस्तवाक्यानां सूची।

वाक्यम् ।	पृष्ठम् ।	कुत्रत्यम् ।
एतेन योगः प्रत्युक्तः	१०५	ब्र. सू. २।१।३
एवं त्रयी धर्ममनुप्रपन्ना- गतागतं कामकामा लभन्ते	१५	भ. गी. ९।२१
एष ह्येव आनन्दयति	७९।८०	तै. २।७।१
एष सर्वेश्वरः एष लोकपालः	१००	बृ. ४।४।२२
कथमसतः सज्जायेत	११०	छा० ६।२।२।
कथं चरन्ति श्रुतयः	५९	भा. १०।८७।१
कश्चिन्महान् तस्य न कामनिर्जयः	१२४	भा. ८।८।२०
कारणगुणाः कार्यगुणमारभन्ते	५	
कृतघ्ने नास्ति निष्कृतिः	७३	म. भा. शां. पर्व. आपद्धर्मे. अ. १७२।२६
को ह्येवान्यात् कः प्राण्यात्	७९	तैति. २।७।१.
गांधर्वो राक्षसश्च	२६	धर्मशास्त्र मनु
गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्	७६	ब्र. सू. १।२।११
चक्षुःप्रीतिः प्रथमम्	२७	रतिरहस्यस्थं पद्यम्
चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रम्	४	केन. २
चतुर्विधा भजन्ते माम्	१००	भ. गी. ७।१६
जहात्येनां भुक्तभोगामजोन्यः	११७	श्वे. ४।५
ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति माम्	८४	भाग. ११।१९।३
ततश्च शौरिर्भगवान्प्रचोदितः	९	भा. १०।३।४८
तत्सृष्ट्वा तदेवानुप्राविशत्	४।७६।९१	तै. २।६।१
तद्बधस्तस्य हि श्रेयः	१४०	भा. १।७।३७
तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्	८३	भा. ७।१।३१
तस्माद्वा एतस्मादात्मनः	६६	तै. उ. ३।१
तस्मिन्नाकाश ओतश्च प्रोतश्च	९९	बृ. ३।८।११
तस्य पुरुषविधतामन्वयं पुरुषविधः	७३	तै. २।२।१
तेजो वै घृतम्	६३	तै. ब्रा. ३।१२।५।३३
तेषां ज्ञानी नित्ययुक्त एकभक्ति- विशिष्यते	८४	भ. गी. ७।१७
त्रिविधस्य षडर्थस्य निशब्दोपि विशेषणम्	५५	
ता ये पिबन्त्यवितृषो नृप गाढकर्णैः	२०	भा. ४।२९।४०
दहरं वै सा पराभ्यां दोहाभ्यां दुहः	७५	
द्व्यचश्छन्दसि	७४	पा. सू. ४।३।१५०
न तं विदाथ य इमा जजानान्य- युष्माकमन्तरं बभूव	८५	तै. सं. ४।६।२२
न तद्भोति कश्चन	१२२	बृ. ३।८।८
न वयं श्रद्दधीमहि	१४०	भा. १०।८९।३२

वाक्यम् ।	पृष्ठम् ।	कुत्रत्यम् ।
यो नः सपत्नः	७२	
यो नः शपादशपतः	७२	भाग. ३।२९।३८
योन्तः प्रविश्य मम वाचमिमां प्रसुप्ताम्	७८	तै. ब्रा. ३।५।२।६
योन्यो देवतामुपास्ते	७२	
यो मां द्वेष्टि जातवेदः	७२	तै. ब्रा. ३।६।७।१
यो यच्छ्रद्धः स एव सः		भ. गी. १७।४
वागग्निरभवत्	९३	छान्दोग्य, ६।५।३
वाङ्मनसि संपद्यते	९३	छान्दोग्य, ६।५।३
वाचं दुहितरं तन्वीम्	२१	भाग. ३।१२।उ८
वेदैश्च सर्वैरहमेव वेद्यः	५०	भगव. गी, ०५।१६
शक्त्या युक्तो विचरति	१२९	भाग. ४।२४:१८
शान्त उपासीत	६८	छान्दोग्य, ३।१४।१
शान्तो दान्त उपरतस्तितिक्षुः	६८	बृहदारण्यक, ४।४।२३
श्रुत्वाप्येनं वेद न चैव कश्चित्	२२३	भग. गी. २।२९
षोडशकलोयं पुरुषः	४।७७	तैत्तिरीयं, २।६।१
स आत्मानं स्वयमकुरुत	९१	तै. २।७
सत्यं ज्ञानमनंतं ब्रह्म	८९।१३२	मुण्ड. १।९
सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्	११४	पू. मी. ४।१७
सर्वं तद्धिष्ण्यमीक्षयध्वम्	९२	भा. ३।२९।२२
सह भागं न लभताम्	१३९	भा. ४।२।१८
स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियः	१२४	भा. १०।८७।२३
स्वप्रकाशश्चिदात्मा	८९	
स्वर्गापवर्गयोर्द्वारं	१०३	भा. ७।१३।२४
स्नानालङ्करणं प्रेष्ठं	४६	भा. ११।२७।१६
स्नेहपक्वं न दुष्यति	४५	
सा च प्रशासनात्	१००	ब्र. सू. १।३।११

शुद्धिपत्रम्।

अशुद्धम्।	पत्रम्।	पंक्तिः।	शुद्धम्।
तयो युवां	९	१६	यतो युवां
भगवत्पुत्रयोः	२२	१९	भगवत्पुत्रायाः
प्रेषाणार्थम्	२९	७	प्रेषणार्थम्
रथाश्वानर	२९	२०	रथाश्वनर
तुष्टवे	४५	१५	तुष्ट्या
तिष्ठतीति	६१	९	तिष्ठन्तीति
प्रवृत्ताः	६२	८	प्रवृत्ता
सुरयः	६८	४	सूरयः
निवृत्तिर्युं	६९	१३	निवृत्तिर्यु
कथानल्योक्ति	७१	१२	कथानन्ल्योक्ति
जीववज्जनेन	८०	२१	जीववज्जनने
एतस्था	८०	२४	एतस्या
परमान्दस्य	८६	१९	परमानन्दस्य
भयनाके	९४	१७	भयानके
ये यथ	१०४	१३	ये यथा
रहिता	१५३	१०	रहिताः
एवम वेयुः	१६४	१७	एव भवेयुः
दत्वा	१६१	१७	दत्त्वा